CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १६८ ~~५~~३

३८१-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ढ. १६८२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनक १२२२

गन्ध ॐ नमः परदेवतायै ॥ ॥ यं वदन्त्यमलात्मानः पुरुषं प्रकृतेः परं ॥ चिद्रूपं परमानन्दं व
१ न्देऽहं विघ्ननायकं ॥ भर्तारं गुरुणाहृद्धिशृङ्गस्यमचलं गत्वाभिसारक्रमाद्दियन्नीकुसवर्त्मनैव गु
णावत्यानन्दमातन्वती ॥ शेते सुप्तभुजङ्गयोन्नकुटिलायामेरुमूलं ॥ गतासूक्तेयसुशान्तानिता·
निमुरजित्सुख्यानि पायादसौ ॥ विश्वामित्र इति ख्यातो नृपः परमधार्मिकः ॥ सिद्धिं दृष्ट्वा ॥ वशिष्ठ
स्य तपसोपे सुदुश्चरं ॥ अप्राप्य तपसः सिद्धिमुदीचीं दिशमाश्रितात् ॥ गङ्गाद्वार समासीनं सुनिं यो
गपरायणं ॥ दत्तात्रेयं महाभागमभिवाद्य कृताञ्जलिः ॥ उवाचेदं वचस्तस्मै विनयानतकन्धरः
विश्वामित्र उवाच ॥ नाज्ञास्यं समस्यादि संपि क्रतुभिर्बहुदक्षिणैः ॥ सत्पात्रे सर्वदानानि मत्तनापि गंध
मुनिसत्तम ॥ महाविद्यां प्रजापाथपुरश्चिकिया पूरःसरां ॥ भवाब्धेस्तारणोपायं तपश्चन्यासुदु १
श्चरं ॥ सर्वागमैकतत्त्वज्ञस्तु न निस्तु तपोधन ॥ किन्तु रोध्यामयहं देव कुत्र यास्यामि तद्वद ॥ दत्ता
त्रेय उवाच ॥ मा विषीद नृपश्रेष्ठ सर्वथा त्वं स्थिरो भव ॥ यत्कृत्वाधिगतं पूर्वं मस्मादिर्न गिरिकेश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रात् ॥ तदशेषंप्रवक्ष्यामिगुह्यात्गुह्यतमंपरं ॥ सारमुद्धृत्यभगवान्यामलादपिसर्वतः ॥
तन्त्रंद्वादशसाहस्रंभोगमोक्षैकसाधनं ॥ पार्वत्यैकथयामासतत्त्वंगान्धर्वसंज्ञकं ॥ गीयन्तेस
र्वतत्त्वाणामखिलान्यायतरिस्त्विह ॥ तेनायंनृपशार्दूलतन्त्रोगान्धर्वउच्यते ॥ नन्दिकेश्वरउवाच
कैलासशिखरारूढंदेवदेवंजगद्गुरुं ॥ पञ्चवक्त्रंमहाकायंजटाजूटविभूषितम् ॥ चारुच
न्द्रकलायुक्तंमूर्द्धिव्यालौरवभूषितम् ॥ बाहुभिर्दशभिर्युक्तंव्याघ्रचर्माम्बरंशुभं ॥ कोलकूटध
रंकण्ठेनागहारोपशोभितम् ॥ विभूतिभूषणंदेवंप्रतिवक्त्रंत्रिभिस्त्रिभिः ॥ नेत्रैस्तुपञ्चदशभि
र्युक्तंस्फटिकसन्निभं ॥ शक्तित्रिशूलखट्वाङ्गंवरदाभयकानपि ॥ अक्षसूत्रंवीजपूरंभुजग
डुमरुंधनुः ॥ दक्षिणोवामभिर्हस्तैर्धृतंकोटीरभूषणं ॥ वृषभोपरिसंस्थन्तुगजकृत्तिपरि
च्छदं ॥ सर्वात्मनाविस्मृतचित्तंगिरिजामुखपङ्कजे ॥ प्रणम्यपरयाभक्त्याकृताञ्जलिपुटासती
उवाचपार्वतीदेवीईश्वरंपरमेश्वरं ॥ पार्वत्युवाच ॥ देवदेवजगन्नाथभक्तानामार्त्तिनाशन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्थ प्रसन्नोयदिमांदेवब्रूतकिंवानतदुच्यते ॥ योगंकिम्वाशरीरस्थंब्रूहिमेपरमेश्वर ॥ स्मितपूर्व्वःम
२ हादेवःपूर्णानन्दमयोविभुः ॥ वामदेवास्यमन्त्रेणप्रत्युवाचप्रियांप्रभुः ॥ ईश्वरउवाच ॥ यु
क्ताभाक्तापरोलाभोवन्तृसुखात्तापरंसुखम् ॥ यज्ज्ञानात्तापरंज्ञानंनतत्त्वंस्त्वेवधारय ॥ य
द्दृश्यात्तापरंदृश्यंयद्दृष्ट्वानपुनर्भवः ॥ तिर्य्यगूर्ध्वमधःपूर्णंसच्चिदानन्दमव्ययं ॥ अनन्तं
नित्यमेकंयत्तत्त्वंस्त्वेवधारय ॥ पार्व्वत्युवाच ॥ कर्म्मपाशसमाबद्धोभोगीभोगपरायणः
कथंमुक्तोभवेद्देवभोगेनैवमहेश्वर ॥ तत्सर्व्वंकथयज्ञानंयद्यहंभववल्लभा ॥ ईश्वरउवाच
शृणुदेविप्रवक्ष्यामियत्गुह्यंपरमाद्भुतं ॥ नवक्तव्यंत्वयाकिञ्चिज्ज्ञानेनकथितंमया ॥ अपृथ नेत्र
क्त्वशरीरत्वाद्वक्ष्यामितवसुव्रते ॥ यदुक्तंतेमयातन्त्रंत्रिविधंत्रिगुणात्मकं ॥ तामसंकुत्रसंप्रो २
क्तंराजसञ्चापिकुत्रचित् ॥ सात्विकंतत्रकुत्रापिधीमांस्तस्मान्नतुस्मरेत् ॥ तामसंनरकायैवरा
जसंप्रियये ॥ सात्विकंमोक्षदंप्रोक्तंतुरीयंनिष्फलंशिवे ॥ शास्त्राणिचैवयोगिभिर्नामसानिनिवो

धर्मे ॥ तामसान्निष्ठुराणानि तन्त्राणि तानि च प्रिये ॥ स्वर्गमोक्षविहीनानि तानि यत्नाद्विवर्ज
येत् ॥ इयमर्थं पुरा देवि पृष्टवान्केशवीसुत ॥ मां प्रसाद्य तपस्तप्त्वा भोगेन मुक्तिसाधनं ॥ तस्यैवा
पि मयाप्रोक्तं सन्देहच्छेदकारकम् ॥ ततस्तेनापि संप्रोक्तं ब्रह्मणोहं समब्रुपिता ॥ नन्दिकेश्वरस्तत्रैव
मयोक्तं पूजनेन वहि ॥ सोऽपि चाभूत् स्वयंकर्ता मम तुल्यो महामति ॥ पुष्पदन्तो ततः प्रोक्तं तन्त्रे
मेतद्वरानने ॥ गन्धर्वेभ्यो ददौ तेनाप्यहस्यं परमाद्भुतं ॥ ब्रह्मणा च तथा प्राप्तं तस्मात्ते सुतयः प्रि
ये ॥ पुरन्दरो गाङ्गिरसात्गार्गवाद्दैत्यराट्प्रभुः ॥ पुलस्त्यादपि पौलस्त्योक्रमा देवं महीतले ॥ नमु
च्याद्यास्ततो दैत्याः पुरा स्वायम्भुवान्तरे ॥ महाबलपरीवारा महावीर्या महौजसः ॥ सर्वधर्मरताः शु
द्धाः सर्वपापविवर्जिताः ॥ त्रयीधर्मरताः सर्वे भग्नाश्च उपरोगमाः ॥ तदा करार्यमहेशानि ब्रह्मा
लोकपितामह ॥ मदन्तिकं समासाद्य स्तुतिभिर्मां प्रसाद्य च ॥ उवाच देवकार्यापि भक्ष्यं मधुरया
गिरा ॥ ब्रह्मोवाच ॥ सर्वज्ञ सर्वलोकेश सर्वदुःखनिसूदन ॥ भोगमोक्षप्रदे तन्त्रे नयाप्रकाशि

CC-0. In Public Domain. Digitization by eGangotri

राम ३

तेप्रभो॥ तद्वाक्यं महादेव नाराक्षसदानवाः॥ सिद्धिप्रदाभयेष्वेते प्रभुनाम कथञ्चरेत्॥ सर्वेष
स्वात्मनो देव यद्विद्या स्यान्निविद्यया॥ केवलस्पृष्टिः किमद्यापि कार्यं स्याद्वद शङ्कर॥ इति विज्ञाप्य
मांब्रुलायेषांब्रुलसदंप्रति॥ ततोऽहं परमेशानि गत्वा मन्दरपर्वतं॥ तानविप्रनाथसंस्मृत्यस
न्वयित्वा चैतैः सह॥ नन्दिकेश्वरमाहूय द्वारि संस्थापयः सत्वरं॥ क्षितव्यस्त्वया मद्विज्ञश्चेह समाग
तः॥ इत्यादिश्य प्रविष्टोऽहं निर्ज्जनं परमं महत्॥ मोहनार्थं परं तेषां दैत्यादीनां विशेषतः॥ शास्त्रा
णि विविधान्यत्र संप्रोक्तानि द्विजैः सह॥ एषा एवरामान्त्रेणापातित्यं ज्ञातिनामपि॥ यच्छिन्नता
न्महादेवि गोतमो मुनिपुङ्गवः॥ अक्षपाद इति ख्यातः प्रमात्तं मां विगर्हयन्॥ अनुभूयत दध्या
दं सामवदारतां ययौ॥ ततः कृपालुरहन्ते विस्मयमापिद्बुवानिदं॥ वैकल्यं तन्मा चक्षुर्विस्तुयस्य
सहमुने॥ प्रसन्नो यदा विस्तुन्ततः सिद्धिमवाप्स्यसि॥ यदुक्तं तेमयानन्ते कृतं स्वपरमात्म
नः॥ अधीनतारदान्सर्वसिद्धिमापमुनिस्तदा॥ प्रथमं हि मयैवोक्तं शैवं पाशुपतादिकं॥ मच्छ

रामः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्यावेशिसैर्विप्रैसंप्रोक्तानि ततः परं ॥ कणादेन च संप्रोक्तं शास्त्रं वैशेषिकं महत् ॥ गौतमेन तथा न्या
य सांख्यान्तु कपिलेन तु ॥ धीषणेन तथा प्रोक्तं चार्वाकमतिगर्हितं ॥ दैत्यानां नाशनार्थाय विष्णुना
बुद्धरूपिणा ॥ बौद्धशास्त्रमसत्प्रोक्तं नग्ननीलपटादिकं ॥ अयाप्यं श्रुतिवाक्यानां दर्शयन् लोक
गर्हितं ॥ कर्मस्वरूपत्याज्यत्वमत्रैव प्रतिपाद्यते ॥ सर्वकर्मपरिभ्रंशान्नैष्कर्म्यं तत्र उच्यते ॥ गौतम
प्रोक्तशास्त्रार्थनिरताः सर्व एव हि ॥ शार्गालयोनिमापन्नाः सन्दिग्धाः सर्वकर्मसु ॥ सर्वस्य जगतो
प्यत्र मोहनार्थं पुराशिवे ॥ वेदार्थवन्महाशास्त्रं मायावादमवैदिकं ॥ मयैव कथितं देवि जगतां ना
शकारणात् ॥ द्विजन्मना जैमिनिना पूर्ववेदमपार्थतः ॥ निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम्
तत्रैवाहं मलोमन्त्रान्नृसः दूष्य दोषविस्तरैः ॥ कृतवान् तन्त्रविस्तारं ससन्देहपदान्वितं ॥ अथ देवाश्च
दैत्यश्च दूषिते मन्त्रविग्रहे ॥ अभवन् दूषिताः सर्वे हीनवीर्यपराक्रमाः ॥ निर्बलास्तु रुहीनाश्च
अथ सर्वे दिवौकसः ॥ विष्णुलोकं समासाद्य व्यसनं तत्र्यवेदयन् ॥ विदित्वा व्यसनं विष्णुस्तत्तेषां

गन्ध ४

दिवौकसां॥ वैनतेयं समारुह्य नन्दिकेश्वरसन्निधौ॥ आगतो वारितस्तेन मद्दर्शनसमुत्सुकः॥
तत्रस्थितो महेशानि भगवान् जगदीश्वरः॥ वर्द्धयितुं शरीरञ्च वैनतेयं समादिशत्॥ प्रवृद्धस्य ख
गेन्द्रस्य स्थित्वा तस्योत्तमाङ्गके॥ सहस्त्रास्यमुपाविष्टमिदमाह स्मिताननः॥ श्रीभगवानुवाच॥
अकालं प्रलयं कस्मात् क्रियते भवताधुना॥ न शक्यते महादेव कर्तुमेव न साम्प्रतं॥ ईश्वर उवा
च॥ इषिताप्रलयोगामन्त्राः सौराश्चाग्निसमुद्भवाः॥ तथा वै दूषिता योन्याः प्रियश्चापीह केचन॥ सर
स्वत्या मता मन्त्रा वैष्णवाश्चपि केचन॥ वैनायका महामन्त्राः प्रायेणा इषिता मया॥ शाक्तितन्त्रेषु ये
केचित्ससस्ते स्वपदान्विता॥ श्रीभगवानुवाच॥ जगद्वन्द्य कृपाधाम सर्वभूतोपकारक॥ निवर्त्तस्व तंत्र
महादेव मद्वाक्यशासनादिभिः॥ ईश्वर उवाच॥ विरतोऽहं तदा तस्य विष्णोरमिततेजसः॥ वचनात् ४
परमेशस्य शङ्खचक्रगदाभृतः॥ नान्यथीत्येव ते सर्वे मोहिता विष्णुमायया॥ भविष्यन्ति च सन्दिग्धा
वालीशात्वादनास्थया॥ किंवदिष्यन्ति संसुरा हेतुवादपरायणाः॥ इति साध्यमिवाक्यश्च भविष्यन्ति

यत्नमुत्ताः॥ ॥इति गन्धर्वतन्त्रे प्रथमः पटलः॥ ॥पार्वत्युवाच॥ शक्तितन्त्रं महा
देव सन्देहं हितं कुरु॥ तथा कथय देवेश भोगे न मुक्तिसाधनं॥ ईश्वर उवाच॥ निःसन्देहं म
हातन्त्रं कथ्यतां खलु साम्प्रतं॥ गोपितव्यं पशोरग्रे पूर्णचन्द्रनिभानने॥ परात्मजीवयोरैक्यं
मयात्र प्रतिपाद्यते॥ ब्रह्मणोऽपि परं रूपं निर्गुणं वक्ष्यते मया॥ कथ्यतां विमले भद्रे आत्मानमा
त्मना पुनः॥ प्रणमामि महादेवि तुरीयां ब्रह्मरूपिणीं॥ यस्याः स्मरणमात्रेण भवाब्धौ न निम
ज्जति॥ अस्याश्चाराधनं कृत्वा नान्यदाराधनं चरेत्॥ अन्यस्य स्मरणाद्दुःखं योगिनीजालमा
भेत्॥ अपमृत्युर्भवेत्तस्य मन्त्रं च न फलं व्रजेत्॥ एतामुपास्य देवेशि किं न सिध्यति भूतले॥ स
कृदेनामुपासीत न मातुः स्तनपो भवेत्॥ तस्माद्विज्ञो महेशानि तुरीयां समुपाश्रयेत्॥ आदौ कामेश्व
री ज्ञेया द्वितीया भगमालिनी॥ वज्रेश्वरी तृतीया चतुर्थी त्रिपुरसुन्दरी॥ त्रयाणामपि देवानां प्रचो
दिता त्रिपादिका॥ त्रिपुरेति समाख्याता कामदा साहिका सेश्वरी॥ त्रीन् यस्मात् पुरतो दधाद्दुर्गा सा

CC-0. In Public Domain. Digitization by eGangotri

परमेश्वरी ॥ त्रिपुरेति समाख्याता सौन्दर्यातिशयात्तथा ॥ मयापि चिन्त्यते सा तु तत्प्रसादादहं
प्रभुः जगतामीश्वरत्वञ्च लब्धं तदनुकम्पया ॥ ब्रह्मत्वञ्च मया प्राप्तं विष्णुत्वं विष्णुना तथा ॥ सुरा
सुरमुनीन्द्राणां सकलं तत्प्रसादतः ॥ तेनेयं महती विद्या दुर्लभा भुवनत्रये ॥ देव्युवाच ॥ भगव
न् सर्वमन्त्राश्च भवता सम्प्रकाशिताः ॥ महात्रिपुरसुन्दर्या मन्त्रा ये पूर्वसूचिताः ॥ तांस्तानेवाधुना
नाथ सन्देहरहितान् कुरु (समहान् दोषो यत्नतस्तं विवर्जयेत् ॥ संसिद्धेः कारणं) ईश्वर उवाच
सर्वकार्येषु सर्वज्ञ तान्त्रिके वैदिके तथा ॥ अविश्वासो महान् दोषो यत्नतस्तं विवर्जयेत् ॥ सं
सिद्धेः कारणं देवि विश्वासः समुदाहृतः ॥ विदित्वा रक्षणं यत्नु सगुणं वीर्यवर्द्धनं ॥ तत्त्वबुद्धी
लकं यत्न ग्रन्थिस्मालयसन्नरे ॥ आस्तिकोऽथ शुचिर्दान्तो दैन्यहीनो जितेन्द्रियः ॥ वसिष्ठो ब्र
ह्मवादी च ब्रह्मतीव्रस्य परायणः ॥ सर्वहिंसाविनिर्मुक्तः सर्वप्राणिहिते रतः ॥ सोऽस्मिन् शास्त्रेऽ
धिकारी स्यात् नदन्योऽत्र मसाधकः ॥ नास्तिकाय कुशीलाय यदा निकाय कदाचन ॥ वक्तव्यं न परो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रये कुटिले चुम्बकेन तथा ॥ भृग्वादे वि मरुत् गुह्यं मन्त्रोद्धारं वरानने ॥ आदौ पञ्चदशी विद्या कथ्यते वी
रवन्दिते ॥ कामदेवस्ततो योनिस्तुर्यं स्वर पुरन्दरौ ॥ भुवनेश्वी ततः पश्चात् पञ्चरश्मि विभूषित ॥ अ
यं स वाग्भवो देवि वागीशत्व प्रदायक ॥ एतज्ज्ञानामृता बीजं किंतु सिध्यति भूतले ॥ बालकस्य
तु जिह्वायां त्रिदिनाभ्यन्तरे न्यसेत् ॥ मधुनाश्वेत दूर्वाभिः सुवर्णस्य शलाकया ॥ इदं वाग्भवकूट
न्तु लिखेद्बैजनमानने ॥ स एवं पण्डितो भूयान्नन्तु मुख्यो भवेत् ध्रुवम् ॥ एतत्वाग्भवकूटन्तु वा
गीशस्यापि मूर्द्धनि ॥ दत्त्वा पठेत् सिद्धमष्टोत्तरशतं प्रिये ॥ सोऽपि श्लोकं सहस्राणि कोटीन्य
वत संशयात् ॥ स तर्कपदवाक्यार्थ शब्दालङ्कारसारवित् ॥ जिह्वायां न्यसनाद्देवि मूकोऽपि सुकवि
र्भवेत् ॥ बहुनात्र किमुक्तेन जल्पितेनापि सुन्दरि ॥ वागीशं स्पर्शने वाक्यैः सर्वज्ञो भु वि ज्ञायते ॥ मू
को भवति वागीशो वा वस्यति रिवापरः ॥ शिवचन्द्रौ समयुक्तन्य काम व्योम पुरन्दरात् ॥ उद्धरेत्तु परेशा
नि लज्जा विजं ततः प्रिये कामराजमिदं भद्रे यद्वर्ण सर्वशोभितं ॥ चन्द्र कामस्तथेन्द्रश्च सहामाया

गन्ध
६

ततः परं ॥ शक्तिबीजं वरारोहे वेदाक्षरसमन्वितं ॥ त्रिकूटेयं महाविद्या महात्रिपुरसुन्दरी ॥ सर्वती
र्थमयी देवी सर्वदेवस्वरूपिणी ॥ सर्वशास्त्रमयी शुद्धा सर्वदोषविवर्ज्जिता ॥ चतुर्वेदमयी साक्षात्स
र्वसौभाग्यदायिनी ॥ कामराजस्य विज्ञेयं भोगमोक्षफलप्रदा ॥ अनया सदृशी विद्या त्रिषु लोकेषु
दुर्ल्लभा ॥ रमाबीजं ततो योनिः कामः शुक्रं तथेश्वरी ॥ पूर्ववत्कामराजस्य शक्तिकूटं तथैव च ॥ सर्वा
र्थसिद्धिदा विद्या त्रैलोक्यवशकारिणी ॥ तव स्नेहान्महेशानि मयेयं न प्रकाशिता ॥ एतस्या एव विद्या
याः शक्तिं तुर्यां च पार्वति ॥ हित्वा मुखे शिवे त्वं भ्रां लोपामुद्रा प्रकाशिता ॥ एतच्छान्तवसुद्दिष्टं शृणु
शान्तमनन्तः परं ॥ शक्तिर्महेशः कामश्च इन्दुबीजमतः परं ॥ सहमाया ततः पश्चात्पूर्ववदपरं ततः
विद्यात्र्यमिदं भद्रे दुर्ल्लभं भुवनत्रये ॥ देव्युवाच ॥ षोडशार्णां महाविद्यां त्रैलोक्यवशदायिनी ॥
अधुना कथयेशान यद्यहं तव वल्लभा ॥ ईश्वर उवाच ॥ शृणु देवि महाविद्यां षोडशाक्षररूपिणीं
एतस्या एव विद्याया यदा श्रीभुवनेश्वरी ॥ तदेयं परमेशानि षोडशाक्षररूपिणी ॥ मायास्थाने र

तंत्र
६

CC-0. In Public Domain. Digitization by eGangotri

मावीजं दत्वान्या षोडशी भवेत् ॥ वरदा सिद्धिदा विद्या तत्कुबेरास्पददायिनी ॥ चिन्तामणिरियं
विद्या त्रैलोक्ये चापि दुर्लभा ॥ वेदादिमणिताचान्या विद्या मोक्षप्रदायिनी ॥ तथैव हि महावीजं र
मावीजं तथैव च ॥ पञ्चदशाक्षरी विद्यां तथैव च समुच्चरेत् ॥ सेयं सप्तदशी विद्या साक्षाद्ब्र
ह्मस्वरूपिणी ॥ देव्युवाच ॥ ततः कथय देवेश राजराजेश्वरीं परां ॥ षोडशानां महाविद्यां त्रैलोक्यव
शदायिनीम् ॥ जननीं सर्वमन्त्राणां परं ब्रह्मस्वरूपिणीं ॥ ईश्वर उवाच महीपृष्ठे स देवानां तु मानु
षः ॥ राजराजेश्वरी विद्या कथ्यते शृणु पार्वति ॥ रमावीजं समुद्धृत्य मायावीजं नियोजयेत् ॥ काम
वीजं समालिख्य वाग्वीजं तदनन्तरं ॥ चतुर्दशस्वरोपेतं चन्द्रविन्दुयुगान्वितं ॥ एवं तां भुवने
शानीं रमाश्चैव महेश्वरि ॥ पञ्चदशाक्षरी पश्चात् उद्धरेत् परमेश्वरि ॥ व्यत्क्रमात् परमेशानी
पूर्वोक्तं वीजपञ्चकं ॥ आलिख्य सम्पुटीकुर्यात् विद्येयं ह्यस्य कूटक ॥ भूरीयं महाविद्या केवलात्म
स्वरूपिणी ॥ षोडशाणां महाविद्या श्रीविद्या कथिता परा ॥ वक्त्रकोटिसहस्रैस्तु जिह्वाकोटिशतै

CC-0. In Public Domain. Digitization by eGangotri

गन्ध
८

रपि ॥ वर्णितं नैव शाक्ते यंत्रो विद्याषोडशाक्षरी ॥ षोडशार्णा महाविद्या सर्वतन्त्रेषु गोपिता ॥ त
वस्नेह्रास्महेशानि गन्धर्वे विप्रकाशिता ॥ ॥ इति गन्धर्वतन्त्रे द्वितीयपटलः ॥ ॥ दे
व्युवाच ॥ देवदेव जगन्नाथ भक्तानामार्तिनाशन ॥ पञ्चपञ्चाक्षरीं विद्यां पञ्चमीं सर्वकामदां ॥ अ
धुना कथयेशान समग्रां पापनाशिनीं ॥ ईश्वर उवाच ॥ दुर्लभा पञ्चमी विद्या पञ्चरूपात्मिका
शुभा ॥ भक्तिमुक्तिप्रदा शुद्धा सुखदा दुःखनाशिनी ॥ शृणु देवि प्रवक्ष्यामि यथा सा चिन्तिता परा
गुरुभक्तेन शुद्धेन साधकेन सुबुद्धिना ॥ देवीं पञ्चात्मकं सर्वं जगदेतच्चराचरं ॥ पृथिव्यापस्तथा
तेजो वायुराकाशमेव च ॥ पृथिवी वास्तवाणी शक्तिजलं नारायणी तथा ॥ तेजो रुद्रस्य रुद्राणी वायु
वीशस्य चेश्वरी माहेश्वरी तथाकाशशक्तिर्महेश्वरस्य च ॥ पञ्चदेवात्मकं पञ्चपञ्चमी पञ्चशात्म
यः ॥ या शक्तिः सर्वभूतानां जगच्चैतन्यरूपिणी ॥ सा एव पञ्चमी विद्या जगदाधाररूपिणी ॥ सा ए
व हि जगत्सर्वं सा स्वपरमा कला ॥ नान्यत्परतरं देवि विद्यते तन हि स्फुटे ॥ पञ्चविंशतितत्त्वेन तु

तंत्र
८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एके पञ्चदेवता ॥ आदौ कामेश्वरी ज्ञेया ततो वज्रेश्वरी शुभा ॥ तृतीया भगमाला च तुर्या त्रिपुरसुन्द-
री ॥ श्रीमत्त्रिपुरसुन्दर्याश्चिन्तनीया परा कला ॥ सा एव पञ्चमी शक्तिः परब्रह्मस्वरूपिणी ॥ प-
रमानन्दरूपं यज्जगतां कारणं महत् ॥ तस्या देवास्ततः प्रोक्तं उदयास्तविवर्जितं ॥ स्थूलत्वे स्थूलरू-
पा सा सूक्ष्मत्वे सूक्ष्मरूपिणी ॥ स्थूलसूक्ष्मप्रभेदेन जगत्कारणरूपिणी ॥ योऽसौ विश्वेश्वरो दे-
वो विश्वं व्याप्य स्थितः स्वयं ॥ सैव विश्वेश्वरी देवी व्यापकत्वेन संस्थिता ॥ नित्यासत्सुखरूपा च मल-
सुखश्रुतप्रदा ॥ तत्स्वरूपानन्दस्य यथा परमानन्दरूपिणी ॥ किं पुनः शान्तिरूपेण परब्रह्मस्वरूपि-
णी ॥ तस्याः पुनः पुनः सृष्टिर्जायते लीयते सदा ॥ तस्माच्छक्तिप्रधानाच्च शक्त्या व्याप्तमिदं जगत् ॥
सर्वानन्दहृदयेश्वात्वे तानन्दपारगः ॥ समयाचारसम्पन्नो भोगी भोगपरायणः ॥ सदा ज्ञानविशु-
द्धात्मा ॥ गुरुभक्तो जितेन्द्रियः ॥ गन्धर्वरूपवान् भूत्वा पञ्चमीं समुपासयेत् ॥ पृथिव्यां मानवोश्रे-
ष्ठो यदि ज्ञानाति पञ्चमीमृज्ञाप्रभावेन गन्धर्वो नन्दनो देवयोगतः ॥ यो जानाति महाविद्यां पञ्चमू-

CC-0. In Public Domain. Digitization by eGangotri

दाक्षिकांपरांसमभवेत् एवचोदेविपरामासान्नात्रसंशयः ॥ सदाज्ञानविशुद्धात्मामोक्षमार्गमवे
न्नरः ॥ भोगेनलभतेमुक्तिंयदिज्ञानातिपञ्चमीं ॥ पञ्चपञ्चाक्षरींविद्यांयोऽसौज्ञानातिसाधकः ॥
सपूज्यःसर्वलोकेषुसदेवोनतुमानुषः ॥ त्रिकूटमेकूटेष्वकूटमेकंत्रिपञ्चकं ॥ पञ्चपञ्चाक्षरींवि
द्याञ्चित्रकूटञ्चत्रिकूटेपञ्चदेवता ॥ एकवर्णापञ्चदशादेवतापरिकीर्तिता ॥ पञ्चविंशतितत्वेन
त्रिकूटेपञ्चसंख्यया ॥ पञ्चसप्ततिपूर्वाणितेनतासांशतत्रयं ॥ पञ्चकूटान्वितविद्यापरासौ
भाग्यसुन्दरी ॥ वर्णरूपेणसाप्वीजगदाधाररूपिणी ॥ अक्षरात्सर्वमुत्पन्नंजगदेतच्चराचरं
नित्यमेकाक्षरंब्रह्मअक्षरंपरमंपदं ॥ जप्यमेकाक्षरंब्रह्मआदिकूटस्थितमध्यगंजपध्यानतःसाध
येत्सर्वंवहुयत्नेनकिंफलं ॥ तदेवपरमंगुह्यंमहासौभाग्यदायकं ॥ तदेवपञ्चकूटन्तुपञ्चम
त्वेनपञ्चमीकामंविद्युद्युतंमायाप्रान्तं ---- पार्वति ॥ पश्चाद्देविमहामायावीजंचात्मनेनि
योजयेत् ॥ शिववीजंसमुद्धृत्यशक्तिवीजंतदन्तरं ॥ तदधःकामवीजन्तुऊर्ध्वव्योमानिलसंयुतं ॥ च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुर्थस्वरसंयुक्तमर्द्धेन्दुविन्दुभूषितं॥ प्रथमं कामराजस्य कूटं त्रैलोक्यपूजितं॥ मधुकूटं प्रवक्ष्या
मि कामराजस्य मध्यगं अतिगुह्यतरं देवि स्नेहाद्वक्ष्यामि केवलं॥ वियद्वह्नियुतं देवि मादनं तद
नन्तरं॥ तदधो हंसवीजं तु इन्दुवीजं समुद्धरेत्॥ विद्युल्लोपदं वह्नियुतं मायावीजं समुद्धरेत्॥ मध्य
कूटमिदं देवि प्रोक्तं महासौभाग्यदायकं॥ तृतीयं तत्प्रवक्ष्यामि शृणु देवि सुदुर्लभं॥ कामवीजं महेशानि शि
ववीजं ततः परं॥ तदधो वायुवीजं तु इन्दुवीजं नियोजयेत्॥ वियद्वह्निसमायुक्तं चतुर्थस्वरभूषि
तं॥ अर्द्धेन्दुविन्दुसंयुक्तं चतुर्थकूटमुत्तमं॥ शक्तिकूटं प्रवक्ष्यामि शृणु देवि सुदुर्लभं॥ यज्ज्ञात्वा
साधकाः सर्वे लभन्ते मुक्तिमुत्तमां॥ प्राणवीजं समुद्धृत्य कामवीजं समुद्धरेत्॥ इन्दुवीजं तथा देवि
क्रमेणात्र नियोजयेत्॥ सान्तं वह्निसमायुक्तं चतुर्थस्वरसंयुतं॥ नादविन्दुकलायुक्तं शक्तिकूटं स
मुद्धरेत्॥ फलं त्वस्या विद्यायाः साधनं त्ववरानने॥ कथितव्यं महादेवि संक्षेपात् कथ्यतेऽधुना॥ स
सा विद्या महाविद्या गुह्याद्गुह्यतमा प्रिये॥ भोगदा मोक्षदा चैव सर्वकामार्थसिद्धिदा॥ वाग्

गन्ध
९

भवं प्रथमं कूटं ह्रां क्लिं कूटत्रयपश्चिमं ॥ मध्यकूटत्रयं देवि कामबीजं मनोहरं ॥ कामबीजं प्रवक्ष्यामि
कूटभेदेन तत्त्वतः ॥ ज्ञात्वा तत् साधयेद्देवि असाध्यमपि भूतले ॥ सौभाग्यं प्रथमं कूटं महासौभा
ग्यदायकं ॥ त्रिकूटं मेककूटेन कामबीजं महत्परं ॥ एवं कूटत्रये योगे वर्त्तित्वा सौभाग्यसुन्दरी ॥ ए
कत्रपञ्चकूटेन नित्यं कूटत्रयान्विता ॥ दुर्लभा सर्वलोकेषु महासौभाग्यसुन्दरी ॥ एतस्या एव
विद्याया मध्यकूटस्य मध्यमं तत्त्वानन्दमयो भूत्वा सर्वकाममुपालभेत् ॥ इयं स्वभावतीनाम्नी विद्या
त्रैलोक्यविश्रुता ॥ आकर्षणकरी विद्या जगदाह्लादकारिणी ॥ साधनं तत्र प्रवक्ष्यामि यस्मादाकर्षणं
भवेत् ॥ स्वर्गे मर्त्ये च पाताले नारीणां पुरुषस्य च ॥ नार्यो वश्या विशेषेण वशं याति जगत्त्रयं ॥ भोग तंत्र
दा मोक्षदा चैषा विद्या गन्धर्वसेविता ॥ महाभोगवती विद्या महदैश्वर्यदायिनी ॥ तथा मधुमती सि ९
द्धिर्जायतेऽस्याः प्रसादतः ॥ दूरश्रवलघुत्वञ्च दर्शनादर्शनं तथा ॥ प्रवेशं परकायस्य कामरूपो भ
वेद्ध्रुवम् ॥ पुंसां रूपं स्त्रियो रूपं यद्वान्यद्रूपमुत्तमम् ॥ सर्वं तत्परमं रूपं तस्या एव न संशयः ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कान्तिः पुष्टिस्तथा तुष्टिः श्रद्धा लज्जा दया घृणा ॥ धृतिः शान्तिस्तथा ऋद्धिः सिद्धिर्बुद्धिर्मतिः क्षमा ॥
महामाया महाबुद्धिर्महाविद्या महोदया ॥ महामहत्करी विद्या ब्रह्मविद्यैव केवला ॥ महाश्मादि
नेनक्तं श्मशाने यदि साधकः ॥ सहस्रैकप्रमाणेन किं न सिध्यति भूतले ॥ यो जपेत् पञ्चमीं विद्यां परां
त्रैलोक्यमानकाम् ॥ स नरो देवदेवेशो महादेव इवापरः ॥ स योगान्मालभते मुक्तिं नानाभोगेन केव
लम् ॥ भुनक्ति बहुलान् भोगान् रमान्नानाविधानपि ॥ षङ्— — — यक्षरं लोके भुनक्ति बहुसंख्
खम् ॥ भूम्यागारे विहारे च चिन्तयेन्नो जपेत् पराम् ॥ आकर्षणं भवेत्तस्य सर्वकामं ततो लभेत् ॥ प्र
थमानन्दहृदयो द्वितीयमुपभोगवान् ॥ तृतीयमुपभोगेन चतुर्थमपि कामयेत् ॥ पञ्चमं पुण्य
मन्त्रसिद्धिकरं परम् ॥ पञ्चमन्त्रविशेषेण भोगयेत् कामयेत् सदा ॥ पञ्चमाभ्यसनाक्षीरैः पूजा
या लभते फलम् ॥ कुरङ्गनाभुवैर्द्रव्यैः स्वयम्भुकुसुमेन च ॥ रोचनाकुङ्कुमाभ्यां च जपमालां प्रले
पयेत् ॥ कर्पूरागुरुकस्तूरीरोचनाकुङ्कुमेन च ॥ जपमालामुपस्कृत्य प्रतिष्ठाविधिवच्चरेत् ॥ तद्

CC-0. In Public Domain. Digitization by eGangotri

यैरक्षतामृत्युघ्नान् संभाव्य च पुनः पुनः ॥ वारिणा शोधितं कृत्वा सिन्दूरे निक्षिपेत्ततः ॥ पटे चित्रमये
शुभ्रे नक्तं यः पूजयेन्नरः ॥ जप्त्वा विद्यां स्वमालायां सर्वकामस्वरूपालभेत् ॥ आनीय कन्यकां दिव्यां प्रमदां
यौवनोन्नताम् ॥ उक्षितां मूलमन्त्रेण सुशीलां चारुहासिनीम् ॥ सर्वदानन्दहृदयां शृङ्गालङ्कारविव
र्जिताम् ॥ गुरुभक्तां सुवेशाञ्च देवतापूजनेरताम् ॥ तस्य गात्रे न्यसेन्मन्त्री पञ्चकामान् परानपि
पञ्चभूतं न्यसेन्मन्त्री पश्चात्तस्मात्तत्वांन्यसेत् ॥ दिव्यमालां समादाय साधको विजितेन्द्रयः ॥ सहस्रैक
प्रमाणेन जपेत् स्वप्नावतीं ततः ॥ अनेनैव विधानेन भवेदाकर्षणं महत् ॥ तस्याश्च मदनागारे पूज
येत् परमेश्वरीम् ॥ सर्वसंक्षोभणीं मुद्रां बद्ध्वा योनिं प्रचालयेत् ॥ कामेश्वरीस्वरूपां तां चिन्तयेत् सा
धकोत्तमः ॥ कामेश्वरस्वरूपञ्च आत्मानञ्चापि भावयन् ॥ स्वयमक्षोभितो भूत्वा साधकः पञ्चमच
रेत् ॥ तस्याः पुष्पं स्वयं यावद्दक्षिणीयं प्रयत्नतः ॥ ताम्बूलगन्धपुष्पैश्च प्रत्यहं पूजयेच्च तां ॥ नानार
सान्नपानेन तृप्तिमाचरयेत्ततः ॥ वस्त्रालङ्कारभूषाद्यैस्तस्याः सन्तोषमानयेत् ॥ यथाकालेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

थापुष्पं स्वयंजनन्तगोप्यस्तु पतेत्॥ गृहीत्वा तु प्रयत्नेन स्वयम्भुकुसुमं हितम्॥ स्वयम्भूकुसु
मं दिव्यं त्रैलोक्येष्वपि दुर्लभम्॥ प्राप्नोति साधकश्रेष्ठो दुर्लभं साधयन्भुवि॥ स्वयम्भूपु
ष्पयोगेन साक्षात्तेन सदाश्रयेत्॥ विद्यासप्राचतीजप्तासिप्रमाकर्षणं भवेत्॥ देवतास्य
गुरुनागादानवाराक्षसाश्रये॥ राजानश्च स्त्रियः सर्वा निम्पं वश्या भवंति हि॥ स्वयम्भूकुसु
मैः पूजां प्रत्यहं यः समाचरेत्॥ जप्त्वा वै विद्यामालायां सर्वकाममसुखालभेत्॥ पार्वत्युवाच
पुराप्येकादशी विद्या भवता कथिता मयि॥ नाराधिता मया यस्मात्तस्मात्सम्प्रवदागता॥ सा
तत्सारभवां विद्यां श्रोतुमिच्छामि साम्प्रतम्॥ ईश्वर उवाच॥ एकादशाक्षरी विद्या भैरव्याः क
थिता पुरा॥ इदानीं तव प्रीत्यर्थं कथयामि तथा पराम्॥ मादनःशोत्रमिच्छात्मोरकमारार्द्ध
चन्द्रवान्॥ नादबिन्दुसमायुक्तो वाग्भवः परमेश्वरि॥ वृत्ताचरागनः श्रोत्रोनकुलीशोऽन
लः शशी॥ मायाबिन्दुसमानादेन कामबीजं समुद्धरेत्॥ शक्तिमादनशशाङ्कश्च हरो वह्नीसुमाय

गन्ध
११

या ॥ कलानादसमाक्रान्तः कथितः कामदो मनुः ॥ यस्मै कस्मै न दातव्यो वाग्भवाय च पार्वति ॥ सन्तु
ष्टिमध्यदात योऽस्य स्वपुत्राय धीमते ॥ ॥ इति गन्धर्वतन्त्रे तृतीयः पटलः ॥ ॥ पा
र्वत्युवाच ॥ देवदेव महादेव लोकानां हितकारक ॥ यत्त्वया चिन्तितं नाथ किमर्थं न प्रकाशितम्
राजराजेश्वरीदेव्यास्त्रिपुरायाः शुभावहम् ॥ कवचं यदि मे प्रीत कथयस्व वृषध्वज ॥ ईश्वर उवा
च ॥ लक्षवारसहस्राणि वारितासि पुनः पुनः ॥ स्त्रीस्वभावान्महादेवि पुनस्त्वं परिपृच्छसि ॥ अत्य
न्तं दुर्लभं गुह्यं कवचं सर्वकामदम् ॥ तथापि कथयिष्यामि तव प्रीत्या वरानने ॥ त्रैलोक्यमोहनं
नाम त्रिषु लोकेषु दुर्लभम् ॥ सर्वसौभाग्यजननं भोगमोक्षफलप्रदम् ॥ यद्धृत्वा दानवान्
विष्णुः निजघान सुदारुणान् ॥ लोकान् वितनुते ब्रह्मा संहर्त्ता रुद्र तत्प्रिये ॥ धनाधिपः कुबेरोऽपि
यतः सर्वे दिगीश्वराः ॥ नैतत् परतरं गुह्यं प्रतिजानीहि पार्वति ॥ वेदशास्त्रपुराणेषु सारमेतद्व
रानने ॥ पुत्रदारादिसहितं शिवो देयं कथञ्चन ॥ न देयं कवचं गुह्यं प्राणैः कण्ठगतैरपि ॥ शृणु

तंत्र
११

सर्वाङ्गसुभगो दिव्यं कवचमुत्तमम् ॥ राजराजेश्वरीदेव्याः कवचस्य ऋषिः शिवः ॥ छन्दो विराड्
देवता च महात्रिपुरासुन्दरी ॥ हंसः शक्तिः परा बीजं रमाबीजञ्च कीलकम् ॥ धर्मार्थकाममोक्षे
षु विनियोगः प्रकीर्तितः ॥ त्रिपुरा त्रिविधा पातु मम सर्वार्थसिद्धये ॥ ऐं क्लीं सौः वदने बाला पातु
सर्वार्थसिद्धिदा ॥ हसैं हसकलरीः हसैं कण्ठे पातु मम देवी श्रीमत्त्रिपुरभैरवी ॥ हृदये श्यामा
हे ज्ञानी महात्रिपुरसुन्दरी ॥ राजराजेश्वरी विद्या षोडशी या महोदया ॥ ब्रह्मरन्ध्रं सदा पातु कम
ला परमेश्वरी ॥ गिरिराजसुता देवी पातु नित्यं स्वशीर्षके कामबीजं ललाटेऽव्याद्वाग्बीजं कण्ठदे
शके ॥ सौः पातु तथा पार्श्वे प्रणवो वा ऊरुमूलके ॥ शम्भुप्रिया सदा पातु बाहू दक्षिणसव्ययोः ॥ विष्णु
प्रिया सदा पातु मणिबन्धद्वये तथा ॥ पार्वती शङ्करे पातु नेत्रे त्र्यम्बकवल्लभा ॥ श्रोत्रे रतिप्रियः पातु
घ्राणे शम्भुः सदावतु पृष्ठदेशे सदा पातु पार्वती परमेश्वरी ॥ हसौः श्वासे च निःश्वासे याता परम
सिद्धिदे ॥ कामकामे सदा पातु पिनाकी लिङ्गगोचरे ॥ पृथ्वी सर्वाङ्गके पातु ह्लीं रेखा हृदयेऽवतु

स्तनौ विष्णुप्रिया पातु स्कौ च सस्तूरानकं ॥ नेत्रे वज्रधरः पातु माया वै जठरेऽवतु ॥ पदद्वन्द्वे च सोः पा
तु ऐं जिह्वा निलयेऽवतु ॥ ह्रीङ्कारः सर्वदा पातु दन्तोष्ठयोर्वरानने ॥ शीर्षादिपादपर्यन्तं सर्वाङ्गं
भुवनेश्वरी रक्षाहीनं स्वयं स्थानं वर्जितं कवचेन तु ॥ नत सर्वं परमेशानि पातिनित्यं हरिप्रिया ॥
आधारे वाग्भवं पातु कामराजो हृदि प्रिये ॥ शक्तिकूटं तथा पातु भ्रुवोर्मध्ये च पार्वति ॥ श्रीर्येक्लृ तन्त्र
यं पातु ललाटे सर्वमन्त्रकः ॥ अष्टाविंशतिवर्णाय सुरत हन्ने सदावतु षोडशी यं महाविद्या ब्रह्मविद्ये
व केवला ॥ भोगमोक्षप्रदा देवी केवला मम रूपिणी कामेश्वरी ललाटेऽव्यात् सुषुम्णा भगमालिनी द
क्षनेत्रे सदा पातु नित्यं क्षिप्रा महोदया ॥ भेरुण्डा वामनेत्रेऽव्यात् कर्णौ वै वह्निवासिनी ॥ महावि
द्येश्वरी पातु वामकर्णप्रदेशके ॥ दक्षनासापुटे पातु शिवदूती समेश्वरी ॥ वामनासापुटे पातु त्वरि
ता सर्वसिद्धिदा दक्षगण्डे सदा पातु नित्यं मां कुलसुन्दरी ॥ त्रैलोक्यविमला पातु वामगण्डप्रदेशके
ओष्ठे नीलपताकाख्या दधरे विजयावतु ॥ ऊर्ध्वदन्ते सदा पातु देवी मां सर्वमङ्गला ॥ अधोमन्त्रे प्रदेशे

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ऽव्यान्नित्यं ज्वालांशुमालिनी ॥ विचित्रा सर्वदा पातु नित्यमूर्ध्वे निपावीति आसां प्रधानभूता या
महात्रिपुरसुन्दरी षोडशी सा सदा पातु सुरवैर्वे परमेश्वरी ॥ पृष्ठदेशे सदा पातु गुरवन्द्विति
धाष्वते ॥ पादयोः सर्वदा पातु त्रिपुरा परमेश्वरी ॥ जानुदेशे सदा पातु देवी मां त्रिपुरेश्वरी ॥ उरू
हृदये सदा पातु देवी त्रिपुरसुन्दरी ॥ त्रिपुरवासिनी देवी कटिदेशे समावतु ॥ त्रिपुराश्रीश्च मां नि
त्यं गुह्यदेशे सदावतु ॥ मूलाधारे सदा पातु देवी त्रिपुरमालिनी ॥ नाभौ त्रिपुरसिद्धा व्यात्त्रिपुरा
च सदा हृदि ॥ ब्रह्मरन्ध्रे सदा पातु महात्रिपुरसुन्दरी ॥ आसां तु मन्त्रबीजानि प्रोक्तस्थानेषु विन्य
सेत् ॥ पाथराजु गगनमध्ये तु वुद्धेमां परिरक्षतु ॥ ब्रह्माव्यात् तु ब्रह्म सङ्घाते शिवो मां योगसिद्धये ॥
ज्ञाने मां भास्करः पातु मोक्षे नारायणः प्रभुः ॥ या शक्तिः सर्वभूतानां विद्याविद्येति गीयते ॥ साश
क्तिः सर्वदा पातु स्त्री पुत्र धन सम्पदि ॥ अणिमा पश्चिमे पातु लघिमा चोत्तरेऽवतु ॥ पूर्वतः पातु म
हिमा ईशित्वा दक्षिणेऽवतु ॥ वशित्वा वायुनित्ये च ऋ शाण्यकाम्य सिद्धिदा ॥ भुक्ति सिद्धिस्तथा पे

CC-0. In Public Domain. Digitization by eGangotri

रेयां नित्यक्लिन्ना त्रिपुरा राक्षसे॥ अश्वः पातु प्राप्तिसिद्धिर्मां क्षमिक्षितयोईके॥ ब्रह्मामणीसन्ध्ययोः
पातु माहेश्वरी दिवावतु॥ मध्याह्ने पातु कौमारी रात्रौ च शक्रवल्लभा मात्राले मुकुर्ण्णे पातु वेलवी
सर्वसिद्धिदा॥ निशीथे पातु वाराही चामुण्डा शक्रविग्रहे॥ महोत्पाते महानक्ष्माः पातु नित्यं म
हेश्वरी॥ शीर्षे संक्षोभिणी पातु मारिणी हृदयेऽवतु॥ आकर्षणी शिखायां तु कवचे पातु वश्यदा
उन्मादिनी तथा नेत्रे सर्वगात्रे महाङ्कुशा॥ त्रिखण्डा भुजयोः पातु बीजे वीजश्वरूपिणी॥ खेच
रीपादयोः पातु योनिमुद्रा च सर्वतः॥ कामाकर्षणरूपाव्यान्तु सदाकर्षणकर्मणि॥ बुध्याकर्षण
रूपाव्यात् परबुद्धिविकर्षिणी॥ अहङ्कारे सदा पातु अहङ्कारविकर्षिणी॥ शब्दाकर्षणरूपाव्याच्छ
ब्दाकर्षणकर्मणि॥ स्पर्शाकर्षणरूपा मां पातु स्पर्शनकर्मणि॥ रूपाकर्षणरूपाव्यात् पररू
पविकर्षिणी॥ रसाकर्षणरूपाव्याद्रसे वै परमेश्वरी॥ गन्धाकर्षणरूपा मां पातु गन्धेषु सर्वदा
चित्ताकर्षणरूपा मां पायात् सूक्ष्मकर्मणि॥ धैर्याकर्षणरूपा तु पातु धैर्यविधौ सदा॥ स्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्याकर्षणारूपाव्याज्ज्ञानाकर्षणकर्म्मणि ॥ नामाकर्षणरूपाव्यान्नाम व्याहरणे सदा ॥ बी
जाकर्षणारूपा मां सर्व्व बीजप्ररोपणे ॥ परजीवाकर्षणी पातु आत्माकर्षणरूपिणी ॥ अमृ
ताकर्षिणी पातु अमृतीकरणे सदा ॥ शरीराकर्षणी पातु सद्यः शरीररक्षणे ॥ अनङ्गकुसु
मा पातु पुरतः सर्व्वकर्म्मणि ॥ अनङ्गमेखला पातु पृष्ठतः परमेश्वरी ॥ अनङ्गमदना पातु
वामतो मे महेश्वरी ॥ दक्षिणे सर्व्वदा पातु अनङ्गमदनातुरा ॥ नित्यञ्चानङ्गरेखाव्या ईन्द्रे
मम सदा प्रिये ॥ अनङ्गवेगिनी पातु अधो मे परमेश्वरी ॥ तथानङ्गाङ्कुशा नित्यं पातु मां दि
क्षु सर्व्वदा ॥ अनङ्गमालिनी पातु विदिक्षु मम सर्व्वदा ॥ सर्व्वसंक्षोभणी चोर्द्ध्वे पातु मां जगदी
श्वरी ॥ सर्व्वविद्राविणी चाधो दिक्षु सर्व्वाकर्षिणी ॥ सर्व्वाह्लादकरी शान्ति विदिक्षु परिरक्ष
तु ॥ सर्व्वसंमोहिनी पातु मां नित्यं आकाशे सर्व्वजम्भणी समन्तात्तु परमेश्वरी ॥ अन्तरीक्षे
मां पातु सर्व्वस्तम्भनकर्म्मणि ॥ तथैव पातु मां नित्यं आकाशे सर्व्वजृम्भणी ॥ पाताले चैव मां पा

CC-0. In Public Domain. Digitization by eGangotri

तुसर्ववश्यकरी नया॥ देवलोके सदा पातु सर्वरञ्जनकारिणी॥ सर्वोन्मादनशक्तिर्नो भूतले
परिरक्षतु॥ सर्वार्थसाधनी शक्तिः पायाद्भुतगणालये सिद्धनामालये पातु सर्वसम्पत्तिपूर
णी॥ राक्षसानां च यक्षाणां सर्वमन्त्रमयी गृहे॥ असुराणां निवासे तु सर्वद्वन्द्वक्षयङ्करी॥ स
र्वसिद्धिप्रदा देवी पातु राजगृहे सदा॥ सर्वसम्पत्प्रदा पातु स्वगृहे सर्वसम्पदि॥ सर्वप्रिय
ङ्करी पातु सर्वलोके च सर्वदा॥ सर्वमङ्गलकार्येऽव्यात् सर्वमङ्गलकारिणी॥ सर्वकामप्रदा
देवि सर्वकार्येषु सर्वदा॥ ऐश्वर्ये सर्वदा पातु सर्वैश्वर्यप्रदायिनी॥ सर्वमृत्युप्रशमनी पा
यान्नित्यं यमालये॥ सर्वरत्ने सदा पातु सर्वविघ्नविनाशिनी॥ देहसौन्दर्यकाले तु पातु सर्वा
ङ्गसुन्दरी॥ सर्वसौभाग्यकाले तु सर्वसौभाग्यदायिनी॥ सर्वज्ञा च गृहे पातु सर्वशक्तिमयी रणे
सर्वैश्वर्यप्रदा मार्गे सर्वज्ञानमयी जले॥ सर्वव्याधिषु सर्वत्र सर्वव्याधिविनाशिनी पर्वतेषु पा
तु प्रबला सर्वाधारस्वरूपिणी॥ सर्वपापहरा पातु सर्वकर्मसु सर्वदा॥ सर्वानन्दकरी देवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नानायुद्धकृतेगोचरे॥ सर्ववैरीभयेपातु सर्वरक्षास्वरूपिणी॥ सर्वसङ्कल्पकार्येषु सर्वेप्सितफलप्र
दा॥ वशिनीवश्यकार्येष्व्यात् कामेशीस्तम्भनेवतु॥ मेहने मोहिनीपातु विमलोच्चाटनेऽवतु॥ अरु
णापातु मां वामे जयिनी जल्पकेर्मणि॥ सर्वेश्वरी कामकार्ये कौलिनीभेदकर्मणि॥ जृम्भणी सर्वदा
यातु मारणः पञ्चमहेश्वरि॥ धनुर्मोहविधौ पातु पाशाङ्कुशवशकर्मणि॥ महातेजोमयः पातु स्तम्भने मां
तथाङ्कुशः॥ सर्वज्ञा हृदये पातु नित्यक्लत्या च शीर्षके॥ अनादिवाग्भिका पातु नित्यं शिरःप्रदेशके॥ क
वचे मां रक्तनेत्रा व्यान्नेत्रे नित्यमलुप्तिका॥ अचिन्त्यशक्तिवक्त्रेषु पायात् परमसिद्धिदा॥ कामेश्वरी रतौ पा
तु युद्धे वज्रेश्वरी तथा॥ नित्यं पातु महेशानि श्रीकामे भगमालिनी॥ रसरूपे च गन्धे च शब्दस्पर्शे च पा
तु मां॥ सर्वानन्दमयी देवी महात्रिपुरसुन्दरी॥ ईशाने वृक्षः पातु आग्नेय्यां योगिनीगणा॥ त्वगसृङ्-
मांसमेदोऽस्थिमज्जाशुक्राणि पान्तु नः॥ क्षेत्रेशो नैरृत्य पातु गणेशो वायुमन्दिरे॥ मातङ्गवनिता पातु
शेषिकाकुलसुन्दरी॥ शक्तिर्मां सर्वदा पातु मूलाधारनिवासिनी॥ इतीदं कवचं देवि त्रिषु लोकेषु दुर्लभ

CC-0. In Public Domain. Digitization by eGangotri

गंध
१५

शक्तिं मां सर्वदा पातु मूलाधारनिवासिनी ॥ इतीदं कवचं देवि त्रिषु लोकेषु दुर्लभं ॥ यन्नोक्तं डामरे तन्त्रे य
न्नोक्तं रुद्रयामले ॥ सर्वतन्त्रेषु यन्नोक्तं गान्धर्वे प्रकटीकृतं भवप्रीत्या महादेवि गोपनीयं प्रयत्नतः ॥ तव
नाम्नि स्मरणे देवि सर्वयज्ञफलं लभेत् ॥ सर्वत्रैव जयप्राप्तिर्मन्त्रः सर्वत्र सिध्यति ॥ नाम्नः शतगुणं स्तो
त्रं व्याख्यानं चापि तत्स्तुतं ॥ तस्माच्छतगुणं ध्यानं ध्यानाच्छतगुणो मनुः ॥ मन्त्राच्छतगुणं देवि कवचं ते
मयोदितं ॥ यस्मै कस्मै न दातव्यं सुगोप्यमतिदुर्लभं ॥ न देयं परशिष्याय कृतघ्नाय सुरेश्वरि ॥ शिष्या
य भक्तिहीनाय लुब्धकाय तथैव च ॥ गुरुभक्तिविहीनाय परहिंसारताय च ॥ निन्दकाय कुशीलाय
दाम्भिकाय महेश्वरि ॥ अभक्तेभ्योऽपि सुश्रेभ्यो दत्वा मृत्युमवाप्नुयात् ॥ यो दत्वाति निषिद्धेभ्यः कवचः
मन्त्रयात्रातं ॥ तस्य नश्यन्ति देवेशि विद्यायुः कीर्तिसम्पदः ॥ न हिंसन्ति च योगिन्यो मदीयत्रासनात्
प्रिये ॥ परेन रक्षमात्रेति जन्मकोटिशतानि च ॥ सर्वलक्षणयुक्ताय मन्त्रयन्त्ररताय च ॥ शिष्याय ज्ञानं
चित्ताय गुरुभक्तिरताय च ॥ उदके लवणं लीनं यथा भवति पार्वति मनो भवति वै लीनं पादयोः श्रीगुरो

रामः
१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रिये ॥ तदाश्चर्यं महद्गुह्यं कृपया चातिदुर्लभं ॥ गुरोःपादप्रसादेन श्रीविद्यायाद लभ्यते ॥ तथैव कवचं दे
वि त्रिषु लोकेषु दुर्लभः ॥ सर्वदेवो हरः साक्षात् तत्पत्नी परमेश्वरी ॥ प्रमादादपि देवेशि श्रीगुरो नाम नाद
देत् ॥ यस्य भक्तिर्गुरौ नित्यं वर्त्तते देव न तु प्रिये ॥ तस्य मन्त्रस्य यन्त्रस्य सिद्धिर्भवति नान्यथा ॥ कवचस्य तथा
सिद्धिर्दुर्लभा यस्य सुन्दरि ॥ इदं कवचमज्ञात्वा यो जपेत् सुन्दरीं परां ॥ नवलक्षप्रजप्तापि तस्य विद्या न
सिध्यति ॥ शुचिः समाहितो भूत्वा भक्तिश्रद्धासमन्वितः ॥ सर्वभूतलयाः शुभ्रे निशायामर्द्धरात्रके ॥ हेतुयुक्तो
महेशानि निर्जने पशुवर्जिते ॥ रक्तासनोपविष्टस्तु रक्ताभरणभूषितः ॥ ताम्बूलपूरितमुखो धूपामो
दसुगन्धितः ॥ संस्थाप्य वामभागे तु शक्तिं स्वामिपरायणां ॥ रक्तवस्त्रपरीधानां शिवमन्त्रधरां शुभां ॥ या श
क्तिः सा महादेवी हररूपस्तु साधकः ॥ अन्योन्यचिन्तनादेव विदेहत्वमुपजायते ॥ शक्तियुक्तो यजेद्देवीं श्रीच
क्रे लक्षणान्विते ॥ पुष्पाञ्जलित्रयं दद्यान्मूलमन्त्रेण दापयेत् ॥ भोगैश्च मधुपर्काद्यैर्गन्धाद्यैः सुवासितैः
पूजयित्वा महादेवीं पूजाकोटिफलं लभेत् ॥ पूर्वोक्तस्यासमेवास्मिन् समये च प्रविन्यसेत् ॥ आत्मानं परमं

CC-0. In Public Domain. Digitization by eGangotri

ध्यायेद्दिव्यस्त्रीभिरलंकृतं॥ दिव्यमूर्त्तिमरुच्छत्रं सहस्रदलनिर्म्मितं॥ सुधावर्षिमुखाम्भोजं सस्मितं
दिव्यवस्त्रकं॥ परमानन्दसन्दोहमुदितं परमव्ययं॥ दिव्यालङ्कारवस्त्राढ्यं दिव्यमाल्यानुलेपितं॥ दि
व्यासनसमासीनं दिव्यभोगविभोगिनं॥ सद्भूतं सर्वभूतेशं सृष्टिस्थित्यन्तकारिणं॥ निर्लेपं निर्म्म
लं शान्तं सर्वव्यापिनमीश्वरं॥ ततो देवीं हृदम्भोजे ध्यायेत्तद्गतमानसः॥ ध्यायेत्तद्गतमानसः॥ जवा
कुसुमसङ्काशां बालार्ककरुणारुणां॥ रक्तपद्मसमासीनां रक्ताभरणभूषितां॥ रक्तवस्त्रपरीधानां
पूर्णचन्द्रनिभाननां॥ सेवाहमित्यभेदेन तेन ते हीनविविक्तयेत्॥ अद्वैतानन्दभावेन साधकः परमात्मन
छायया शोणाया व्याप्तं जगदेतच्चराचरं॥ भावनावशान्मन्त्री भावये ज्ञावतत्परां॥ एवं विज्ञापरं स्याच्छुचि
ष्टयोष्टो भवति हि॥ संप्राप्य विपुलान् भोगान् राज्यां सप्तद्वीपभूतले॥ ऐन्द्रं पदं समासाद्य विहरन्नन्दने वने
उर्वशीप्रमुखाभिश्च सेव्याद्दिव्यभोगदान॥ तदा घोसिपरं स्थानं दुरापं त्रिदशैरपि॥ नाम्ना तु कवचं दिव्यं पठे
देकमनाः प्रिये॥ तस्य सर्वार्थसिद्धिः स्यान्नात्र कार्या विचारणा॥ इदं रहस्यं परमं परस्वस्त्यायनं महत्॥ सर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णां मेव हिंस्राणां डाकिनीनां महेश्वरि ॥ निशाचरगणानाञ्च वारणानां तथा ॥ आयुर्बलप्रदं
नित्यं तु धिं पुष्टिशुभावहं ॥ नारीणांमृतवत्सानां गुणावत्सुतदायकं ॥ सन्त्याज्यतिग्रहस्यापि बालग्रह
निवारणं ॥ विषदस्युग्रहणाञ्च सर्पाज्ञानिविवर्द्धनं ॥ विषशस्त्राग्निरुजराणां वा राजपथं युधि ॥ ज
लेस्थले तथा काले सर्वोत्पातेषु सर्वदा ॥ त्रैलोक्यवासिनामेव सर्वमङ्गलदायकं ॥ सकृद्यस्तु पठे
द्विविक्कवचं देवदुर्लभं ॥ हयमेधफलं तस्य भवत्येव न संशयः ॥ नित्यं यस्तु पठेद्देवि श्रद्धया सुसमा
हितः ॥ स सर्वान्लभते कामान्परे देवी पुरं व्रजेत् ॥ संग्रामे च जयेच्छत्रुन्मातङ्गानिव केशरी ॥ देहन्तु
णां यथा वह्निस्तथा शत्रुन्जयेत्सदा ॥ नास्त्राणि तस्य शस्त्राणि शरीरे प्रभवन्ति च ॥ तद्गात्रं प्राप्य शा
स्त्राणि त्रस्तानानि च यानि च ॥ माल्यानि कुसुमानीव सुखदानि भवन्ति हि ॥ पराः परास्सुखायान्ति विनायु
द्धेन पार्वति ॥ व्याधिस्तस्य कदाचित्तु दुःखं नास्ति कदाचन ॥ गतिस्तस्यैव सर्वत्र वायोस्तुल्या सदा भवेत्
दीर्घायुः कामभोगी स धनधान्यसमृद्धिमान् ॥ जितव्याधी रूपवान्स्याद्गुणवानभिजायते ॥ चातुर्वर्ग्यक

राम
७

तेनस्य भवत्येव न संशयः ॥ अन्यस्य वल्लभः सोऽपि पुत्रदारकुलान्वितः ॥ इह लोके सुखं भुक्त्वा परे मुक्तो भ-
विष्यति ॥ न तस्य दुर्गतिः कापि कदाचिदपि जायते ॥ दुर्ग्रहाः सुग्रहा वापि वशं गच्छन्ति मानवाः ॥ न तस्य विघ्नो
भवति न शोको भूविजायते ॥ वेतालाश्च पिशाचाश्च राक्षसाश्च भयानकाः ॥ ते सर्वे विलयं यान्ति कवचस्या-
स्य कीर्तनात् ॥ तस्यैव शत्रवो देवि विविनामात्रप्रयोगतः ॥ विनश्यन्ति न सन्देहो योगिन्यो भक्षयन्ति
तान् ॥ शाकिन्यादीनि कर्माणि मारणोच्चाटनानि च ॥ वचोमात्रेण देवेशि तस्य सिद्ध्यन्ति भूतले ॥ न पा-
पैर्लिप्यते देवि सहोपैस्तु सुदारुणैः ॥ न कालस्य वशं गच्छेन्न जरा न च दुःखिता ॥ न तद्देशे न दुर्भिक्षं न च
मारी प्रवर्तते ॥ न रोगास्तत्र जायन्ते नोत्पाताः प्रभवन्ति च ॥ विविधाश्चैव योगिन्यस्तस्य साधकसन्निधौ
शान्तिश्चैव प्रयच्छन्ति रक्ष्यन्ति पुत्रवत् सदा ॥ सर्वदा च सुखप्राप्तिः सर्वतीर्थफलं लभेत् ॥ नानेन स-
दृशः कश्चित् साधको भूविजायते ॥ सुरासुरमनुष्याणां तत्त्वरूपः सुरत्नवहः ॥ येनापि ज्ञानमात्रेण नश्यन्ते नै-
व वसुन्धरि ॥ अक्षयानन्तभन्तेकामान् मुक्तिज्ञानञ्च गच्छन्ति ॥ सर्वलक्षणहीनोऽपि स्मरणात्कलुषा-

राम:
७

पठः॥ अहो कवचमाहात्म्यं पठनात्स्यान्नित्यशः॥ किंवा पियोगचर्यैवा योगिनां समतां व्रजेत्॥ भूर्ज्जे
त्वचि समालिख्य चन्दनेन विनिर्म्मितं॥ मध्ये त्रिकोणं संलिख्य साध्यसाधकयोर्लिपिं॥ तद्बहिर्मूलमन्त्र
स्य मातृकार्णान्नवेष्टयेत्॥ अगुरुकुंकुमश्रेणा चन्दनेन सुगन्धिना॥ एतत् यन्त्रं महादेवि सुगन्धसुकु
मं॥ रोचनाकुंकुमेनैव तत्कृत्येकवचं लिखेत्॥ श्वेतसूत्रेण संवेष्ट्य लाक्षया परिव्यस्यत्॥ पञ्चामृते
पञ्चगव्यैः स्नापयित्वा शुभे ह्नि॥ संपूज्य देवीरूपेण तां गुटिकां सर्वकामदां॥ प्राणप्रतिष्ठामन्त्रेण प्राणानां
तत्र निवेशयेत्॥ चारुणा शंकुनेन मूर्षितां योनिमुद्रया॥ अन्तर्योनिं ततो ध्यात्वा तत्र संस्थापयेद्बुधः॥
एवां तु गुटिकां देवि कण्ठे लग्ना धनप्रदा॥ शीर्षे वश्यकरी देवि कट्यां स्तम्भनकारिणी॥ वक्षवामभुजे चै
षा वैरिपक्षविनाशिनी॥ जठरे रोगशमनी पुत्रदा हृदि संस्थिता॥ विद्याकीर्त्तिर्ललाटस्था शिरस्था या तु यशः
प्रदा॥ दक्षिणे बाहुमूले वै यदि तिष्ठति सर्वदा तदा सर्वार्थसिद्धिः स्यादृश्यमनसि वर्त्तते॥ सत्यं सत्यं पुनः
सत्यं सत्यं सत्यं पुनः पुनः॥ न शक्नोमि प्रभावं हि कथितं कवचस्य वै॥ एतत्तु कवचेनैव पठनं साधनं प्रिये

जम्ब
१८

कथितं मे तव स्नेहात् गोपनीयं सदा सुवि ॥ ॥ इति श्रीमात्स्यदतन्त्रे महात्रिपुरसुन्दरीत्रैलोक्यमाह-
नाख्यस्तृतीयपटलः ॥ पार्वत्युवाच ॥ विना यन्त्रेण चेत्पूजां देवता न प्रसीदति । तस्मात्कथय देवेश य-
न्त्रमस्या मनोहरं । यस्य दर्शनमात्रेण दारिद्र्यं नश्यति ध्रुवं ॥ ईश्वर उवाच ॥ सेवमालोच्य सर्गादौ सच्चि-
दानन्दरूपिणी । समस्ततत्वसंयोगात् स्वत्यधिष्ठानरूपिणी ॥ व्यक्तिकरोति निर्याव: प्रकृति: परमः
पुमान् । सा तत्वसंज्ञा चिन्मात्रा ज्योतिष: सन्निधेस्तथा । धिचिकीर्षुर्योनिमूर्ता क्वचिदभ्येति बिन्दुना ॥ अ-
ति व्यक्तापरा शक्तिरविनाभावलक्षणा । अथ स्फुपरिवच्छक्तिर्व्याप्ता चिद्रूपिणी विभूः ॥ समस्ततत्वभो-
घनविवर्तेस्तासमन्विता । प्रयाति विस्तुभावस्वक्रियाप्राधान्यलक्षणां ॥ वैरूवमातृचक्रस्य त्रिरूपत्वं पु-
नर्भवेत् ॥ बिन्दुः शिवात्मकस्तत्र बीजं शक्त्यात्मकं स्मृतं ॥ तयोर्योगे भवेन्नादस्तेभ्यो यन्त्रितयास्यहं ॥ त-
स्मान्नानिचचक्राणि तत्प्रकार: प्रकथ्यते ॥ ततः प्राङ्मुख: आसीनश्चक्रारंभं समारभेत् ॥ हेमरूप्यादि
ताम्राणां पट्टे वा निम मनोहरे चतुरस्रसमे शुद्धे: सध्योद्धृतविभूषिते ॥ युग्माङ्गुमिलितं देवि पट्टस्यैहस

राम:
१८

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मीरितं ॥ अथवापरमेशानि भूमौ चक्रं समालिखेत् ॥ हस्तधात्रमिते शुद्धे गोमयेनोपलेपिते ॥ सिन्दुररजसा तत्र कुङ्कुमेनाथवा प्रिये ॥ आलिख्यस्त्र करा जस्त्र लेखन्यां हे मया तथा ॥ अथवा कुशमूलेन दर्भपाणि समाहितः ॥ नेत्ररम्यं यथा चक्रं तथा कुर्याद्विचक्षणः ॥ प्रतीचाग्रं लिखेदेकं त्रिकोणं तदुपर्य्यथ ॥ पूर्वं त्रिकोणमध्याग्रं त्रिकोणान्तरमालिखेत् ॥ अथ सन्धिद्वयं भित्वा प्रागग्रं विलिखेत् परं ॥ त्रिकोणमध्यगं चक्रमष्टकोणं तथा भवेत् ॥ ततो दशारचक्रस्य निर्म्माणं शृणु पार्वति ॥ दक्षिणोत्तरगारेखा स्त्रिस्रोयास्तत्तास्वपि ॥ मध्येतेखां परित्यज्य रेखेद्वे परिवर्द्धयेत् ॥ तेन पञ्चकोणा कृत्वा सन्धिभेदेच्चतुष्टयं ॥ कृत्वा रेखाद्वयं कुर्याद्दशकोणं यथा भवेत् ॥ तथान्य दशकोणस्य निर्म्माणं परिकीर्त्यते ॥ दक्षिणोत्तरगास्त्वेवं रेखापञ्चभवन्नियाः ॥ तासां रेखाद्वयं मध्ये हित्वा पूर्वापरान्ततः ॥ बाह्यरेखाद्वयं देवि पूर्ववत् परिवर्द्धयेत् ॥ तेन पञ्चकोणकं कृत्वा सन्धिभेदचतुष्टयं ॥ कृत्वा रेखाद्वयं कुर्याद्दशकोणं यथा भवेत् ॥ चतुर्दशारचक्रस्य निर्म्माणं कथ्यतेऽधुना ॥ दक्षिणोत्तरगास्त्वेवं रेखाद्वयं मन्त्रीपूर्ववत् सन्नभवन्नियाः ॥ तासां रेखाद्वयं हित्वा

राम
१९

पूर्वापरान्ततः॥ वाय्ये रेखाद्वयं देवि पूर्ववत्परिवर्द्धयेत्॥ तेन षट्कोणकं कृत्वा सन्धिभेदचतुष्टयं॥
कृत्वा रेखाद्वयं कुर्याद्दशकोणं यथा भवेत्॥ चतुर्द्दशारचक्रस्य निर्म्माणं कथ्यतेऽधुना॥ दक्षिणोत्तर
गास्वं रेखास्सप्त भवन्ति याः॥ तासां रेखाद्वयं हित्वा वाह्ये पूर्वपरान्ततः॥ दीर्घं रेखाद्वयं मन्त्री पूर्ववत्॥
परिवर्द्धयेत्॥ तेन षट्कोणकं कृत्वा सन्धिभेदचतुष्टयं॥ दशारीकृत्य तेनैव सन्धिभेदचतुष्टयात्
रेखाद्वयं वहिः कुर्याद्रेखाः स्युर्नवमेव वै॥ कल्पयेदथ तस्याग्रे रायकोणचतुष्टयं॥ एवं चतुर्द्दशारं
स्याद्विलोचनमनोहरं॥ एवं निष्पादिते चक्रे यद्भवति च तच्छृणु॥ मध्ये त्रिकोणमेव स्यात्तन्मध्ये वि
न्दुरिष्यते॥ चतुर्णामपि चक्राणां वहिरग्रास्त्रिकोणकाः॥ त्रिचत्वारिंशन्मनुगुणिता योनयस्ते च शोभ रामः
ना॥ मतस्याद्द्वादशमध्यन्नाश्च तु कोणपञ्चोमिताः॥ त्रस्थयोऽष्टादशापि स्युस्तद्रूपयात्रस्थयोप १९
रे॥ चतुर्विंशतिसंख्याताः शोभनास्ते चतुष्टयाः॥ अष्टकोणाकगर्भन्तु चतुष्कोणाद्वयेन्नया॥ दक्षि
णोत्तरपूर्वासु दिक्षु सम्भवतिक्रमात्॥ दक्षिणोत्तरगान्नस्य नवोप्याम वर्त्तिहि॥ नवरेखासमथैवान्या

वह्निवायुदिगायताः ॥ तथैवैरावतस्थैवान्यानैऋतीशादिगायताः ॥ तत्र यपद्मे देवि सिद्धिसाध्यकामिमु
खाग्रकाः ॥ त्रिकोणाग्नेशाक्रयः स्युपद्म तन्नस्युमोदयाः ॥ पूर्वाग्रास्यो तु चत्वारो वह्नयन्तप्रकीर्तिताः ॥ ए
वं चक्रं विनिर्माय वा ह्य कृत्वं विलिख्य च ॥ तेनास्य दलपद्मस्य निर्म्माणं तत्त्व स्त्रियाः ॥ कृतेन षोडशा
दलं लिखेत्पद्मं मनोहरं ॥ कृत्वं चयन्तु तन्नार्थे चतुरस्रकं ॥ शिरः चंभूपुरं विक्रिन्न तुर्ह्योरपद्मोमिते
एवं भवन्ति चक्राणि विन्दुनैव नवक्रमात् ॥ कृत्तत्त्वयं महेशानि तत्पूजायां निगद्यते ॥ एवमेतत्स्वचक्रस्य
प्रभावो वर्णितं मया ॥ नशक्यते महेशानि कल्पकोटिशतैरपि ॥ एवमेतन्महाचक्रं महाश्रीत्रिपुरामयं
यत्नं शरीरमित्याहुर्मन्त्रं ज्ञानमयं स्मृतं ॥ शरीरं त्रिविधं प्राहुर्भौतिकं स्वमनोमयं ॥ परं ज्ञानमयं नि
त्यं च दानाशिनिरन्तरं सुखं भौतिकमित्याहुर्यन्त्रं विद्धि मनोहरं ॥ मन्त्रं कामनयं विद्धि एवं त्रिधा वपुर्भवेत्
सुखाशरीरमेकं हि अङ्गभूतं तथापरं ॥ योनिभूतामहामुद्रा शरीरमिति कीर्तितं ॥ तस्यारसमसमुत्पन्नाः
कामैश्वर्यादिकान्तथा ॥ त्रिभुवनं वरारोहे सर्वानन्दमयप्रिये ॥ सन्निवेश्यं महाचक्रं तत्तयंत्रलस्वरूपकं

CC-0. In Public Domain. Digitization by eGangotri

ततः परं शिवाङ्कस्थां महात्रिपुरसुन्दरीं ॥ समावाह्य यजेद्देवीं परयाथ सपर्यया ॥ अग्नीशासुरवाय-
व्यमध्ये दिक्षु च पार्वति ॥ षडङ्गयुवतीः पश्चात् पूजयित्वा विधानतः ॥ तन्मयी स्वार्थनित्याश्च यजेत्सौ-
भाग्यकामुकं ॥ महात्र्यस्रं स्मरेत्तत्र पञ्चदशकलात्मकं ॥ वामावर्त्तक्रमेणैव कलाः पञ्चदशाक्रमात्
अकाराद्याः सुकारान्तां दक्षिणस्थां विचिन्तयेत् ॥ ततश्च पूर्वरेखायां दीर्घकारादिपञ्चकं ॥ त्रिरेखम्भूसुं
विधिश्चतुष्कोपशोभितम् ॥ विचिन्त्या तद्रेखायां तत्र्यासीं परिचिन्तयेत् ॥ कामेश्वर्यादिका नित्यास्त-
थैव च प्रतिपूजयेत्प्रतिपत्तिथिमारभ्य पौर्णमास्यन्तु सद्विजे ॥ एकैकां पूजयेन्नित्यां तत्तत्तिथिक्रमेण
तु ॥ आद्यरेकैकवृद्ध्या तु यजेत् साधकसत्तमः ॥ कृष्णपक्षे महेशानि पूजयेत्तु विमण्डले ॥ विचिन्त्याद्यादे-
ह यावत्कामेश्वरी भवेत् ॥ पूजनीया विलोमेन तावन्नानथैव पार्वति ॥ उभयोः पक्षयोरन्ते यथोक्तध्यानयो-
गतः ॥ सर्गस्थां षोडशीं नित्यां महात्रिपुरसुन्दरीं ॥ ततः क्रियासु तथा ध्यानं मन्त्राणि पूजनानि तु ॥ होमान्य-
न्यानि सर्वाणि कामानि चैव तानि ते ॥ पटलपञ्चसंख्येन तु साध्यास्वध्यासं हे शिवे ॥ अथास्तृतिसुमानां शृणु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजां वरानने ॥ ईश्वर उवाच ॥ तत्र तत्र महेशानि समावाह्य विधानतः ॥ पूजयेत् साधको भक्तः ॥ प्रथमे कृत्य
सर्वात्मिका ॥ मूलाद्येनैव मन्त्राण्यां हंसेन प्रतिपदि तेन तु द्वितीयेन द्वितीयाश्च तृतीयेन तृतीयिकां ॥ चतुर्थेन च
तुर्थीञ्च पञ्चमेनैव पञ्चमीं षष्ठेन तु तथा षष्ठीं सप्तमेन तु सप्तमीं ॥ अष्टमेनाष्टमीञ्चैव नवमीं नवमेन त
दशमीं दशमेनैव एकादशीं तथैव हि ॥ एकादशाक्षरेणैव द्वादशीं द्वादशेन तु ॥ त्रयोदशीञ्च तथैव त्र
योदशाक्षरेण तु ॥ चतुर्दशाक्षरेणैव यजेत् तत्र चतुर्दशीं ॥ पञ्चदशाक्षरेणैव यजेत् पञ्चदशीं ततः ॥ स
मस्तेन तथा देवि षोडशीं परिपूजयेत् ॥ आदावन्ते च मध्ये च समपर्यायस्तु पार्वति ॥ महादेव्याः समाख्या
ता नित्यैव विलासागमे ॥ तामेव पूजयेच्चापि महात्रिपुरसुन्दरीं ॥ यन्त्रमस्याः समस्तं प्रयत्नं नित्या मण्डल
मीदृशं ॥ अथान्यत् संप्रवक्ष्यामि वाम्यं कामार्थसिद्धये ॥ यथोक्तां कुलजां शस्तां चारुलक्षणलक्षितां
स्वच्छां ऋतुमतीं पूर्णां योरनाड्यादितश्रेज्ञावाम् ॥ तत्राद्यदिवसे देवीं पूजयित्वा यथाविधि ॥ यजेत् का
मेश्वरीमाद्यां द्वितीयां द्वितीये तथा ॥ तृतीयेऽथ तृतीयाञ्च चतुर्थे च चतुर्थिकां ॥ पञ्चमे पञ्चमीञ्चैव षष्ठे

गन्ध षष्ठेन षाऽहनि ॥ सप्तमे सप्तमीञ्चैव अष्टमीमष्टमेऽहनि ॥ नवमे नवमीं देवीं दशमे दशमीं ततः ॥ ए
२१ कादशीं तथा रुद्रे द्वादशीं द्वादशेऽहनि ॥ त्रयोदशदिने देवीं त्रयोदशीं क्रमेण तु ॥ चतुर्दशीं तथा शक्रे प
ञ्चदशीं ततो यजेत् ॥ षोडशीं षोडशे पूर्णो यजेद्बुद्धिक्रमेण तु ॥ अन्याश्चैव यजेत्पश्चादपरं यत्प्रकी
र्त्तितं ॥ षोडशान्तु निशाः स्त्रीणां तासु क्रमान्नक्रमात्यजेत् यथाविधि क्रमेणैव नान्दीं न्यत्तिलस्तुयेत् ॥
नैव विसर्जयेत्तान्तु यावत्सा स्यात् फलार्थिनीं विधिदृष्टेव विसृज्यान्यां समाश्रयेत् निशाः षोडश संयु
ताः षोडश शक्तयस्तथा ॥ एकस्मिन्दिवसे देवि लभ्यते भाग्ययोगतः ॥ पूजयेत्ताः प्रयत्नेन यथावत्
पूर्वसंचिताः ॥ रात्रौ कृष्णादिनेत्यारभ्य मध्येस्थितो वशी ॥ ऋतुमेवं क्रमेणैव सम्भवेत्सुरपादपः ॥ वि रामः
मलाजयिनीमध्ये गुरवः कथितास्तु ते ॥ त्रैलोक्यमोहने चक्रे वक्ष्ये परिपूजयेत् ॥ त्रलविद्धुशिवाख्या २१
स्तास्तिस्रो रत्नसन्निभाः ॥ तत्रादौ वस्त्रेऽञ्चलायाम गामाद्याः स्थिताः प्रिये ॥ वराभयकरा रत्नाः समीहि
तफलप्रदाः ॥ कौमारी पीतवर्णा च शक्तितोमरधारिणी ॥ वरदाभयहस्ता च ध्यानव्यापारमेश्वरी ॥ अनु

CC-0. In Public Domain. Digitization by eGangotri

शंखोमरं त्रियुतं कुलिशो बिभ्रती करैः॥ इन्द्राणी गौरवर्णा च ध्येया सर्वसमृद्धिदा॥ वैष्णवी श्यामवर्णा च गदा
शंखाचक्रवराभयान्॥ एतत्परैश्च विभ्राणा दिव्यभूषणभूषिता॥ वाराही श्यामवर्णा च योत्रीवक्त्रसम
न्विता॥ हलं च मूषलं खड्गं खेटकं दधती करैः॥ चामुण्डा कृष्णवर्णा च शूलं डमरुकं तथा॥ खड्गं वै ताल
कं चैव दधाना दंष्ट्रिणी भृशं॥ खेटकं च समं चैव नागयज्ञोपवामकै॥ ब्रह्माणीप्रमुखाः सर्वा विष्णुरेखास
माश्रिताः ब्रह्माणी रक्तवर्णा चतुर्भिः शोभिता मुखैः॥ वरदाभयहस्ता च कुण्डिकाक्षलसत्करा॥ माहेश्व
री श्वेतवर्णा त्रिनेत्रा शूलधारिणी॥ कपालमेकपस्तुं दधाना पाणिभिः प्रिये॥ भेदमस्याः परं गुह्यं संक्षे
पात्कथिताधुना॥ महालक्ष्मीस्तु पीताभा पद्मपात्रमेव च॥ मातुलुङ्ग फलं चैव दधाना परमेश्वरी
त्रिविरेखां समाश्रित्य संक्षोभण्यादिकाः स्थिता॥ रक्ताः संक्षोभिणी मुख्याः सर्वभूषाकरान्विता॥ एताः प्रक
टयोगिन्यो ध्येयाः सर्वसमृद्धये॥ अणिमा पुरतो देवि त्रिपुरा चक्रनायिका॥ शुद्धस्फटिकसंकाशा मुक्ता
रत्नविभूषिता॥ सूक्ष्मकस्त्राक्षमाला च कमलद्वयमुत्तमं॥ बिभ्रती सिद्धयो ध्येया महापातकनाशि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध
२२

नी॥ त्रिमूर्तंचकुरुस्वांगिनिरवरूपंविद्धिपार्वति॥ सर्वाशापूरकेचक्रेविचेयदलान्विता॥ वस्माणस्त्विनोये
नत्रसवतपीसुपवर्षिते॥ कामाकर्षणिकाद्यास्तुषोडशस्वरसंयुताः॥ श्रूणिपाशाधराःसर्वारूपेयाः
पीहनतत्समा॥ स्तनस्तुगुप्तयोगिन्योध्येयासर्वसमृद्धिदाः॥ कामकर्षिणिकाद्येतुत्रिपुरेशीव्यवस्थिता॥
त्रिपुरासदृशीध्येयात्रिपुरेशीवरानने॥ अष्टपत्रेवरारोहेजवाकुसुमसन्निभं॥ सर्वसंक्षोभणंनामस
र्वकामफलप्रदं॥ चिन्तयित्वाशिवेतत्रवर्गाष्टकसमन्विताः॥ अनङ्गकुसुमाद्यास्तुस्मतास्तुप्तनरा
श्वताः॥ सुन्दरीसदृशाःसर्वाःसर्वकामफलप्रदाः॥ अनङ्गकुसुमारोप्तुध्येयात्रिपुरसुन्दरी॥ सर्वालङ्का
रसम्पन्नापुस्तकंचाक्षमालिकां॥ वराभयेत्वदधतीवन्धूककुसुमप्रभासर्वसौभाग्यदेचक्रेदाडिमी
कुसुमप्रभे॥ चतुर्दशारकेदेविभास्वरंपरिचिन्तयेत्॥ सर्वसंक्षोभणीमुख्याःसंप्रदायाःस्मृताश्चमा॥ स
र्वसंक्षोभणीशक्तिःपुरत्रिपुरवासिनी॥ सुन्दर्याःसदृशीध्येयासर्वकामफलप्रदा॥ सर्वार्थसाधकेच
क्रेसर्वरक्षाकरेतथा॥ वाह्यदशकोणेचजवाकुसुमसन्निभे॥ नारायणांपरंज्याथवाप्सरदशकेततः

राम:
२२

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वसिद्धिप्रदमुख्याः कुलकौलाः समन्ततः ॥ सर्वसिद्धिप्रदे ग्रेतु त्रिपुराश्रीयत्र स्थिता ॥ उद्यद्भानुसह
स्राभा दिव्यालङ्कारभूषिता ॥ पुस्तकं जपमालाञ्च दधतीवरदाभये ॥ अन्तर्दशारचक्रे च पूज्याः सर्वसम्
द्धिदाः ॥ तथा निगर्भ योगिन्यः सर्वज्ञाः प्रमुखाः प्रिये सर्वज्ञाप्रमुखेनोदे विस्थिता त्रिपुरमालिनी ॥ उद्य
त्पद्मप्रभा देवी पाशाङ्कुशकपालिनी ॥ महाभीतिहरा मन्त्रकसाधकानां क्षणात्प्रिये ॥ सर्वरोगहरे च
क्रे वालार्ककिरणारुणे ॥ वशिनीप्रमुखास्तत्र रहस्ययोगिनीर्यजेत् ॥ वशिनीप्रमुखारक्ता वराभय
धारिणिताः ॥ पुस्तकं जपमालाञ्च दधानाः परमेश्वरि ॥ वशिनीपुरतो देवि सर्वसिद्धिप्रदायिनी ॥ तथा
त्रिपुरासिद्धाञ्च ध्यायेद्विघ्नविनाशिनीम् ॥ त्रिकोणाग्रविभागस्य दक्षिणे वामके प्रिये ॥ चतुस्
थसमायुक्ते बाणचापे प्रपूजयेत् ॥ त्रिकोणस्यार्द्धभागस्य वामदक्षिणयोस्तथा ॥ षडक्षरूपयोर्दे
वि पाशाङ्कुशौ च वस्थितौ ॥ सर्वसिद्धिप्रदे चक्रे त्रिकोणे परमेश्वरी ॥ उद्यत्सूर्यसहस्राभे वन्धूककुसु
मप्रभे ॥ अतिरहस्ययोगिन्यः संस्थिता वीरवन्दिते अग्रकोणे अग्निचक्रे कामरूपे वरानने ॥ कामेश्वरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्ध २३

त्रिनेत्रा चन्द्ररुणा रुणविग्रहा ॥ वरं कंवरदानञ्च पाशञ्चाङ्कुशमेव च ॥ दधती परमेशानि ध्यायास्त्रात्म
शक्तिका ॥ वामकोणे त्रिकोणस्य सुर्य्यचक्रे महेश्वरि ॥ जालन्ध्रे महापीठे वज्रेश्वरी समीरिता ॥ त्रिनेत्रा
रुणांच डास्याव स्मूककुसुमप्रभा ॥ पाशाङ्कुशौ शरांश्चापं च सकं मातुलुङ्गकं ॥ दधतीच्चारुरूपा सा ध्येया
विस्तुर्म्मकथिता भगमालिनी ॥ त्रिनेत्रा तरुनेन्दुमस्तासिन्दूरारुणा विग्रहा ॥ सुलकं जपमालाञ्च पा
शाङ्कुशकमेव च ॥ दधती परमेशानी ध्येयात्मात्मशक्तिका ॥ कामेश्वरीपुरो भागे त्रिपुरान्ताख्य स्थि
ता ॥ मालिनी सदृशी ध्येया सर्वकामफलप्रदा ॥ अथवा स्मयं सर्वा देवीरूपेण चिन्तयेत् ॥ नवावरण
शक्तीनां ध्यानं देव्याः समं यतः ॥ निःसरन्ति यथा नित्यं सूर्य्याविस्फुलिङ्गचयः ॥ देव्यास्तथा समुत्पन्ना मह ताम: २३
देव्याः शरीरतः ॥ ईश्वर उवाच ॥ ओंयानपीठनेदे विव्रुलचक्रे वरानने ॥ तुणपरा हृस्या क्यादे विक्र
मरूपिणी ॥ चक्रेशीमपि नामैव पूजयेत् साधको नमः ॥ स्थितिक्रमेण पूजे यं यन्त्रो ह्रासक्रमेण तु ॥ सृष्टि
क्रमं मलदं गुह्यं पूजनं परमेश्वरि ॥ पार्वत्युवाच ॥ क्रमण्डलमाख्यातं न पूजानन्तश्च सराङ्गले ॥ इदानीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कथयेशान पूजाक्रममनुत्तमं ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि पूजाक्रममनुत्तमं ॥ यस्य प्रबोध
मात्रेण जीवन्मुक्तः प्रमोदते ॥ देव्या नित्यादिता पूजा त्रिभिर्भेदैर्व्यवस्थिता ॥ परा चापरा च देवि तृतीया
च परापरा ॥ चक्रमध्ये समावाह्य पूज्यते द्रव्यविस्तरैः ॥ प्रथमा सा समाख्याता समता सुन्दरादिभिः ॥ सुख
सने समासीना स्वगसंयमतेरतः ॥ समकायशिरोग्रीवो नासालोकनतत्परः ॥ विकल्परूपसंजल्पविमु
खो भावनतत्परः ॥ महाप्रसन्नवदनः ध्यायेत्परमानन्दरूपिणीं ॥ आप्यायितजगद्रूपां परमामृतवर्षिणीं
ततजज्ञानमये चक्रे परमात्मस्वरूपिणीं ॥ अर्द्धमात्रां योनिरूपां किन्तु त्रिवलयात्मिकां ॥ परमानन्द
पुष्पेण पूजयेदात्मरूपिणीं ॥ इन्द्रियप्रीणनैर्द्रव्यैर्विहितं आत्मपूजनं ॥ उत्तमेयं द्वितीया सा मया नित्य
श्रुते सदा ॥ परापरा समाख्याता उभयं यत्र विद्यते ॥ देवकीसूत्रसुन्नाचेयं निष्पाद्यते सदा प्रिये ॥ ॥ इ
ति गन्धर्वतन्त्रे चतुर्थः पटलः ॥ ॥ पार्वत्युवाच ॥ देव्याः पूजा समाख्याता तृतीया या महेश्वर ॥ तां क
थयस्वस्नेह विस्तरेणाधुना प्रभो ॥ ज्ञानेन कर्मणा चैव देहशुद्धिर्द्विधा भवेत् ॥ ज्ञानशुद्धिक्रिया प्रोक्ता

CC-0. In Public Domain. Digitization by eGangotri

कर्म्मशुद्धिर्न्न दर्शिता ॥ विनष्टज्ञपिच्छिलो देहः कथं देवमयो भवेत् ॥ तन्मे वद महादेव प्रसादसुमुख प्रभो
ईश्वर उवाच ॥ ज्ञानेन कर्म्मणा वापि सिद्धिर्भवति नान्यथा ॥ ज्ञानयोगश्च वक्तव्यः कर्म्मयोगं शृणु प्रिये
ब्राह्म्ये मुहूर्त्ते उत्थाय साधकः स्थिरमानसः ॥ पद्मासनसमासीनः प्राणायामपुरस्सरः ॥ ब्रह्मरन्ध्रस्थिते प
द्मे सहस्रदलशोभिते ॥ विमले पूर्णचन्द्रस्थमण्डले चिन्तयेद्गुरुम् ॥ शुद्धस्फटिकसङ्काशं श्वेताभरण
भूषितं ॥ ताटङ्कवसनस्याल्यादिविभूषिततनुं तथा ॥ पद्मासनसमासीनं सर्वयोगनिशेवितम् ॥ वराभ
यकराशान्तं द्विनेत्रं करुणामयम् ॥ वामोरुगतया शक्त्या रक्तया वामपाणिना ॥ धारयन्त्या तु पलं दक्षह
स्तेनालिङ्गितविग्रहम् ॥ परमानन्दसन्दोहसान्द्रमाननमीश्वरम् ॥ आनन्दसान्द्रनेत्राक्षं स्मेरस्मितमुखा
म्बुजम् बालार्कं भुवनेशानी रमा चैवाथ खेचरी ॥ शिववक्त्रेमातृकान्तं कालशक्त्याश्च वह्नयः ॥ वायुश्च वाम
कर्णे नयोजिता विन्दुनादिनः ॥ चक्रं चामादिमन्त्रेण कर्णे वामाक्षियोजयेत् ॥ शिववक्त्रेश्वरलाद्यौ वि
न्दुनादपरिमण्डितौ ॥ वज्रशिवौ त्रिस्वरलाद्यौ स्वर्गवन्तौ महेश्वरि ॥ तस्मात् स्वगुरुनामान्ते आनन्दनोरवालि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

खेत् ॥ तथाशान्तिपत्रमेवैनमन्त्रोपदस्मैतो लिखेत् ॥ पादुकां पूजयामीति विधिनापरिपूजयेत् ॥ लं पृथि-
व्यात्मना ब्रह्मणा गन्धं कल्पयामि गन्धतन्मात्रात्मने घ्राणेन्द्रियाय गन्धं गृहाण स्वाहा ॥ अथाङ्गुष्ठकनिष्ठाभ्यां यो-
जयेद् गन्धमुत्तमम् ॥ हं आकाशात्मना सदाशिवेन पुष्पं कल्पयामि शब्दतन्मात्रात्मने श्रोत्रेन्द्रियाय पुष्पं गृ-
हाण स्वाहा ॥ अङ्गुष्ठतर्जनीयोगं पुष्पदानं तु मैरवहि ॥ यं वाय्वात्मना ईश्वरेण धूपं कल्पयामि स्पर्शतन्मात्रा-
त्मने त्वगिन्द्रियाय धूपं गृहाण स्वाहा ॥ अङ्गुष्ठमध्यमायोगं धूपदानं तु मैरवहि ॥ रं वह्न्यात्मना रुद्रेण दीपं
कल्पयामि रूपतन्मात्रात्मने चक्षुरिन्द्रियाय दीपं गृहाण स्वाहा ॥ अङ्गुष्ठानामिकाभ्यां सह शान्ति दीपं दद्यात् समाहि-
तः ॥ वं अमृतात्मना विष्णुना नैवेद्यं कल्पयामि ॥ रसतन्मात्रात्मने जिह्वेन्द्रियाय रसं गृहाण स्वाहा ॥ अङ्गुष्ठना-
मिकायोगं नैवेद्यं तत्प्रतिष्ठितम् ॥ एवं कुलपूजां दिवि पूजयित्वा विधानतः ॥ योनिमुद्रां प्रदर्शाय प्रणा-
मेत् सिद्धिहेतवे ॥ नमस्ते भगवन्नाथ शिवाय गुरुरूपिणे ॥ विद्यावतारसंसिद्धै स्वीकृतानेकविग्रह
नारायणस्वरूपाय परमात्मैकरूपिणे ॥ सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते ॥ स्वतन्त्राय दयात्तवि-

CC-0. In Public Domain. Digitization by eGangotri

गुह्याय शिवात्मने ॥ पतनत्राय भक्तानां भव्यानां भयरूपिणे ॥ विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ॥ प्र
काशिनां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ॥ पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः ॥ सदा मच्चित्तरूपेण
विधेहि भवदासनम् ॥ ज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ॥ चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ न
मोऽस्तु गुरवे तुभ्यं ब्रह्मविष्णुशिवात्मने ॥ अविद्यागर्त्तसंसारसागरोत्तारहेतवे ॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरु
र्देवो महेश्वरः ॥ गुरुरेव परं ज्ञानं गुरुरेव परं तपः ॥ अतः सर्वत्र देवेशि गुरुपूजा गरीयसी ॥ अन्यदेवस
पर्य्या वाचान्यदेवस्य कीर्त्तनम् ॥ गुरुदेवं विनाऽन्यत्र चिन्तनं क्रियते यदि ॥ तदा नरकमाप्नोति सत्यमेतद्वच
महम् ॥ पूजिते गुरुपादे वै सर्वदेवस्तुतो भवेत् ॥ सर्वेषां मन्त्रतन्त्राणां विनाशी यः सदाशिवः ॥ यस्य भक्ति
गुरौ नित्यं वर्त्तते देवदेवप्रिये ॥ तस्य सर्वार्थसिद्धिः स्यान्नान्यथा खलु पार्वति ॥ गुरुपादरजो मूर्ध्नि ध्यात्वा
कर्म्म समारभेत् ॥ ब्रह्मरन्ध्रे सहस्रारे कर्णरन्ध्रवलो गुरुः ॥ वराभयकरो नित्यो ब्रह्मस्वरूपी सनातनः ॥ जा
गर्त्ति परसे शान्तिनित्यानन्दप्रकाशकः ॥ कुलनाथं परित्यज्य ये शाक्ताः परसेविनः ॥ तेषां दीक्षा च यागा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह्यपि चाराधकल्पते॥ तस्मात्सर्वप्रयत्नेन कुलीनं गुरुमाश्रयेत्॥ कुलीनः सर्वविद्यानामधिकारीति गीय
ते॥ दीक्षाप्रभुः स स्याच्च सर्वतन्त्रेषु नापरः॥ गुरुं च गुरुलपूजां च कुर्यान्न सततं गुरुः सर्वसु॥ देव्युवाच॥ विना यो
गं न सिध्यन्ति कुण्डलीं च क्रमः प्रभो॥ मूलपद्मे कुण्डलिनी यावन्निद्रायिता प्रभो॥ तावत्किंचिन्न सिध्येत म
न्त्रयन्त्रार्चनादिकम्॥ जागर्ति यदि सा देवि बहुभिः पुण्यसंचयैः॥ तदा प्रसादमायान्ति मन्त्रयन्त्रार्चनाद
यः॥ शिववद्विहरेल्लोके अष्टैश्वर्यसमन्वितः॥ योगयोगाद्भवेन्मुक्तिः मन्त्रसिद्धिरखण्डिता॥ सिद्धमनोप
रा वाग्निरिति शास्त्रार्थनिर्णयः॥ युक्तात्मा य न विहरेत् स्वर्गे मर्त्ये रसातले॥ जीवन्मुक्तश्च देहान्ते परं निर्वाणमा
प्नुयात्॥ तस्मात्कात्स्न्येन परं योगं कथयस्व मयीश्वर॥ ईश्वर उवाच॥ कथयामि तव स्नेहात् योगयोग्या
सि पार्वति॥ संसारे सारतां मुक्तिर्योगज्ञा देन कथ्यते॥ योगो हि ललितादेवीति स्थितं विक्रियावति॥ न यो
गान्तः पृष्ठेन स्मृश्मे न रसातले॥ एकं जीवात्मनश्चात्र योगं योगविशारदाः॥ कामक्रोधलोभमोहमदमा
त्सर्य्यसंज्ञकाः तत्समुदाः॥ षडाख्याता योगविघ्नकारका इमे॥ योगाङ्गैरभिजन्यात्तान् योगिनो योगमाप्नुयुः

CC-0. In Public Domain. Digitization by eGangotri

गम्ब
२६

यमं नियममासनप्राणायामोनन्तःपरम् ॥ प्रत्याहारं धारणांच ध्यानं ताईसमाधिना ॥ अष्टाङ्गान्याहुरेता-
नियोगिनोयोगसाधने ॥ अहिंसासत्यमस्तेयंब्रह्मचर्य्यंदयार्ज्जवम् ॥ क्षमधृतिमिताहारः शौचञ्चेतियमाद-
श ॥ तपःसन्तोषआस्तिक्यंदानंदेवस्यपूजनम् ॥ सिद्धान्तश्रवणञ्चैवह्रीर्मतिश्चजपोहुतम् ॥ दशैतेनिय-
माः प्रोक्तायोगशास्त्रविशारदैः ॥ पद्मासनंस्वस्तिकाख्यंभद्रंवज्रासनन्तथा ॥ वीरासनमितिप्रोक्तंक्रमादासन-
नपञ्चकम् ॥ ऊर्व्वोरुपरिविन्यस्य सम्यक्पादतले उभे ॥ अङ्गुष्ठौ चनिबध्नीयाद्धस्ताभ्यां व्युत्क्रमात्ततः ॥ प-
द्मासनमितिप्रोक्तंयोगिनांहृदयङ्गमम् ॥ जानूर्व्वोरन्तरे सम्यक्कृत्वापादतले उभे ॥ ऋजुकायोविशेद्योगी
स्वस्तिकंतत्प्रचक्ष्यते ॥ सीमन्याःपार्श्वयोर्न्यस्य गुल्फयुग्मंसुनिश्चलम् ॥ वृषणाधःपादपार्ष्णीपाणिभ्यां
परिबन्धयेत् ॥ भद्रासनंसमुद्दिष्टंयोगिभिःपरिकीर्तितम् ॥ ऊर्व्वोःपादौक्रमान्न्यस्यजान्वोःप्रत्यङ्मुखाङ्गुली:
करौनिदध्यादाख्यानंवज्रासनमनुत्तमम् ॥ एकंपादमधःकृत्वाविन्यस्योरौअथेतरम् ॥ ऋजुकायोविशेद्
योगीवीरासनमितीरितम् ॥ इडयाकर्षयेद्वायुंबाह्यंषोडशमात्रया धारयेत्पूरितंयोगीचतुःषष्ठ्याचमात्र-

राम:
२६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

या॥ सुषुम्नामध्यगं सम्यग् ग्राणविंशा मात्रया शनैः॥ नाड्या पिङ्गलया चैव रेचयेद्योगवित्तमः॥ प्राणायाममिमं
प्राहुर्योगशास्त्रविशारदाः॥ भूयो भूयः क्रमात्तस्य वाह्यमेवं समाचरेत्॥ मात्रावृद्धिक्रमेणैव सम्यग् द्वादश षो-
डश॥ जपध्यानादिभिर्युक्तं सगर्भं तं विदुर्बुधाः॥ तदपेतं विगर्भं च प्राणायामं परं विदुः॥ क्रमादभ्यसतः पुं-
सो देहे स्वेदोद्गमोऽधमः॥ मध्यमः कम्पसंयुक्तो भूमित्यागः परो मतः॥ उत्तमस्य गुणावाप्तिर्यावच्छीलनमि-
ष्यते॥ इन्द्रियाणां विचरतां विषयेष्वनिराकुलं॥ बलादाहरणं तेभ्यः प्रत्याहारोऽयमीरितः॥ अङ्गुष्ठगुल्फजा-
नुसुसीमनी लिङ्गनाभिषु हृद्ग्रीवाकण्ठदेशेषु लम्बिकायां ततो नसि॥ भ्रूमध्ये मस्तके मूर्ध्नि द्वादशान्ते यथा-
विधि॥ धारणं प्राणमरुतो धारणेति निगद्यते॥ समाहितेन मनसा चैतन्यान्तरवर्तिना॥ आत्मन्यभीष्ट-
देवानां ध्यानं ध्यानमिहोच्यते॥ समत्वभावना नित्यं जीवात्मपरमात्मनोः॥ समाधिमाहुर्मुनयः प्रोक्तमष्टा-
ङ्गलक्षणं॥ इति ते कथितं देवि कामादिपङ्कनाशनं॥ दुर्लभं विषयासक्तैः सुलभं संयमात्मनां॥ स-
माधिः सम्बिदुत्पत्तिः परजीवैकतां प्रति॥ यदि जीवः पराद्भिन्नः कार्य्यतामतिसुवते स विनष्टप्रसंस्येव घ

CC-0. In Public Domain. Digitization by eGangotri

अध्य
२७

एवम्परमेश्वरि विज्ञातं मया यस्त्वेवं वेत्ति तयाविति ते श्रुति॥ नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः॥ एकः
सन्भिद्यते भ्रान्त्या मायया न स्वरूपतः॥ तस्मादद्वैतमेवास्ति न प्रपञ्चो न संसृतिः॥ यथाकाशो घटाकाशो म
हाकाश इतीरितः॥ तथा भ्रान्तैर्द्विधा प्रोक्तो ह्यात्मा जीवेश्वरात्मना॥ नाहं देहो न च प्राणो नेन्द्रियाणि तथैव च
न मनो नैव बुद्धिश्च नैव चित्तमहंकृतिः॥ नाहं पृथ्वी न सलिलं न च वह्निस्तथानिलः॥ न चाकाशो न शब्दश्च न च
स्पर्शस्तथा रसः॥ न हि गन्धो न रूपश्च न मायाहं न संसृतिः॥ सदा साक्षिस्वरूपत्वाच्छिव एवास्मि केवलः॥ सोऽ
यं ब्रह्म न संसारी न ममेतोऽन्यत् कदाचन॥ इति विद्यात् स्वमात्मानं समाधिः परिकीर्तितः॥ समाधौ स्वस्वरूपोऽ
सौ तुरीयस्तत्स्वहि॥ तुरीयांशः पराशक्तिश्चिन्मात्रा ब्रह्म केवलं॥ प्रज्ञात्मानं वदन्त्येके स्थोऽपि ब्रह्म केवलं
जीवनीश्वरभावेन विद्यात् सोऽहमिति ध्रुवं॥ यथा फेनतरङ्गादि समुद्रादुत्थितं पुनः॥ समुद्रे लीयते तद्वज्ज
गन्मय्यनुलीयते॥ यस्त्वेवं परमात्मानं पृथग्भूतः प्रकाशितः॥ स याति परमं भावं स्वयं साक्षात् परामृतं
यदा मनसि चैतन्यं भाति सर्वत्रगं सदा॥ योगिनोऽव्यवधानेन तदा संपद्यते स्वयं॥ यदा भूतानि सर्वाणि

रामः
२७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वात्मन्येवाभिपश्यति॥ सर्व्वभूतेषु चात्मानं ब्रह्मसंपश्यते सदा॥ यदा सर्व्वाणि भूतानि समाधिस्थो न प
श्यति॥ एकीभूतः परेणासौ तदा भवति केवलः॥ तदा जन्मजराद्दुःखव्याधीनामेव भेषजं॥ केवलं ब्रह्मवि
ज्ञानं जायतेऽसौ तदा शिवः॥ तस्माद्विज्ञानतो मुक्तिर्नान्यथा भवकोटिभिः॥ सम्राद्यधिवलैर्यत्कञ्जीर्य्यते
भक्षितं विषं॥ तद्वत्सर्व्वाणि कर्म्माणि जीर्य्यन्ति ज्ञानिनः क्षणात्॥ देहाभिमाने गलिते विदिते परमात्म
नि॥ यत्र यत्र मनो याति तत्र तत्र समाधयः॥ अहं ब्रह्म न चान्योऽस्मि मुक्तोऽहमिति भावयेत्॥ सच्चिदानन्द
रूपोऽहं नित्यमुक्तस्वभाववान्॥ एवं समाधिनिष्ठो यः समाधये स कल्प्यते॥ सदा शिवोऽहमित्युक्त्वा स्वेच्छ
या विहरत्यपि॥ लिप्यते न स पापेन बध्यते न च कर्म्मणा॥ यथा शिवकृतं सर्व्वं मालिन्यं हन्ति क्षणात्॥ त
था ब्रह्मार्पितात्मासौ सर्व्वकर्म्माणि दह्यति॥ आत्मस्थं देवतां त्यक्त्वा वहिर्देवं विचिन्वते॥ करस्थं कौस्तुभं त्य
क्त्वा भ्रमते काचतृष्णया॥ न योगेन न यन्त्रेण नाभिमन्त्रेण विना हि सः॥ द्वयोरभ्यासयोगेन ब्रह्मसंसिद्धिकार
णं॥ तमः परिवृते गेहे घटो दीपेन दृश्यते॥ एवं मायावृतो ह्यात्मा मनुना गोचरीकृतः॥ एतत्ते कथितं देवि

गन्ध
२८

ब्रह्मज्ञानमिदं महत्॥ विज्ञाय गुरुतो जन्मसंसारसागरं तरेत्॥ यत्र यत्र मनस्थायं गङ्गायां श्वपचालये
ब्रह्मविद्ब्रह्मभूयाय कल्पते नान्यथा प्रिये॥ विश्वं शरीरमित्युक्तं पञ्चभूतात्मकं प्रिये॥ चन्द्रसूर्याग्नि
तेजोभिर्जीवब्रह्मैकरूपकं॥ तिस्रः कोट्यस्तदर्द्धेन शरीरे नाड्यो मताः॥ तासु मुख्या दश प्रोक्तास्तासु तिस्रो
व्यवस्थिताः॥ प्रधाना मेरुदण्डोऽत्र चन्द्रसूर्याग्निरूपिणी॥ ईडा वामे स्थिता नाडी शुक्ला तु चन्द्ररूपिणी
शक्तिरूपा तु सा नाडी साक्षादमृतविग्रहा॥ पिङ्गलाख्या च या दक्षे पुंरूपा सूर्यविग्रहा॥ दाडिमीकुसुमप्र
ख्या विषाख्या चापरा मता॥ मेरुमध्ये स्थिता या तु मूलादाब्रह्मरन्ध्रगा॥ सर्वतेजोमयी सा तु सुषुम्ना वह्नि
रूपिणी॥ तस्या मध्ये विचित्राख्या अमृतस्राविणी शुभा॥ सर्वदेवमयी सा तु योगिनां हृदयङ्गमा॥ विसर्गा
द्बिन्दुपर्यन्तं व्याप्य तिष्ठति तत्त्वतः॥ मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके॥ मध्ये स्वयम्भुलिङ्गं तु कोटिसू
र्यसमप्रभं॥ तदूर्द्ध्वे तन्तुरूपं तु ध्यायेद्बन्धूकसन्निभं॥ तदूर्द्ध्वे तच्छिखाकारा कुण्डली रक्तविग्रहा॥ सा एव हि प
रा सूक्ष्मा महात्रिपुरसुन्दरी॥ चैतन्यं सर्वभूतानां शब्दब्रह्ममयमुच्यते॥ तत्प्राप्य कुण्डलीरूपं प्राणिनां देहम

गंत्र
२८

CC-0. In Public Domain. Digitization by eGangotri

ध्यगं सर्वतेजोमयं तत्तु सच्चिदानन्दमव्ययं ॥ तदाधारे हेमवर्णाभं रसवर्णं चतुर्दलं ॥ द्रुतहेमसमप्रख्यं प
द्मं तत्र विभावयेत् ॥ तदूर्ध्वेऽग्निसमप्रख्यं षड्दलं हीरकप्रभं ॥ वादिलान्तषड्वर्णेन युक्तं स्वाधिष्ठानसंज्ञकं
मूलमाधारषट्कानां मूलाधारं ततो विदुः ॥ स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥ तदूर्ध्वे नाभिदेशे तु म
णिपूरं महत्पुरं ॥ हेमाभं वैद्युताभं च वह्नितेजोमयं तथा ॥ मणिवद्भिन्नं तत् पद्मं मणिपूरं ततो विदुः ॥ दशभि
श्च दलैर्युक्तं डादिफान्ताक्षरान्वितं विष्णुनाधिष्ठितं ॥ पद्मं विश्वालोकनकारणं ॥ तदूर्ध्वेऽनाहतं पद्ममुद्यदादित्य
सन्निभं ॥ कादिठान्तदलैरर्कपत्रैश्च समलङ्कृतं ॥ तन्मध्ये बाणलिङ्गं तु सूर्यायुतसमप्रभं ॥ शब्दब्रह्ममयः
शब्दोऽनाहतस्तत्र दृश्यते ॥ तेनाहताख्यं तत् पद्मं योगिभिः परिकीर्त्यते ॥ आनन्दसदनं तत्तु पुरुषाधिष्ठितं
परं ॥ तदूर्ध्वे तु विशुद्धाख्यं दलैः षोडशभिर्युतं ॥ स्वरैः षोडशकैर्युक्तं धूम्रवर्णं महत्प्रभं ॥ विशुद्धिं तनुते यस्मा
ज्जीवस्य हंसलोकनात् विशुद्धं पद्ममाख्यातं आकाशाख्यं महाद्भुतं ॥ आज्ञाचक्रं तदूर्ध्वे तु आत्मनाधिष्ठितं प
रं ॥ हक्षादिद्विदलं पञ्चचक्रनाधिष्ठितं तु तत् ॥ आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्तितं ॥ कैलासाख्यं तदु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतुबोधिनी तु नन्दुर्हन्तः॥ सत्स्वावाम्बुजं दं देवि विन्दुस्थानं न दुर्हन्तः॥ आदौ पूरकयोगेन स्वाधारे योजयेन्मनः
गुदमेढ्रान्तरे शक्तिं तामाकुञ्च्य प्रबोधयेत्॥ लिङ्गभेदक्रमेणैव विन्दुस्थानं समानयेत्॥ शम्भुना तां परांश
क्तिमेकीभावं विचिन्तयेत्॥ तत्रोद्भवामृतं तद्वत् द्रुतं लाक्षारसोपमम्॥ पाययित्वा च तां परोक्षां योगसिद्धि
दाम्॥ षट्चक्रदेवतास्तत्र सन्तर्प्यामृतधारया॥ आनयेत्तेन मार्गेण मूलाधारं पुनः सुधीः॥ यातायात
क्रमेणैवं तत्र कुर्यान्मनोलयम्॥ एवमभ्यासमानस्तु अहन्यहनि पार्वति॥ जरामरणदुःखाद्यैर्मुच्यते भवब
न्धने॥ इत्युक्तं परमं योगं योनिमुद्राप्रबन्धनम्॥ अथापरं प्रवक्ष्यामि समाधिं भवनाशनम्॥ अथवा
परमेशानि यथोक्तध्यानयोगतः॥ हृत्पद्मकलिकामध्ये ध्यायेद्देवीमनन्यधीः॥ त्रिपुरात्मकमात्मानं भा
वयेच्च्यक्तविग्रहः॥ ऐक्यं संभावयेन्नित्यं स्वगुरुं देवतात्मनाम्॥ अहं देवी न चान्योऽस्मि ब्रह्मैवाहं न शोकभा
क्॥ सच्चिदानन्दरूपोऽहं शुद्धबुद्धिस्वभाववान्॥ एवं पूर्वमुद्बुध्यन्नर्पितिपरं नस्ततः॥ सदिति तु समालो
च्य कर्म्म कुर्याद्विचक्षणः॥ स्मरणात्तत्कर्म्मणा साङ्गं ब्रह्मभूयाय कल्पते॥ सर्वमङ्गलसंपन्नो वहिर्निर्गत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

साधकः ॥ त्यक्तसुप्तपुरीषे च चक्रस्यापि विशोधयेत् ॥ मुखं प्रक्षाल्य देवेशि नासास्त्रं कृत्य मातः ॥ नेत्राञ्जनं
विधायैव वस्तुमुक्तस्य नेत्रमाश्रयेत् ॥ नेत्राञ्जनमकृत्वैव यः पश्यत्सौरमण्डलम् ॥ जन्मार्जितफलं नश्येत्
का कथा तस्य दुर्मते ॥ त्रितये न त्रिधा चमत्यन्न धावनमाचरेत् ॥ दन्तकाष्ठसमादित्वा पूजयेत् परमदेवता
म् ॥ तत एवाविफलादि विस्मृते च नरकं व्रजेत् ॥ श्रीमासमककामदेवस्सर्वाञ्जनमालिखेत् ॥ प्रियाय हृदया
न्तोऽयं मनुर्दन्तविशुद्धये ॥ चतुर्दशाक्षरैर्वं निक्षालयेत् सुविहितं वे ॥ ॥ इति गन्धर्वतन्त्रे पञ्चमः प
टलः ॥ ॥ शङ्कर उवाच ॥ प्रातःस्नानं ततः कुर्यात् कैपुरयोजयनक्रमम् सुगन्धिसलिलैः शुद्धैः कुलती
र्थेऽथवा पुनः ॥ न शायेदेविधिवत् स्नायात् कुलधर्मविधायकः ॥ तोयं दक्षिणात् कृत्वा त्वं अनामा हेमसंयुता
वामकनिष्ठिका हेमैः कुलधर्मोऽयमीरितः ॥ स्वपरं भवेद्धर्मो न धर्मो वनमन्तवः ॥ अङ्गन्यस्तु करं कुर्यात् दक्षि
न्ह वर्कप्रतिस्रया ॥ सर्वभूतवशीसम्यात् सुदयाचातिशोभयात्रितमेन त्रिधा चमत्य संकल्प्यप्रायकुनये ॥ कुलपा
त्रे सरनत्नस्व सतिलं सजलं ततः ॥ गृहीत्वा कुलदेवस्य श्रीतये स्नानमाचरेत् ॥ अस्नातस्य फलं नास्ति सस्थात

गन्ध ३०

र्पयन्तः पितॄन् ॥ इदं विष्णुर्भैरवस्तु विचक्रमस्त्रतीरितम् ॥ मृदालेभनकृत्ये च तिलमेव सुकीरयेत् ॥ कुलचक्रं
जलेनाप्लस्य मूलमुशं विधाय च ॥ रहिराङ्कृतमस्तुभ्यं सर्वतीर्थसमन्विते ॥ आवाहयामि देवि त्वां स्नानार्थमिह
सुन्दरि ॥ आवाह्यानामिमं योज्य सोमसूर्याग्निमण्डलम् ॥ सन्निकृष्य सन्नीतं तन्मध्ये ध्यायेत्त्रिपुरसुन्दरीम् ॥
गायत्र्याश्च महादेव्या सुन्दरीमाह्वयेच्छिवाम् ॥ त्रिवारमञ्जलौ वारि मूलमन्त्रेण मन्त्रयेत् ॥ अभिषिञ्चेत्ततो
मूर्द्ध्नि मूलमन्त्रं हृदि स्वरम् ॥ त्रिभिस्तु त्रिपुराबीजैस्त्रिधा यज्ञमथ स्मरेत् ॥ तस्मात्कुर्याद्देवेशि निर्मुक्तो दो-
षविग्रहः ॥ त्र्यक्षरीञ्च समुच्चार्य्य तु कुले परिधापयेत् ॥ सर्वेषां भूषिकाकान्तमथोत्तं भगनमस्तरम् ॥ सलिलं प
रकीयञ्च पर्यूषितञ्च वर्जयेत् तिलकं कुलरूपञ्च कन्याच न्यासविधानतः ॥ नानसन्ध्यामुपासीत पापहाये

तंत्र

न साधना ॥ स्नानञ्च त्रिविधं प्रोक्तं सन्ध्याच त्रिविधा स्मृता ॥ आन्तरञ्च भवेद्दिव्यं वाह्यं मानसमेव च ॥ मानसं वै ३०
भवेत् स्नानं यः स्मरत्शुद्धमानसः ॥ स्पर्शाने यादि केदेवि निर्विकल्पः सदेवहि ॥ वाह्यमत्रैव संप्रोक्तं सानारं
श्रृणु सामृतं ॥ प्राणुन्नञ्च संयोगेन प्राणायाममयो बुधः ॥ शक्तिपरंशिवेनैव सङ्गमार्थं विधानतः ॥ तत्तुद्भवा

CC-0. In Public Domain. Digitization by eGangotri

मृते शास्त्रश्रुद्धि ॥ मज्य पुनरेव हि ॥ स्नायन्नविमले तीर्थे पूतो हृदयाम्भितो ॥ विनुतीर्थेऽथवा स्नात्वा
पुनर्जन्म न विद्यते आत्मानं सर्वदा सम्यग् ध्यायेद् ध्यानपरायणः ॥ देवताभेदतः सन्ध्या मानसीयं पर
प्रिये ॥ शिवशक्त्योः समायोगो यस्मिन् काले प्रजायते ॥ सा सन्ध्या कुलनिष्ठानां समाधिस्थैः प्रतीयते ॥ अ
परां कथयाम्यत्र सर्वपापविनाशिनीं ॥ उपविश्य शुचौ देशे स्थितमेतद्विधायसेत् ॥ प्राणायामत्रयं कृत्वा
त्रिभिर्वीजैस्त्रिधाविधं ॥ वामहस्ते जलं गृह्य गलितोदकविन्दुभिः ॥ सप्तधा प्रोक्षणं कुर्यान्मूर्द्धि मन्त्रमनुस्म
रन् ॥ अवशिष्टोदकं दक्षहस्ते संगृह्य साधकः ॥ नासाग्रे भ्यितोयेन ततस्तेनाघमर्षणं ॥ इडयाकृष्य देह
न्तः क्षालितैः पापसञ्चये ॥ कृष्णवर्णं तदुद्रक्तं वामनाड्या विरेचितम् दक्षहस्ते तु तन्मन्त्री पापरूपं विचिन्तयन्
पुरतो वज्रपाषाणे प्रक्षिपेदस्त्रमन्त्रतः ॥ इत्यघमर्षणं कृत्वा पुनराचमनं तथा ॥ अभिषिञ्चेत्ततो मूर्द्धि
विधिना साधकोत्तमः ॥ ॐ आपो देवीरमोऽमृतपूतं ब्रह्म पुनीमहे ॥ जलाञ्जलित्रयं भूमौ मार्त्तण्डभैरवाय
च ॥ ऊर्द्धबाहुस्ततो मन्त्री मार्त्तण्डं समुपाश्रयेत् ॥ ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः ॥ दृशे विश्वाय मार्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध
३१

रण्डे शोषयेद्भैरवीमीरयेत्॥ सूर्य्यमण्डलमध्ये तु कुलचक्रं विचिन्तयेत्॥ बाल्यचितं स्पृहन्तीं वै बालिकाचक्रम
ध्यतः॥ बालार्कमण्डलाभासां मानुषद्वीतुलोचनां॥ पाशाङ्कुशौ वरांश्चापं धारयन्तीं शिवां स्मरेत्॥ मध्याह्
चिन्तयेद्देवीं नवयौवनसंपन्नां सुकुमारांगशोभितां॥ सायाह्ने चिन्तयेद्देवीं त्रैलोक्यैकप्रभामयीं॥ सर्वयौवनसं
पन्नां सुकुमारांगपरां सकलांतामेव चिन्तयेज्जगन्मोहिनीं भोगपरायणां॥ अष्टोत्तरशतावृत्त्या गायत्रीञ्च जपेत्सु
धीः॥ रविमण्डलसां देवीं प्रणिपत्य समापयेत्॥ एवं सन्ध्यां समाप्याथ हृदि विद्यां पराम्बवेत्॥ अथवाप
रमेशानि सदेवीं परिचिन्तयेत्॥ देव्युवाच॥ इदानीं श्रोतुमिच्छामि कथमत्राधिकारिता॥ वेदव्रतविशु
नानां व्रात्यादीनां कृतागमां तथैवानुपनीतानां स्त्रीशूद्राणां महेश्वर॥ कथमेते महादेव मुक्तिं गच्छन्ति यत्तु
त्तमां॥ न विना ब्राह्मणानां मुक्तिः देहबन्धाद्विनिष्कृतिः॥ ईश्वर उवाच॥ देवदारुवने पूर्वं ब्राह्मणानन्ति मुञ्चि
यः॥ विलोक्य भगवान् भिक्षुर्मामभ्येत्याभिवाद्य च॥ उपविष्टस्तदा देवः कारुण्यपूरितचेतसा॥ पृष्टवान्मां
महादेवि तेषां मुक्तेर्हि कारणं॥ भगवानुवाच॥ इमे तु मन्त्रयो सर्वे वेदाचारबहिष्कृताः॥ अन्त्यायेमे तु नेशाङ्काः

नेत्र
३१

सुरापानपरायणाः ॥ आत्मज्ञानविहीनानां योगाभ्यासाव्रकुलिनां ॥ कथमेषां भवेन्मुक्तिस्तदुपायं वदप्रभो
दुरसन्दीनां कथं देवदीक्षायामधिकारिता ॥ ईश्वर उवाच ॥ अपि कृत्वाद्गुराचारान्पतितो वेदवर्ज्जितः ॥ ना
री शूद्रोऽथवात्रान्त्यो दीक्षाज्ञात्वा द्वादशशरणो भवेत् ॥ यया विज्ञायते ब्रह्म सच्चिदानन्दमव्ययम् ॥ तामेव कथ
याम्यद्यतैकैव हृदि संस्थितां ॥ चतुर्विंशतितत्वेन निर्म्मितानन्तरूपिणी ॥ त्रिकारं च स्थकापीतं त्रलवि
द्युशिवात्मकं ॥ ध्यातपञ्चासमास्तु ध्यायेत् पद्मासनस्थितं ॥ पुकारं चिन्तयेच्छ्व अतसीपुष्पसन्निभं प.
द्ममध्यस्थितं सोऽस्य सुपपातकनाशनं ॥ रकारं कपिलं नित्यं कमलासनसंस्थितं ॥ ध्यायच्छान्तं सुरश्रेष्ठ
महापातकनाशनं ॥ सुकारं चिन्तयेद्देव इन्द्रनीलसमप्रभं ॥ निर्द्दहेत् सर्व्वदुःखानि ग्रहरोगाश्चवानिय
दकारं वह्निदीप्ताभं चिन्तमानं पुरुषर्षभ ॥ ब्रह्महत्याकृतं पापं तत्क्षणादेव नश्यति ॥ विकारं विमलं
ध्याय द्रुस्महत्याविनाशनं ॥ रिकारं चिन्तयेद्द्विजन् शुद्धस्फटिकसन्निभं ॥ पापं नश्यति तत्क्षिप्रमगम्याग
मनोद्भवं ॥ सुकारं चिन्तयन् योगी शुद्धस्फटिकसन्निभं ॥ अभक्ष्यभक्षणात् पापं तत्क्षणादेव नश्यति ॥ हे

CC-0. In Public Domain. Digitization by eGangotri

कारं तारकावर्णं इन्द्रगोपविभूषितं ॥ योगिनां वरदं ध्याये ब्रह्महत्याविनाशनं ॥ कामारं कृष्णवर्णञ्च नीलमेघ
समप्रभं ॥ ध्यात्वा पुरुषशार्दूल पापं नाशयति ध्रुवं ॥ मेकारं रक्तवर्णञ्च कमलासनसंस्थितं ॥ गोहत्यादी
कृतं पापं नाशयेद्येव तत्क्षणात् ॥ श्वकारं परमं ध्यायेत् तप्तकाञ्चनसन्निभं ॥ कमलासनसमासीनं मद्री
हत्याविमोचनं ॥ रिकारं शुक्लवर्णञ्च जातीपुष्पसमप्रभं ॥ गुरुहत्याकृतं पापं ध्यात्वा दहति तत्क्षणात्
धीकारं चिन्तयेच्छुक्लं कुन्दपुष्पसमप्रभं ॥ पितृमातृवधात् पापान्मुच्यते नात्र संशयः ॥ एकारं परम
गाध्यं चिन्तयेद्दीप्ततेजसं ॥ पूर्वजन्मार्जितं पापं तत्क्षणादेव नश्यति ॥ हिकारं शङ्खवर्णञ्च पूर्णचन्द्र
समप्रभं ॥ अशेषपापदहनं ध्यायेन्नित्यमिहाच्युत तत्कारं परागुरं ध्यायेत् पद्मस्योपरिसंस्थितं ॥ ब्र
तिग्रहकृतं ॥ पापं स्मरणादेव नश्यति ॥ नःकारं रक्तवर्णञ्च इन्द्रगोपसमप्रभं ॥ ध्यात्वा प्राणिवधं पापं नि
र्दहेज्जगदीश्वर ॥ क्लींकारं रक्तवर्णञ्च स्मरेद्वज्रसमप्रभं ॥ निर्दहेत् सर्वपापानि नान्यपापैः प्रलिप्यते ॥ नेक
रञ्चसुरं पूर्वं सूर्यार्कसमप्रभं ॥ सकृद्ध्यात्वा सुरश्रेष्ठ सगाच्छेत्सुराःपदं ॥ नीलोत्पलदलश्यामं प्रक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रं दक्षिणाननं ॥ सकृद्ध्यात्वा सुरश्रेष्ठ स गच्छेद्वैष्णवं पदं ॥ सौम्यं गोरोचनापीतं चोकारस्त्वोत्तराननं ॥ सकृद्ध्या
त्वा सुरश्रेष्ठ स गच्छेद्रुद्रतां पुनः ॥ शङ्खकुन्दनिभं ज्ञानं दकारं पश्चिमाननं ॥ सकृद्ध्यात्वा सुरश्रेष्ठ न गच्छे
द्रुद्रतां पुनः ॥ शरत्स्वच्छनिभं ज्ञानं दकारं पश्चिमाननं ॥ सकृद्ध्यात्वा सुरश्रेष्ठ स गच्छेदैश्वरं पदं ॥ यातका
रश्च शिरः प्रोक्तं मूर्द्धानममितीरितं ॥ सकृद्ध्यात्वा सुरश्रेष्ठ सदाशिवपुरं व्रजेत् ॥ अक्षराणां तु सर्वेषां वक्ष्य
के देवताः क्रमात् ॥ अग्निवायुसूर्य्यविद्युद्यमावरुणस्तथैव च ॥ बृहस्पतिस्तथा पर्ज्जन्य इन्द्रो गन्धर्व एव
च ॥ पूषाशिवश्च त्वष्टा च वासवश्च मरुत्तथा ॥ सोमो ऽङ्गिरा विश्वेदेवा अश्विनौ च प्रजापतिः ॥ सर्व
देवश्च रुद्रश्च ब्रह्मा विष्णुश्च देवताः ॥ जपकाले चिन्तयित्वा तासां सायुज्यमाप्नुयात् ॥ ललितायास्त्रिसि
वीजे त्रिपदे यंत्रयीमयी एतज्ज्ञात्वा तु मेधावी जपहोमं करोति यः ॥ षडङ्गमविधायादौ ध्यायन्तां य
र देवताम् ॥ न भवेत् सूतकं तस्य मृतकञ्च न विद्यते ॥ यश्चैवं तु न जानाति गायत्रीञ्च यथाविधिः ॥ क
थितं सूतकं तस्य मृतकञ्च मयानघ ॥ नैव दानफलं तस्य न च यज्ञफलं लभेत् ॥ न च तीर्थफलं प्रो॰

केन तस्यैवं स्तकेसति ॥ गायत्र्याः समाख्याता त्रैपुरी सर्वसिद्धिदा ॥ गायन्तं त्रायते यस्मात् गायत्री तेन चो-
च्यते ॥ अष्टोत्तरसहस्रं वै जपेदेनां मनन्यधीः ॥ सर्वपापविनिर्मुक्तो भवेत् पूजाधिकारवान् ॥ जीवन्मुक्तो
वामदेवस्य शिष्योसि योपि ख्यातवे ॥ विमुक्तो मातृहत्यायाः मीननाथस्तथापरः ॥ जैगीषव्यश्च चण्डश्च वामदे-
श्च विमोचितः ॥ गुरुतल्पगमनाच्चैव तथागस्त्यः प्रमोचितः ॥ अभक्ष्यभक्षणात् पापादत्रेयश्च विमोचितः
वाराणसीगमनाच्चैव शिशुश्चापि विमोचितः ॥ दत्तात्रेयः सुरापानात् जमदग्निः सर्वभक्षणात् ॥ नरवृत्त्या स-
गाः सर्वे विष्णुना प्रभविष्णुना अत्रेयश्च महादेवि सर्वे एव प्रमोचिताः ॥ चन्द्राचासुरहन्तास्मि त्वया नाथे
नचाङ्कुर ॥ निःसंशयास्मि देवेशाः प्रमोचितास्मि हृतः ॥ कथिता सामवेदेव तदिदानीं वदस्व मे ॥ ईश्वर उ-
वाच ॥ एकैव सा महादेवि बहुधा भिन्नमांगता ॥ सौरी च वैष्णवी चैव शाक्ती त्रैलोक्यमथ शाम्भवी ॥ तत्तन्नामा प्र-
योक्तव्या सैव पुरी वं प्रकाशिता ॥ तदेतत्तव विधा प्रोक्तं साम्प्रतं तत् शृणुष्व मे ॥ सोयार्कनलसंघट्टात् [illegible] लितं य-
त्परामृतं ॥ तेनामृतेन दिव्येन तर्पयेत् परदेवतां ॥ आनन्दं तर्पणां येन ज्ञानं संशृणु साम्प्रतं ॥ आत्मानं त-

न्मयं स्मृत्वा सदा सन्तर्पितात्मवान्॥ सर्व्वदा सर्वकार्येषु सन्तुष्टैः स्थिरमानसः॥ उपविश्य शुचौ देशे तत
त्सर्पणामारभेत्॥ तर्पयित्वा गुरूनादौ मूलदेवीश्च तर्पयेत्॥ बीजत्रयं ततो विद्याकूटन्तु गदीयतान्विता
ततो देव्यांश्च नामान्ते तर्पयामि नमः पदं॥ देवानृषींस्तत ऋषींश्चैव तर्पयेत कुलवारिणा॥ तर्पणे शेषप्र
युञ्जीत तत्पत्नी भैरव॥ तथैव परमेशानि विष्णु रुद्र प्रजापतिं॥ स्वं ऋषीन्प्रतर्प्याथ पितॄनपि च
भैरवान्॥ तत्पत्नीं सुन्दरीं माता पितामहे स्वतत्पत्नी॥ आदौ त्रिपुरपदंश्च तर्पणे विनियोजयेत्॥ श्रोत्रेषु वि
के दाने घ्राणेऽभ्यन्तरे पूजने॥ सर्वदा सर्वकार्येषु तान्त्रिके वैदिके तथा॥ त्रिपुरभैरवश्चैव स्मरेत्त्रिपुरसु
न्दरीं॥ स्वविद्यां स्मरन्कुर्य्यात् क्रियां सर्वत्र चोदितां॥ द्विजातीनाञ्च संस्कारो वैदिकः समुदाहृतः॥ तथान्तु
तत्र तत्रापि विद्यया विधिमाचरेत्॥ अन्त्यजानपि वर्णानां विद्ययैव समापयेत्॥ विद्यया संस्कृतो यस्तु
स एव ब्राह्मणो मतः॥ निधने विद्यया दाहे विद्ययान्यत् समाचरेत्॥ तेनेव तन्मयात् सिद्धिः सर्वत्र भवति
ध्रुवं यावन्न दीयते देवि सूर्यायार्घ्यं विधानतः॥ विधिना विहिता पूजा तावत् फलं न प्रवक्ष्यते॥ मार्तण्डभै

दत्वायार्घ्यं दूर्वाभिः शिततण्डुलैः ॥ रक्तपुष्पैश्चन्दनैश्च मण्डलाय निवेदयेत् ॥ शिवबिंबवह्निसंस्थं वा स्मरे
न्नविमुक्तिदं ॥ नादबिन्दुकलायुक्तं हंसपद्मं ततो लिखेत् ॥ मार्तण्डभैरवायेति ब्राह्मशक्त्या लिखेत् ॥ स
हितायेति चोक्त्वा वै इदमर्घ्यं मतः परं ॥ वह्निजायान्वितं कृत्वा सूर्यायार्घ्यं निवेदयेत् ॥ नस्याज्ञास्करयार्घ्यं
शङ्खतोयैर्महेश्वरि सर्वदेवमयं सूर्यं सर्वदेवनमस्कृतं ॥ पूजयित्वा विधानेन प्रदक्षिणमनुव्रजन् ॥ प्रण
म्य भगवन्तं वै सर्वपापैः प्रमुच्यते ॥ यः सदा पूजयेद्देवं स्वर्गवाप्राप्नमेतत्प्रभुं ॥ पूजितैर्दैवतैस्त्वेनवत्या-
गान्तरगोचरं ॥ तिस्रः कोट्यर्द्धकोटी च तीर्थानां यत्र उच्यते सकृत्प्रदक्षिणां देवदत्वा तत्फलमश्नुसा
तीर्थानां दर्शने यद्वत् यत्तत्साक्षात्कारदर्शनात् ॥ सर्वतीर्थास्नातैः स्नातो यः सदा सूर्यरश्मिभिः ॥ अथ त्रिपु
रायस्यादेव्ये अर्घ्यं निवेदयेत् ॥ सूर्यमण्डलसंस्थायै पूर्वोक्तध्यानयोगतः ॥ चक्रराजं हृदि ध्यात्वा त
त्रे देवीं समानयेत् ॥ अष्टोत्तरशतावृत्त्या जपेन्नित्यं समन्यधीः ॥ ॥ इति गन्धर्वतन्त्रे षट्प
टलः ॥ ईश्वर उवाच ॥ ततो मोनी विशुद्धात्मा हृदि विद्यां परं स्मरन् ॥ अवहिर्मानसो योगी यागभूमिमथा

CC-0. In Public Domain. Digitization by eGangotri

विशेत्॥ केशकीटादिसंयुक्तान स्निग्धा नातिपिच्छिला न रूक्षा नातिनीचा च नासुस्थाने वनान्विता॥ नच
वास्तुभि राच्छन्ना नान्यप्राणिसमाकुला॥ धूलिकर्दमसंयुक्ता पशुभिर्नविलोकिता॥ वृक्षादिभिरनाकीर्णा दव
वाग्निसमाकुला॥ अनावृता चतुर्दिक्षु मनसोऽनुष्टिकारिणी॥ उपरेष्वपि संयुक्तस्थाने पुरोयेऽपि नार्च्यते त्व
भुमिनिषिद्धे या विहिता कथ्यतेऽधुना॥ वापीकूपसमीपस्ता सुमनोद्यानमध्यगा॥ विचित्रमण्डपैर्युक्ता [illegible]
द्रवेद्धिर्परिष्कृता॥ पताकाध्वजसंकीर्णा लाजाहारुणापरिष्कृता॥ पुष्पप्रकारसंकीर्णा घण्टाचामरभूषिता
दीपदर्पणसंयुक्ता वितानोपपरिष्कृता॥ पेयैर्भक्ष्यैः समायुक्ता कर्पूरागुरुधूपिता॥ बालार्कसदृशीरम्या
मनःसन्तोषकारिणी॥ नानाद्ययुधपूर्णान्नैर्विभूषितप्रपूजिता॥ एवमेषा महादेवि वागभूमिः समीरिता
पूजावेश्या बहिः स्थित्वा चतुर्हस्तान्तरे स्थिता॥ गृहेष्वेव द्वारदेशस्य आचम्य मनसा गुरून्॥ प्रणमेद्दिक्षुदेवी
श्च दिक्पालानपि चेतसा॥ इन्द्रमग्निं यमं वन्दे निर्ऋतिं वरुणान्तथा॥ पवनं धनदञ्चेशं प्रजापतिमनन्त
कं॥ गणेशञ्चैव क्षेत्रेशं वन्दे तारप्रियन्तथा॥ गणनाथं वटुकञ्च दुर्गां क्षेत्ररतिं स्मरं॥ प्रीतिं रसनकञ्चैव वश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध
३५

ञ्च पद्मनिधीं तथा सरस्वतीं महालक्ष्मीं मायां दुर्गां नमाम्यहं ॥ भद्रकालीं स्वस्तिं च स्वाहां शुभकरीं तथा गौ
रीं च लोकधात्रीं च वागीश्वरीं नमाम्यहं ॥ वलाग्रां वास्तुपुरुषं पद्मगामामि यथाक्रमं ॥ पुष्पाञ्जलिमथैतेभ्यो
भक्त्या वरमयादिशेत् ॥ मण्डलं वामतः कृत्वा चतुरस्रं महेश्वरि ॥ आधारं पूजयेत्तत्र पात्रं चास्त्रोपक्षालि
तं ॥ संस्थाप्य परमेशानि सर्वभूतबलिं हरेत् ॥ तारस्त्रभुवनेशानीं सर्वविघ्नपदं ततः ॥ हृदन्ते सर्वभूतेभ्यो
हुं स्वाहां वह्निवल्लभां ॥ समुच्चरन्बलिं दद्यात्मुद्रया तत्त्वसंज्ञया ॥ अङ्गुष्ठानामिकायोगात्तत्त्वमुद्रेयमी
रिता ॥ वामानेत्रास्त्रमालिख्य डें नं फट्कारसंयुतं अस्त्रमन्त्रः समाख्यातः सर्वविघ्नौघनाशकः ॥ अनेनैवा
क्षतान्सम्यक्सरस्य न्यस प्रधाततः ॥ अपसर्पन्तु ते भूमौ ये चान्तरीक्षगाः ॥ दिव्यलोकगता ये च ते नश्य
न्तु शिवाज्ञया ॥ अनेनैवाक्षतांस्तत्र विकिरेद्यज्ञमण्डपे ॥ ऐं ह्रीं सोः इति मन्त्रेण पूजा देव्या महेश्वरि ॥ अ
ङ्गसंस्थापयन्वा संप्रविश्योद्दक्षिणाङ्घ्रिणा ॥ यागमन्दिरं गामन्त्रविघ्नानुत्सारयेत्ततः ॥ पार्ष्णिघातकरास्फो
टिसमुदञ्चितवक्त्रकः ॥ तालत्रयमिदं कृत्वा विघ्नान्सर्वानुपाहरेत् ॥ ततः पुनर्हुंफडिति पार्श्वमुर्ध्वमधस्तथा

तंव
३५

आत्मनः क्रोधदृष्ट्याथ निरीक्ष्य सुमना भवेत् वीक्षितां सर्ववीजेन यज्ञभूमेः समीरितः ॥ तनूर्ध्वा विन्दुसंयुतः
कलानादसमन्वितः ॥ धर्म्मवीजे मितं प्रोक्तं धर्म्मकामार्थसाधनं ॥ प्रोक्षणाख्यास्त्रमन्त्रेण यागभूमेः समाचरे
त् ॥ अशुद्धपक्षिसंयोगपक्षिविष्टावसेचनं ॥ मूषिकामण्डुकस्पर्शक्रिमिकीटादिसङ्गमः ॥ अज्ञातदूषणां स्था
नं मार्जनाद्यैश्च यच्च वेत् ॥ एवमादीनि नश्यन्ति लोकनात् स्पर्शनात् प्रिये ॥ मधुकैटभयोर्मेदं घातैर्दृढ
ताङ्गता ॥ मेदिनी सर्वदा शुद्धा सुरपूजासु सर्वतः ॥ तस्य दोषस्य मेधार्थं कामवीजं लिखेत् क्षितौ ॥ नैवेद्या
दिकं स्वयं धृत्वा आच्छाद्य मीनमुद्रया ॥ वायुवीजेन संशोष्य वह्निना च मलं दहेत् ॥ श्रीवत्समुद्रया दृष्ट्वा त
त् सर्वं वलोकयेत् ॥ यच्चात्मना न विज्ञातं सम्यक् पुष्पादिदूषणं ॥ अस्पर्शनादिकं वापि यदन्यायार्जितं त
वेत् तथा निर्माल्यसंस्पृष्टिः वीक्षयाद्यो हरान्स्वरेत् ॥ ततः सर्वं नाशमायाति नैवेद्याद्यवलोकनात् ॥ नैवेद्य
कादिकं यत्तु पुष्पगन्धादिकञ्च यत् ॥ सर्वमाच्छादितं कार्यं यावदावाहयेत् परं ॥ आवाह्य स्थापयित्वा
तु निराच्छादं प्रकाशयेत् ॥ यक्षमाः प्रतिगृह्णन्ति निराच्छादं यतः प्रिये आसनञ्च ततः कुर्यान्नातिनीचं न चोच्छ्रि

तं ॥ आसनं स्वागतार्घ्यपाद्यमाचमनं समासादयेन्नतु ॥ कृष्णाजिने मोक्षसिद्धिः श्रीमान्व्याघ्रचर्म्मणि ॥ काम्यार्थकम्ब
ले चैव मनसीस्यं रक्तकम्बले ॥ कुशासने सर्वसिद्धिर्म्मारणे कृष्णकम्बलं ॥ त्रिपुरापुजने शस्तं रक्तकम्बलमास-
नं ॥ नैतद्दिहस्ततो दीर्घं सार्द्धहस्तानुविस्तृतं ॥ न न्यूनं त्र्यङ्गुलात्सम्युच्छ्राय पूजाकर्म्मणि संग्रहेत् ॥ यथेष्टं चाश्मी
तां कुर्यात् पूर्वोक्तसिद्धिदायकं ॥ न दीक्षितो विशेज्जातु कृष्णसाराजिने गृही ॥ धरण्यां दुःखसम्भूतिर्दौर्भाग्यं
दारुजासने ॥ आस्यनिम्बकदम्बानामासनं सर्वनाशनं ॥ वंशुले किंशुके चैव पनसे खुहतश्रियः ॥ वंशे दुष्का
धरणीतृणपल्लवनिर्म्मितं ॥ वर्ज्जयेदासनं मन्त्री दारिद्र्यव्याधिदुःखदं ॥ नारावैर्वारिभिन्नं स्याद्दिवीर्णास
नमेव च ॥ पर्युषितं परेषां तद्धौतं स्वविवर्जयेत् ॥ गान्धारीनिर्म्मितं शस्तं नान्यच्छस्यमयं शुभं ॥ न यथेष्टा
सनो भूयात् पूजाकर्म्मणि साधकः । काष्ठादिकासनं कुर्यान्मितमेव सदा प्रिये ॥ चतुर्विंशत्यङ्गुलेन दीर्घ
कास्त्रासने शिवे ॥ षोडशाङ्गुलविस्तीर्णमुच्छ्रयात्स्वत्र्यङ्गुलं ॥ न दशाङ्गुलं वा कुर्यान्नोच्छ्रितं स्थानि आचरेत्
धरण्यां वस्त्रसंयोगाद्दारुजे कम्बलस्य च ॥ कौशे वाजिनसंयोगो हन्ति पुण्यपुरातनं ॥ यथाशक्त्यकृतो

मन्त्रीशस्तासनमुपाविशेत्पाणिभ्यामासनंधृत्वा विहितेविस्मरेद्वुधि ॥ पद्मावीजंसमुच्चार्य ततस्त्वाधार
पूर्व्वकं ॥ शक्तिपद्मं समालिख्य कमलासनमालिख्येत् ॥ ह्रीं नं नमः पदं कुर्य्यादनेनैवासनं यजेत् ॥ मू
लप्रकृतिमन्त्रेण कुर्म्मञ्चपरिचिन्तयेत् ॥ अनन्तञ्चापि संपूज्य पृथिव्यार्घ्यं निवेदयेत् ॥ प्रणवं पूर्व्वमु
च्चार्य पृथिव्यैनमस्तथा पाणिभ्यामासनंधृत्वा स्मरेद्देवं विधानतः ॥ मेरुपृष्ठ ऋषिः प्रोक्तः सुतलं छ
न्दः कूर्म्मो देवता चात्र आ॥ सनस्योपवेशने विनियोगस्तथा प्रोक्त उपविशेत्समन्त्रकं पृथिव्या
धृता लोका देवि त्वं विष्णुना धृता त्वञ्च धारय मां नित्यं पवित्रमासनं कुरु ॥ ॐ ह्रीं शिल्पिरचितन्त्वा दिव्यद्रव्य
सनद्दृषणं अज्ञानरूपकं यानिर्मितं विधिना प्रिये ॥ पादद्वयं समं सम्यगूरुद्वयोपरि स्थितं ॥ सव्यं
पादमुपादाय दक्षिणोपरि विन्यसेत् ॥ स्वस्तिकं कोयोः पश्चिमतनासाग्रसलोचनः पद्मासनं भवेद्दे
वत् प्रशस्तं त्रिपुराज्ञे स्वस्तिकं गोमुखं स्वच्छं वर्मूर्द्धं स्वस्तिकमेव वा ॥ पर्य्यङ्कमासनं शस्तमेवं वज्रासनं प्रिये
पद्मस्यान्तरे स्वदेवश्च पादयोर्यन्नपद्मस्य तिन्नेत्युक्तमन्यथा पापदर्शनं सुरपूजने ॥ स्थिरं भोगं भुक्तौ वैरी॰

CC-0. In Public Domain. Digitization by eGangotri

दिक् शिवाप्रातिपायिनी॥ तस्मात्तत्सुख आसीनः पूजयेत्त्रिपुरां सदा॥ उत्तराभिमुखो भूत्वा यदा देवीं प्र
पूजयेत्॥ उत्तराज्ञा तदा देवि पूर्वाशैव न संशयः॥ ईशानमग्निकोणं वा स्याद्वायुकोणं तथेवाकं॥ दक्षिणा
ज्ञा तदा ज्ञेया पश्चिमा या महेश्वरि॥ राक्षसं वायुकोणं स्यादाग्नेयं राक्षसं भवेत्॥ प्राक्प्रत्यङ्मुखमथ पूजा
यां लौकिके पश्चिमं स्मृतं॥ दक्षिणोत्तरपूजायां सन्मुखं पश्चिमं स्मृतं॥ योगिनीचक्रपूजायां दिशियंत्रान्य
याभवेत्॥ कुङ्कुमारुणदेहस्तु रक्ताम्बराभूषितः॥ रक्तासनोपविष्टस्तु लाक्षारुणगृहे स्थितः॥ ताम्बूल
रागरदनो धूपामोदसुगन्धितः॥ कर्पूरक्षोदधिग्धाङ्गो रक्तचन्दनभूषितः॥ सर्वश्रृङ्गारवेशाढ्यस्त्रिपु
रासक्तविग्रहः॥ मनः सङ्कल्परहितो वासाधवाः स्थिरमानसः॥ कृताञ्जलिपुटो भूत्वा मन्दस्मितमुखाम्बुजः
वामकर्णोर्द्धभागे तु गुरुस्त्वं प्रणमेत्ततः॥ दक्षकर्णोर्द्धभागे तु गणेशं प्रणमेद्बुधः॥ दुर्गां नमेत्पुरोभा
गे पृष्ठतः क्षेत्रनायकं॥ स्वस्कंधे वामतो देव्यादीपं संस्थापयेत्ततः॥ ततो रश्मिरिति मन्त्रेणाशिखां दीपस्य संस्पृ
शेत्॥ पवतीर्थेन देवेशि संस्पृश्य च विधानतः॥ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः॥ सवाह्याभ्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तरं ज्योतिर्द्धीपोऽस्तु शुभदायकः ॥ सततस्य शुभं देवि दीपो भवेत् स्पर्शनमात्रतः ॥ पतङ्गकीटकेशादिनाहन्
यायदसंहतः वसामज्जास्थिसंभूतिर्यदा यत्नु पयोगिनः ॥ नजातस्त्वकं सर्वदोषं स्पर्शाद्विनाशयेत् गो
वनाकुङ्कुमाभ्यञ्ज कस्तुरीचन्दनेन तु भिः ॥ रञ्जितं चक्रराजं स्वयम्भुकुसुमैर्युतं ॥ सिन्दुररजसाक्रान्तं पु
रतः सिंहविष्टरे संस्थाप्य महसा देवि योगिनीभिः समन्ततः ॥ देवीरूपं विचिन्त्याथ चक्रे पूर्णाञ्जलिं दि
शेत् अशस्त्यकुसुमैः कुर्याच्छून्ये विन्यायनेकशः ॥ गन्धपुष्पाक्षतं देवि दक्षभागे निधापयेत् ॥ प्रक्षा
लनाय करयोः पात्रं पश्चान्निधापयेत् प्रघ्यादिकं पूर्वभागे सव्ये कुम्भं निधापयेत् ॥ सततं वामतः कृ
त्वा जलेन चतुरस्रकं ॥ वहन्तकराभ्यां देवेशि तत्राधारं मनोहरं ॥ सुवर्णरौप्यताम्रादिविहितं स्थापयेत्
तः ॥ वह्निमण्डलरूपस्तं कलाभिः सह पूजयेत् ॥ कलसं हेमजं धान्यं सिद्धिक्रूक्तापि सुन्दरं ॥ वस्त्रपूतैर्जलैः
पूर्णं सगन्धैर्दोषवर्जितैः ॥ पानीयघटमध्यस्थं वीक्ष्य तु गुल्यस्थ साधकः ॥ वामेन पाणिना देवि तत्राधा
रे निवेशयेत् ॥ पूजयेत् सूर्यरूपं तं कलाभिः परमेश्वरि ॥ कल्पतस्य समभ्यर्च्य विशेषेणावराननं ॥ ततस्त्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समन्तं साधकश्चन्द्ररूपं विचिन्तयेत् ॥ चन्द्रमण्डलमध्यस्थं कलाभिः सुसमन्वितं ॥ आनन्दभैरवं तत्र पूजयेदा
नन्दभैरवीं ॥ यस्यान्यदूषणं पात्रे नैवेद्ये राजाज्ञ्या भवेत् ॥ ततः सर्वं नाशमायाति पूजार्हःफलमाभवेत् पा
त्रमस्त्राम्बुभिः प्रोक्ष्य दक्षतो वह्निमण्डले ॥ साधारं स्थापयेद्देवि पूजयेत्तं यथाविधि ॥ शुद्धोदकेन संपूर्य
मूलविद्यां ततो जपेत् प्रेक्षयेत्तेन कलशं प्रोक्षणीं स्तेन वारिणा ॥ वामतस्तु तथा द्रव्यं प्रतिष्ठाप्य विधा
नतः ॥ तदुत्तरतस्तस्मिन् पात्रमाचमनीयकं ॥ तस्योपरि शिवानन्दामृतं शुद्धिमथाचरेत् ॥ स्वभावतः स
र्वशुद्धं परब्रह्मात्मकं वपुः मनः प्रीतिसमायुक्तं भोग्यं बिन्दुनपिच्छिलं ॥ तस्यैव वह्निविशुद्धार्थं वायुग्निस
लिलाक्षरैः ॥ सौम्यदोहैस्तथा मल्लपोतमादोहम्नतवर्षणां ॥ आप्लावनं च सकलं वंपूरकुम्भकरेचकैः ॥ प
श्चशुद्धिविधानेन कृतं यदभिचारवत् विपरीतफलं दद्यादभक्त्याभ्युक्षितं तथा ॥ हालाहलाकारभूता
नां सुतानां यद्विशोधनं ॥ अव्ययब्रह्मसंस्पर्शाज्ज्ञानशुद्धिरियं शिवे ॥ अन्तःकरणमध्ये तु ज्योतिरात्मा प्र
वर्तते ॥ लिङ्गदेहस्तु तत्प्राहुर्योगिनस्तद्वेदिनः ॥ तस्यवेशोधनं चैव सर्वशुद्धिः प्रजायते ॥ तदेवविश्वज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननकारणं जन्मकारणं ननप्रतीतो भवेन्मुक्तिर्न्नान्यतो जन्मकोटिभिः ॥ प्राणायाममत्रयं कृत्वा योनिमुद्रां
तथाश्वरेत् ॥ विद्याकुलत्रयस्यैव विवर्त्तं केतु मन्यधिया ॥ पुस्तयेऽथ सञ्चिन्त्य तेषामेकां ततस्मरेत् ॥ न
क्षिंस्ते जोमये विश्वेसञ्चियानन्दधामनि केवलानुभवानन्दयं ब्रह्मणि शाश्वते ॥ निमज्य बिन्दुरो
धाम्नि क्षणं स्थित्वानुचिन्तयेत् बालार्कि किरणाकारं ततस्तेजोमयं स्मरेत् ॥ शुद्धलाभास्त तात्तो विमध्ये
चातिमनोहरेत् ॥ नवरत्नमये द्वीपे तन्त्रिनाम णिमण्डपे ॥ रत्नसिंहासनान्त्याजेवन्ते केतु स्वरूपिणीं
बालार्ककोटिसङ्काशां तुरीयां परमां कलां दक्षिणाधकरे बाणान् वामाधो धनुरेव च ॥ दक्षिणोर्द्ध्वे शृणिं
वामे पाशं चापि कैधृतां ॥ अरुणामरुणाकल्प वसनाक्षित्रयान्वितां ॥ आत्माभेदेन सञ्चिन्त्य शुद्ध
ज्ञानस्वभाविनं ॥ केवलानुभवानन्दमात्मानं परिचिन्तयेत् ॥ ॐ ह्रीं हंसस्ततः सोऽहं स्वाहेति मनुना
ञ्चिवे ॥ बालीबीजत्रयस्यान्ते महात्रिपुरसुन्दरि आत्मानां रक्ष रक्षेति कुर्यादक्षां हृदि स्पृशन् ॥ दिग्ब
न्धः स्वस्त्रियाचैवं छोटिकाभिः समन्ततः ॥ ॥ इति गन्धर्वतन्त्रे सप्तमः पटलः ॥ ईश्वर उ

CC-0. In Public Domain. Digitization by eGangotri

वाच॥ देवस्त्वयजेद्ध्वनोदेवोदेवमर्चयेत्॥ न्यासंविनाजपंप्राहुरासुरंविफलंशिवे॥ न्यासात्तदात्मको
भूत्वादेवोभूत्वातुतंयजेत्॥ प्राणायामैस्तथाध्यानैर्न्यासैर्देवशरीरता॥ न्यासविधिंशृणुप्राज्ञेकरशु
द्धिपुरःसरं॥ मातृकांशसमुद्धृत्यद्वितीयस्त्वसविन्दुकं॥ आनन्तानलकादिसंपुटंस्यैकापान्तान्नयोजितं
स्ववमेधामहाविद्याकरशुद्धिकरीमता॥ गृहीत्वारक्तपुष्पंस्वसुगन्धंसाधकस्ततः॥ अनेनैवतुमंत्रेण
पुष्पंहस्ततलस्थितं॥ मर्दयेत्सव्यहस्तेनवामेनपाणिनाततः॥ निर्माल्यकामबीजेनजिघ्रेपेद्भाग
भवेनतुस्वैशान्यांनिःक्षिपेदेतेनैवचबीजेनपार्श्वतः॥ अङ्गुल्यग्राणिशुद्धानिपुष्पस्यग्रहणाद्भवे॥ मर्द
नात्करयोःशुद्धिर्निर्माल्यत्यजनात्प्रिये॥ घ्राणाद्देवास्तुष्यन्तितीर्थानांस्वसमागमः॥ प्रक्षेपात्सर्ववि
घ्नानांदूरसंस्थानमेवच॥ पुर्गस्यातसततसंस्पर्शाद्दूषणांकरयोस्तुयत्॥ अज्ञानरूपंतत्सर्वंनाशये
द्विधिनामुनाकरशुद्धिंविधायादौऋषिन्यासादिकंततः॥ ऋषिश्छन्दोदेवतानांविन्यासेनविनायत
जप्यतेसाधिनेऽप्यथततत्रतत्फलमेव॥ ऋषिरस्यस्मृतःशाण्डिल्यसुशर्तरम्ययं॥ पंक्तिश्छन्दस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थाप्रोक्तं विद्यायाः शृणु पार्वति ॥ देवतापरमेशानि महात्रिपुरसुन्दरी ॥ विनियोगः समाख्यातो भुक्तिमु
क्तिप्रसाधने ॥ शिरसि मुखपङ्कजे च हृदये च प्रविन्यसेत् ॥ मातृकाः शृणु देवेशि सर्वपापविनाशिनी । य
त्रात्मीप्रमुखा देव्यो मातरः परिकीर्तिताः सर्वकामफलप्रदाः ॥ ऋषिसम्मोहनः प्रोक्तश्छन्दो गायत्र्यमुच्य
ते ॥ देवतेयं समुद्दिष्टा समस्तजननी परा ॥ शक्तयस्तु स्वरा देवि बीजं व्यञ्जनसञ्चयः ॥ विनियोगः समु
द्दिष्टः समस्तजनमोहने ॥ स्वरेण दीर्घयुक्तेन षडङ्गानि समाचरेत् ॥ हृदयं च शिरो देवि शिखा च कव
चं ततः ॥ नेत्रमस्त्रं न्यसेत् ---- नमः ॥ स्वाहा वषट् वौषट् हुं फट् मन्त्रान्योजयेत् प्रिये ॥ षडङ्गोऽयं मातृका
याः सर्वपदेश्वरः शिवे ॥ बालार्ककोटिरुचिरां स्फटिकाक्षमालां कोदण्डमिक्षुजनितं स्मरपञ्चबाणान् ॥ वि
द्यां च हस्तकमलैर्दधतीं त्रिनेत्रां ध्यायेत् समस्तजननीं नवचन्द्रचूडां ॥ व्यस्तपात्रास्तु जे कण्ठे स्वरान् षोडश
चिन्तयेत् ॥ हृत्पद्मे द्वादशस्थाने कादीन् द्वादश विन्यसेत् ॥ दशपात्रास्तु जे नाभौ डकारादीन्न्यसेद्दश ॥ ष
ट्पत्रे लिङ्गमध्यस्थे बकारादीन्न्यसेत् षट् ॥ आधारे चतुरो वर्णान् नाद्यन्न्यसेच्चतुर्दले ॥ हक्षौ भ्रूमध्यगोप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्ध ४०

द्वे ह्रिदले परिचिन्तयेत् ॥ इत्यन्तर्मातृकान्यस्य बहिर्न्यासं ततः शिवे ॥ अकारादिक्षकारान्ता मातृकाः परिकीर्त्ति
ताः ॥ प्रत्येकं कामबीजाद्याः सर्वकामफलप्रदाः ॥ चन्द्रबिन्दुसमायुक्ता नमोऽन्ताश्च प्रविन्यसेत् ॥ ललाटे मुख
वृत्ते च नेत्रकर्णौ सुघाणद्वति ॥ नासागण्डौष्ठदन्तेषु समुर्द्धास्ये सुशाङ्करि ॥ पाणिपादयुगस्याग्रः सन्ध्यग्रेषु
क्रमाच्छिवे ॥ पार्श्वे हृदये पृष्ठनाभिजठरेषु क्रमान्न्यसेत् ॥ यादीन् सधातुकान् देवि त्र्यक्षमेणैव तान्न्यसेत् ॥ त्व
गसृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः ॥ प्राणात्मा च जीवात्मा च परमात्मा तथैव च ॥ हृदये बाहुमूले
च तथा ककुत्प्रदेशके ॥ स्कन्धयोर्हृदयप्रान्ते पाणिपादयुगे तथा ॥ जठराननयोर्देवि सर्वाङ्गेषु क्रमान्न्यसे
त् ॥ ललाटेऽनामिकामध्यां विन्यसेन्मुखपङ्कजे ॥ तर्जनीमध्यमानामा न्यस्य वै तु नेत्रयोः ॥ अङ्गुष्ठं कर्णयोर्दे तंत्र
वि कनिष्ठाङ्गुष्ठकौ नसोः ॥ मध्याद्यास्तिस्रो गण्डयोश्च मध्यमामोष्ठयोः प्रिये ॥ अनामां दन्तयोर्देवि मध्यमामुत्तमा ४०
ङ्गके ॥ मुखेऽनामां मध्यमां च हस्तपादेऽथ पार्श्वयोः ॥ कनिष्ठानामिकामध्यास्तनसु पृष्ठेऽथ पार्वति ॥ तास्तु सा
ङ्गुष्ठका नाभौ सर्वाः कुक्षौ प्रविन्यसेत् ॥ हृदये च तलं सर्व्वं बाह्वोः ककुत्प्रदेशके ॥ स्कन्धयोर्हृदयप्रान्ते हस्तपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्युगे तथा ॥ जठरास्य युगे द्वितलमेव प्रकीर्त्तितम् ॥ एतास्तु मातृकासुरा: कर्मेण परिकीर्त्तिताः ॥ अज्ञात्वा
विन्यसेत् यस्तु न्यासस्स्यात्तस्य निस्फलं ॥ अनामया वा पुष्पे वा समनसा वा न्यसेद्गुरुः ॥ एवन्तु मातृकान्यासं यः
कुर्यात् परमेश्वरी ॥ सर्वज्ञत्वं पुजासु पूतो योगश्च जायते ॥ नातः परतरः मन्त्रं विद्यते क्वचिदेव हि ॥ येषां म
न्त्रो देवमानामृषीणामथ रक्षसां ॥ ते सर्वे मातृकामन्त्रे नित्यामेव प्रतिष्ठिताः ॥ सर्वमन्त्रमयश्चायं सर्वदे
वमयस्तथा ॥ चतुर्वर्गप्रदश्चायं तु पुष्टिप्रदायकः सर्वपीठमयश्चायं सर्वदेवमयस्तथा ॥ सर्वपीठमय
श्चापि मातृकान्यास उच्यते ॥ यः कुर्यान्मातृकान्यासं विधिनैव स्वरपूजनात् ॥ तस्माद्धिमे त्रिसन्तं भूतयामश्च तु
त्रिधः ॥ तं दृष्ट्वमपि देवाश्च सहायन्ति महौजसः ॥ स तु सर्ववशं कुर्यात्त्रैवत्याति परामन्वं ॥ पुटितां सर्ववर्णजित
समस्तजननीपरां ॥ पञ्चाशन्मातृकाविद्या जपेद्यस्तोत्तरः ज्ञाते ॥ वाग्देवतां हृदि ध्यात्वा सुर्द्धि सर्वाक्षराणि तु
स्थिधा च मातृकामन्त्रैः सन्त्रैमेव तु मेऽपि ॥ मन्त्रयित्वा महेशानि प्रभाते यः शिवेज्जलं ॥ स वाग्मी पण्डितो धी
मान् जायते प्रवरः कविः ॥ चन्द्रबिन्दुसमायुक्तान् स्वरान् पूर्वं पठेद्बुधः ॥ व्यञ्जनानि तु सर्वाणि केवलानि पठे

न्क्रिये ॥ जलं हस्तगतं तेन गृह्य पठित्वाक्षरसंहतिं ॥ अभिमन्त्र्य च तत्तोयं प्रथमं रश्मिकेः पिबेत् ॥ कुम्भके न हि
तीयं तु तत्तोयं रेचकेन तु ॥ एवं सकृत्त्रिवारं तु पीत्वा तोयं विचक्षणः ॥ दृष्टाङ्गः पतितो भूयात् पुत्रपौत्रस
मन्वितः ॥ त्रिसन्ध्यमथ यो नित्यं मातृकामन्त्रमन्त्रितं ॥ तोयाः कविसमाप्नोति सर्वान् कामांस्तथैव च ॥ सततं
कुरुते यस्तु मातृकामन्त्रमन्त्रितं ॥ तोयदानं महादेवि पूरकुम्भकरेचकैः ॥ स सर्वकामान् संप्राप्य पुत्रपौ
त्रसमन्वितान् ॥ भूत्वा महाकविर्लोके वलवान् सत्यविक्रमः ॥ सर्वत्र दुर्लभो भूत्वा चान्ते मोक्षमवाप्नुयात् ॥
राजानमथवा राजपुत्रं भार्यां वाप्रिये वशीकरोति न चिरान्मातृकामन्त्रपालकः ॥ ॥ इति
गान्धर्वे ऽष्टमः पटलः ॥ ॥ देव्युवाच ॥ षोडशाख्यां मातृकां देव कथयस्व प्रभो मम ॥ ईश्वर उवाच
गणेशः प्रथमो न्यासो द्वितीयस्तु ग्रहैर्मतः ॥ नक्षत्रैश्च तृतीयस्यात् योगिनीभिश्चतुर्थकः ॥ राशिभिः पञ्च
मो न्यासः षष्ठः पीठ निगद्यते ॥ षोडशान्यासोत्तरलयं प्रोक्तः सर्वकामफलप्रदः ॥ देव्युवाच ॥ फलं चास्य
प्रयोगं च विशदीकुरु तत्त्वतः ॥ ईश्वर उवाच ॥ नारायणो ऽस्य ऋषिः प्रोक्तः छन्दस्तम्बुदाहृतं ॥ शिव

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शकयात्मवर्णा ऋषिर्देवताचसमाशिवः ॥ हंसः शक्तिः परावीजं श्रीवीजञ्चैवकीलकं ॥ पुरुषार्थप्रसाध्येच
विनियोगः प्रकीर्त्तितः ॥ मुर्द्धिसंस्थिन्नयेद्देवि श्रीगुरुं शिवरूपिणं ॥ रमोर्थेअपरं पश्चात् हंसात्मराज्यमी
षितं ॥ विघ्नस्थाय वै प्राच्यामग्नयेनमस्ततःपरं ॥ विघ्नराजादिकांस्मैवं शक्तियुक्तान्तथैवच ॥ विन्यसेन्मा
तृकस्थानेमातृकान्वितंशिवे ॥ विघ्नराजायदेवेशिशिक्रियैनमस्ततपरं ॥ विनायकायतुष्ट्यैचशान्तैः श्रि
वोत्तमायचविघ्नकृत्तेतथापुष्ट्यैनमइतिप्रविन्यसेत् ॥ विघ्नकर्त्रेसरस्वत्यैनमइतिप्रविन्यसेत् ॥ विनाय
कायमधायैपूर्ववदथविन्यसेत् ॥ एकदन्तायकान्त्यैचद्विदन्तायवयामिनीं ॥ गजवक्त्रायमोहिन्यैनिरञ्जन
ज्ञेटेः तत ॥ कपर्द्दिनेवनीशायैज्वालिनीदीर्घवक्त्रकः ॥ शङ्कुकर्णायतन्द्रायैस्वरसाचवृषध्वज ॥ गगनाय
श्चकामिन्याराजेन्द्रश्चशुभातथा ॥ जयिनीशूर्पकर्णाश्चसत्यायाचत्रिलोचन ॥ लम्बोदरायविघ्नेस्यमह
नस्त्वरूपिणी ॥ कामदयाचतुर्मुर्त्तिःसदाशिवस्ततःपरं ॥ मदविह्वलायायुक्तआमोदाविक्टतयुतः दु
र्मुखायचघूर्णायैसुमुखोभूतिसंयुतः ॥ प्रदन्तायतथाभूम्यैएकपादोमतिस्तथा ॥ द्विजिह्वेरमयायु

गन्ध ८२

न्मुरसेनश्च मातुका॥ मकरध्वजयायुक्तोसौ स्थिरा परमेश्वरि॥ यमुनायाविकर्णाख्ये वरो भृङ्गयुतः
वासरेश्वाय लज्जाये दीर्घघोणायुतस्ततः॥ वज्रतुण्डो हिरण्यधनुर्धरायुतः प्रिये॥ सेनान्येश्चैव यामि-
न्यै ग्रामणीरान्विसंयुतः॥ मत्तश्चन्द्रिकयायुक्तो विमलाय शशिप्रभा॥ तथैव परमेशानि लोलयासम-
न्वितः॥ जटिमेचपलाक्षिरौपसुराडीऋषियुतस्तथा॥ खड्गी दुर्भगयायुक्तो वरेण्यः सुभगायुतः॥
मास्तव्यः परमेशानि शिवयान्वृषकेतनः॥ भक्तप्रियायदुर्गाख्ये मेघनादाय कामिनी॥ कालसुजासमा-
युक्तो गणेश्वरः प्रकीर्तितः॥ गणेशो विघ्नहारिण्यान्यस्तव्यः साधकोत्तमैः॥ सूर्यमुख्यान्गृहादे विन्यसेत्क-
मतुधानतथा॥ स्वरानपूर्वं समुद्धृत्य वज्रविन्दुसमन्वितान्॥ सूर्य्याय नम उच्चार्य हृदये च प्रविन्यसेत्
भ्रुवोर्मध्ये तथा सोमं यवर्गेण प्रविन्यसेत्॥ भुपुत्रं लोचने च नेत्रे कवर्गेण तथैव च॥ बुधं च हृदये देवि
चवर्गेण प्रविन्यसेत्॥ बृहस्पतिं तथा कण्ठे टवर्गेण प्रविन्यसेत्॥ भार्गवं तु गले देशे तवर्गेण तथा
प्रिये॥ पवर्गेण शनिं नाभौ राहुं गुह्यदेशे वर्गके॥ लक्षाभ्यां पादयोः केतुं न्यसेदेवं विधानतः॥ स्वरायस्वक्षि

तंत्र ८२

CC-0. In Public Domain. Digitization by eGangotri

तीयस्त्व अश्विनैनमऋत्यपि॥ ललाटेच प्रविन्यस्य तथान्यानपि विन्यसेत्॥ इं युतं भरणीं देवि दक्षनेत्रे
प्रविन्यसेत्॥ ईं उ ऊं कृत्तिकास्त्वेव विन्यसेद्वामनेत्रके॥ ऋं ॠं लृं लॄं युतान्देवि रोहिणीं दक्षकर्णके॥ ए
वं युतां मृगशीर्षाख्यां वामकर्णे प्रविन्यसेत्॥ ऐकारसंयुतां तथार्द्रास्त्व दक्षनासापुटेन्यसेत्॥ ओ औं पुनर्व
सुञ्चैव वामनासापुटेन्यसेत्॥ कं युतां च न्यसेत् पुष्यां कण्ठदेशे च पार्वति॥ खगाभ्यां त्व तथाश्लेषां
दक्षस्कन्धे प्रविन्यसेत्॥ घङाभ्यां च मघां देवि वामस्कन्धे प्रविन्यसेत्॥ चं पूर्वफल्गुनीं त्वेव दक्षकू
र्परकेन्यसेत्॥ वामकूर्परके देवि छंजं उत्तरफल्गुनीं॥ दक्षिणामणिबन्धे तु झंञं हस्तां त्व विन्यसेत्॥ म
णिबन्धे तथा वामे टठं चित्रां प्रविन्यसेत्॥ डंकारेण तथा स्वातीं दक्षहस्ततले न्यसेत्॥ ढणाभ्यां त्व विशा
खां वै वामहस्ततले ततः॥ तथाभ्यामनुराधां त्व न्यसेन्नाभौ समाहितः॥ दंधं ज्येष्ठां त्व कट्यां दक्षे त्रिभि मूला
ं त्व वामतः॥ पूर्वषाढां च वकारेण दक्षोरौ विन्यसेत्ततः॥ भकारेणोत्तराषाढां वामोरौ तदनन्तरं॥ दक्षजानुप्र
देशे च मं श्रवणां त्व विन्यसेत्॥ यं रं युतां धनिष्ठां त्व वामे जानुनि विन्यसेत्॥ ज्ञानसिंधां लकारेण दक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जङ्घाग्रे देवि ओके ॥ वेदांवर्णां स्थितां वामे पूर्वभाडपदं न्यसेत् ॥ तथैवोत्तरभाद्रञ्च पसैते दक्षपादतः ॥ लक्ष्मा
र्यां विन्दुसद्धार्यां रेवतीं विन्यसेत्ततः ॥ रत्नाश्विनी च श्वेतवर्णा पद्मुभाति हरां शुभां ॥ षडङ्गञ्च घघकेद्वे वहूल
रवहाङ्गमेव च अनुग्रासुग्रदं स्तुप्म्रस्वकांसां रिपुनाशिनीं ॥ पायसान्नप्रशस्ताघ्नस्तैरेकल्पितविग्रहं ॥ डा
किनीं भावयेद्देवीं सर्वकामप्रदूतलीं ॥ स्वरान् एवं समुद्धृत्य चन्द्रविन्दुसमन्वितम् ॥ चान्तदयं ततः य
श्चात् प्राणन्तु रायमेदितं ॥ नादविन्दुकलायुक्तं बीजक्षयमुदीरितं ॥ ठान्तं भान्तं सहाबीजं वारुणं वह्नि
वायवे ॥ वामकर्णस्ततो देवि नादविन्दुकलायुतः ॥ डाकिन्यै नमः इत्यन्ते सम्बोध्ये डाकिनीं ततः ॥ कुल्यान्तु
गतं उत्तुन्नाच तुर्थपदन्ततः ॥ लक्षकोटिपदस्यान्ते योगिनीस्वासिनीति च ॥ सर्वसत्ववशंकर्यां क
विशायपदन्ततः ॥ आज्ञां मे देहि तत्पश्चात्समग्निक्रिपदद्वयं ॥ क्षिप्रमुष्ट्रो विन्यसेद्देवि लाकिनीं श्चिन्तये
त्ततः ॥ हृत्पुण्डरीकमध्यस्थां दंष्ट्राभीमसुखीं तथा ॥ नवीननीरदश्यामां पीनोन्नतपयोधरां शूलं डमरु
कञ्चैव वज्रपद्मं च धारिणीं ॥ सुन्काम्वासनञ्चित्ताश्च क ठवर्णान्वविग्रहां ॥ कठवर्गास्ततो रेफे पूर्ववन्नस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रभेदिते॥ चान्तं हित्वाग्निबीजञ्च पूर्ववत् दनन्तरं॥ राकिण्येन समआभाष्य ससाध्यं च तथा भवेत्॥ असृक्
धातुगते पश्चात् षट्त्रिंशल्लक्षकोटिषु॥ योगिनी स्वामिनी प्राक्ते पूर्ववत् दनन्तरं॥ रक्तवर्णां त्रिनेत्राञ्च देव
देवेशसंयुतां॥ दंष्ट्रासुग्ररूपा सा च रुद्रशक्तिवरामयी दधती त्रिनयेत् देवी॥ गुडमकोऽसृकांपरां स्वं ध्या
त्वा महेशानी डफवर्णात्मविग्रहां॥ डफवर्णास्ततो देवि मृबीजं क्षितयन्तथा॥ वह्निं हित्वा महाबीजं पूर्व
वदपरन्तथा॥ साकिन्येन समं त्वा च्य ससाध्यं च तथा व्रजेत्॥ मांसधातुगते पश्चात् षोडशलक्षकोटिभिः
पूर्ववत्परं सर्वं नाभिपद्मप्रविन्यसेत्॥ स्वाधिस्थानस्य पद्मस्थ च काकिनीं परिचिन्तयेत्॥ पीतवर्णां
महासत्त्वां गजकुम्भोपमस्तनीम्॥ दधन्त्रासं तत्चिन्तां चतुरस्रवरवन्दिताम्॥ शूलं डमरुकञ्चैव पाश
ञ्चाभयमेव च॥ वहन्तीं परमेशानीं बादिलान्तात्मविग्रहाम्॥ बादिलान्तां स्तथा कांकी कमलं वयुत
तः॥ काकिन्येन समं त्यन्ते सम्बोध्य चैव काकिनीम्॥ मेदोधातुगते पश्चात् तथाष्टदलकोटिषु॥ योगि
निस्वामिनि प्राच्य पूर्ववत् दपरन्तथा॥ पञ्चवक्त्रां त्रिनेत्राञ्च वह्निभानुस्वरूपिणीम्॥ चापं बाणं तथा पाशं

गन्ध ४४

शृणिपाशं च पुस्तकं तथा ज्ञानमुद्रां च हस्ताब्जैर्दधतीं परमेश्वरीम् ॥ सुतृप्तां च गीतिसंयुक्तां मूलाधारे विचि-
न्तयेत् ॥ वादिसान्तां तथा शां शीं शां मलवरयूं तथा ॥ शाकिन्यै नमः इत्यनेन सम्बोध्य शाकिनीं त--तः अ-
स्थिधातुगते चैव चतुर्लक्षेति कोटिच योगिनीस्वामिनी प्राज्ञे वरवरदपदं तथा ॥ विद्युत्स्थाङ्गुकवर्णाभ्र-
हस्वर्णस्वरूपिणीम् ॥ डमरुं चाक्षसूत्रं च कपालं खड्गमेव च पुस्तकं ज्ञानमुद्रां च दधतीं बाहुभिः
सदा ॥ लोचनत्रयसंयुक्तां षड्वक्त्रां सर्वमोहिनीम् ॥ हरिद्राभ्रपसक्तां च मधुमदमुदान्विताम् ॥ देवेन्द्रव-
न्दितां देवीं भावयेच्छाकिनीं पराम् । हक्षं हं हीं स्वर्दे वे झीं हमलवरयूं तथा ॥ हाकिन्यै नमः उच्चार्य सम्बोध्य चैव
हाकिनीम् ॥ मज्जाधातुगते पश्चात् द्विलक्षकोटिज्ञोक्ताः ॥ ओं पूर्ववद्धृत्पद्मे भ्रुवोर्मध्ये प्रविन्यसेत् ॥
अकारादिक्षकारान्तां मातृकां सर्वसुस्वरेण ॥ यां यां तु पदमेश्वानि यमलवरयूं ततः ॥ याकिन्यै नमः इत्य-
नेन सम्बोध्य चैव तु याकिनीम् ॥ शुक्रधातुगते पश्चात् दशकोटिपदान्ततः ॥ पूर्ववच्च प्रविन्यस्य स्याज्ञिन्या समन्त-
परम् ॥ वेदारोर्दक्षगुल्फेऽथ मेयं विन्यस्य पार्वति ॥ दक्षजानौ पृष्ठ ऊर्वोः ... मिथुनं त्रिभिः ॥ स्वाभ्यां क

तंत्र ४४

र्दंकं कुक्षौ द्वाभ्यां स्कन्धेऽथ सिंहकम् ॥ अनुस्वारविसर्गाभ्यां शवर्गेण च कान्यकां ॥ दक्षिणोर्ध्व शिरोभागे विन्य
सेद्धा स्वविन्दिते ॥ तथा वामशिरोभागे कवर्गेण तुलां न्यसेत् ॥ चवर्गेण तथा स्कन्धे कृष्णिकं विन्यसेत्ततः ॥ टवर्गे
णा तुलां न्यसेत् ॥ चवर्गेण तथा स्कन्धे कृष्णिकं विन्यसेत्ततः ॥ टवर्गेण तथा कुक्षौ धन्विनं विन्यसेत्त
तः ॥ मकरं तु तवर्गेण पृष्ठे दक्षिणे न्यसेत् ॥ पवर्गेण तथा कुम्भं वामजानुनि विन्यसेत् ॥ पवर्गेणाक्षमा
रेणा मीनं गुल्फे तु वामके ॥ चतुर्थीनतिसंयुक्तं स्थानेष्वेवं क्रमान्न्यसेत् ॥ अथ पीठानि विधिना यथास्था
ने प्रविन्यसेत् ॥ पराणं च सर्वेषां मातृकाश्च पृथक्पृथक ॥ चतुर्थीनतियुक्तानि मातृकायं न्यसेत्
क्रमात् ॥ कामरूपं महापीठं वाराणसीं ततः परम् ॥ नेपालं च महापीठं पौण्ड्रवर्द्धनमेव च ॥ पुरस्थिरं
महादेवि चरस्थिरमतः परम् ॥ पूर्णशैलं महापीठं अर्बुदं च ततः परम् ॥ काश्मीरञ्च तथा पीठं कान्यकु
ब्जमथो भवेत् ॥ आम्रातकेश्वरं पीठं मेकाम्रं तथा शिवे ॥ त्रिस्रोतः पीठमुद्दिष्टं कामकोटमतः परम् ॥ कै
लाशं भृगुनगरं केदारं पीठमुत्तमम् ॥ श्रीपीठञ्च तथा स्कारं जालन्धरमतः परम् ॥ मालवञ्च कुलान्त

श्च वेदमातृकमेव च ॥ गोकर्णश्च ततो देवि माहेश्वरमेव च ॥ अट्टहासश्च विरजं राजगृहमतः परम्
पीठं कोल्लगिरिश्चैव ञ्चेलापुरमत प्रिये ॥ कालेश्वरं महापीठं प्रणावश्च जयन्तिकाम् ॥ पीठमुज्जयीनीचैव
क्षीरिकापीठमेव च ॥ हस्तिनापुरकं पीठं पीठमुद्दीश्रमेव च ॥ प्रयागश्चैव षष्ठीशं मायापुरजलेश्वरौ ॥
मलयश्च महापीठं श्रीशैलमथवापि च ॥ मेरुगिरिर्महेन्द्रश्च वामनश्चापि षष्ठिम्यमेतत् ॥ हिरण्यपुरकं पी
ठं महालक्ष्मीपुरश्चैव ॥ उड्डियानं महापीठं छायापुरमतः परम् ॥ षोढान्यासस्त्वयं प्रोक्तः सर्वपापहरः स
दा ॥ षोढान्यासविहीनो यः प्रणमेद्विसुन्दरीम् सोऽचिरान्मृत्युमाप्नोति नरकञ्चप्रपद्यते ॥ स्थ्यं न्यस
शरीरस्तु भवेन् गङ्गाधरः स्वरम् ॥ मन्त्रीन चात्र सन्देहो निग्रहानुग्रहक्षमः ॥ न तस्य पूज्यो लोकेऽस्मिन् तंत्र
पितृमातृसुरो नरः ॥ स्वयश्च माधकश्चे श्रेयं वश्च न विन्दति ॥ समर्थो मृत्युमाप्नोति नात्र कार्या विचा ४५
रणा ॥ नमस्कारं न कुर्वीतन्येषु स्थापि कदाचन गुरोरपि न पश्यन्ते म्रियन्ते नात्र संशयः ॥ तस्मात् सर्वप्रय
त्नेन नमस्कारं विवर्ज्जयेत् कामं क्रोधं तथा लोभं मायाहङ्कारमेव च ॥ सकस्पभोजनालाभं न कुर्यान्नकेनचि

न् सह ॥ मोक्तव्यं योगिनां सार्द्धं यतः किञ्चिन्न कस्यैव हि ॥ विन्यसेद्वियुक्तात्माग्नि कालश्च दिवानिशि ॥ यथासा
भ्यासयोगेन सामर्थ्यं तद्वदाम्यहम् ॥ यत्रायं निवसेद् विप्रो न्यासी च साधकः । दिव्यक्षेत्रं भवेत्तत्र समन्ता
द्दशयोजनम् ॥ देवाः सर्वे नमस्यन्ति तं नमामि न संशयः कृत्वा न्यासमिमं देवि यत्र गच्छति साधकः
तत्र यदि समये चैव वर्णानां संकुलैषैः सह ॥ यावन्तरीक्षभुशैलजलारण्यनिवासिनः ॥ भूतप्रेतपिशाचा
श्च यक्षकुष्माण्डराक्षसाः ॥ पश्यन्ति पावकाकारं ये चान्ये हिंसकाजनाः ॥ शङ्कसंहति सर्व्वोपि संग्रामेऽ
पांपदेषु च ॥ न मृत्युर्विद्यते तस्य परत्र शिवतां व्रजेत् ॥ ये केचित् पापसंघाताः सप्तजन्मान्तरोद्भवाः ॥ न
श्यन्ति न्यासमात्रेण भास्करेणातमो यथा ॥ सततान्यासयोगेन षण्मासेन च मानव ॥ दह्यन्ति सर्वपापा
नि ब्रह्महत्यादिकानि च किञ्चिन्निवरुन्नोक्ते न तु मसेहत्याम भवेत् ध्रुवं ॥ इति गन्धर्वतन्त्रे नवमः पटलः ॥
॥ ॥ ईश्वर उवाच ॥ करशुद्धिमथ विन्यासमासनञ्च ततः परं ॥ कराङ्गयोः षडङ्गानि च विन्यासमन
न्तरं ॥ नवयोनिं चतुर्व्यूहं तत्त्वन्यासादिकं तथा ॥ मूलवर्णादिविन्यासं सम्मोहनाख्यमेव च ॥ एतद्देव हि

CC-0. In Public Domain. Digitization by eGangotri

न्येस्यात् काम्यस्थान्यतृप्रकीर्त्तितं ॥ करशुद्धिकरीएवं त्रिपुरेतिपदन्ततः ॥ अमृतार्णवशक्तोपर्य्यासना
यनमो मनुः ॥ पादयोर्विन्यसेत् पश्चात् वालान्ते त्रिपुरेश्वरी ॥ पोताम्बुजासनायान्ते नमो जान्वोर्विन्य
सेत् ॥ ह्रीं क्लीं सौः त्रिपुरेत्युक्त्वा सुन्दरीति पदन्ततः ॥ ङेऽन्तमात्मासनायान्ते नमऊर्व्वोर्विन्यसेत् ॥ आदिम
ध्यं तथा तस्य श्रमार्य्या शिवसंयुतं ॥ त्रिपुरवासिनीत्युक्त्वा चक्रासनायहृत्ततः ॥ कटिद्वये प्रविन्यस्य शिवं सो
मयुतं कुरु ॥ एतस्याऽऽप्यविद्याया त्रिपुरश्री पदन्ततः ॥ सर्वमन्त्रासनायान्ते नमो गुह्ये प्रविन्यसेत् ॥ परा
च कामबीजस्थ वाग्भवान्त्येन्दुसंयुतं ॥ योनियुक्तं सबिन्दुञ्च त्रिपुरमालिनी ॥ ततः साध्यासनायमूले च न
म इति प्रविन्यसेत् मायाबीजं रमाबीजं कुमार्य्यास्वन्तृतीयकं ॥ तथा त्रिपुरसिद्धान्ते त्रिपुरसिद्धासनन्ततः ॥ ना
भिदेशे प्रविन्यस्य हृदये च प्रविन्यसेत् ॥ शिवं चन्द्रौ वह्निसंस्थो वाग्भवन्तदनन्तरं ॥ कामबीजं कुमार्य्या
स्तु शिवचन्द्राग्निसंस्कुरु ॥ पृथ्वीबीजात्ततो वह्निशक्तिबीजं ततः परं ॥ शिववह्नीन्दियोज्येव वह्निन्यासर्गन्तु वैस्वं
संयोज्य परमेशानि त्रिपुराम्बापदन्ततः ॥ सर्वगाः शक्तिपीठायनमो मूर्ध्नि प्रविन्यसेत् ॥ वदस्य शेषवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञाने महात्रिपुरभैरव ॥ सदाशिवमहाप्रेतपद्मासनाय चालिखेत् ॥ नमश्च त्यजवश्चेनु विन्यसेत् साधको
त्तमः ॥ वह्निवरुणाश्च च्छ्वपद्मस्वरविभूषितं ॥ नादविन्दुकलायुक्तं वशिनीति पदन्ततः ॥ वाग्देवताच्तु
र्थ्यन्त्यनमः स्वरैः प्रविन्यसेत् ॥ मादनं शत्रुसाहस्रं महामायान्तक्रूपरं ॥ इयं कामेश्वरी ज्ञेया कवर्गेणालङ्कृ
तके ॥ धान्तवरुणमिश्रञ्च चतुर्थस्वरविन्दुकं ॥ एषैव मोदिनी देवी भ्रूवोर्मध्ये चवर्गकैः ॥ वायुपुरन्दरं
द्विपञ्चस्वरविभूषितं ॥ नादविन्दुकलायुक्तं विमलेयं समीपिता ॥ नारतश्चात्र राठदेशे तु टवर्गेणावपा
र्विति ॥ ध्यानं भानस्त्र ज्वलनं तूरीयस्वरविन्दुकं ॥ अरुणाय न्तु वाग्देवी तवर्गेणा हृदि स्मृता ॥ जयिनी च
नतो देवि नकुलिः सोमशङ्कः ॥ वारुणं वायुवीजञ्च षष्ठस्वरविभूषितं ॥ नाभिदेशेषु समाख्याता पव
र्गेणावरानने ॥ ज्ञानं भानन्ततो रेफं वायुवीजसमन्वितं ॥ षष्ठस्वरसमायुक्तं नादविन्दुकलायुतं ॥ स
र्वेश्वरी यवर्गेण स्वाधिष्ठाना स्वपङ्कजे ॥ सम्वर्त्तं च महेशानि कालवीजोपरिस्थितं ॥ वह्निवीजन्ततो माय
नादविन्दुकलान्विता ॥ मूलाधारे शवर्गेण कौलिनी परिकीर्त्तिता ॥ एता वाग्देवता देवि वशिनी व प्रभृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्यसेत् ॥ मूलविद्याक्षिराम्न्यासर्वाङ्गुलितलेषु च ॥ ह्रुं नेत्रेषु पञ्चमे शक्तिं न्यसेद् गाङ्गानि षट्क्रमात् ॥ न
मः स्वाहा वषट् वौषट् हुं फट् इति षडङ्गकं ॥ करयोरथ विन्यस्य षडङ्गं च तथा न्यसेत् ॥ नमोऽन्तं हृदये हुं
न्तं स्वाहान्तकं तथा शिवः शिरसे वषट् चतुर्थे नाहं हुं नं कवचं ततः ॥ नेत्रत्रयस्य वौषडन्तं अस्त्रं फडन्तमीश्वरि
हृदयं मध्यमानामा तर्जनीभिः स्मृतः शिवः ॥ मध्यमा तर्जनीभ्यां स्यात् गुष्ठेन शिखा प्रिये ॥ दशभिः क
वचं प्रोक्तं त्रिसृभिर्नेत्रमीरितं ॥ तथैव काङ्गुलीभ्यामस्त्रं सशब्दमनुमीरितं ॥ पूजा तयोऽर्घ्य नाहोमः सिद्धम
न्त्रकृता अपि ॥ अङ्गविन्यासविधुना नन्दास्यन्ति फलान्यसौ ॥ वह्निनीपमुखान्येवं विन्यसेत्तदनन्तरं ॥ मू
लकुटत्रये तेषं स्थानेषु षट्क्रमान्न्यसेत् करायोश्चिबुके चैव शङ्खयोर्वदने पुनः ॥ नेत्रयोर्नासिके विन्यस्य
अंशयोर्जठरे ततः ॥ पुनः कूर्परयोः कुक्षौ जानुनोर्लिङ्गमूर्द्धनि ॥ पादयोर्गुह्यदेशे च पार्श्वयोर्हृदयाम्बु
जे ॥ स्तनयोः कण्ठदेशे च न्यसेदेवं विधानतः ॥ चतुर्भुजं ततो देवि न्यसेत् पीठसमन्वितं ॥ मूलवाग्भव
मुच्चार्य अग्निचक्रे पदन्ततः कामगिर्यालये पश्चात् मित्रीशपदमुद्धरेत् ॥ नाथात्मके पदं पश्चात् कामे

श्वरीपदन्ततः ॥ सूर्य्यात्मशक्तिशाख्यात्श्रीपादुकामेनमोन्यसेत् ॥ आधारेपरमेशानिहृदयेचततःपरं ॥
मूलत्रितयमुच्चार्य्यसूर्य्यचक्रेपदन्ततः ॥ जालन्धरपदान्तपीठंषष्ठीशानाथशब्दतः ॥ आत्मकेपदमामाप्य
वज्रेश्वरीपदन्ततः विस्वात्मशक्तिशाख्यानेपूर्ववत्तदीरितं ॥ शक्तिहृंसमुच्चार्य्यसोमचक्रेपदन्ततः ॥ पू
र्णागिरिपदान्तेचपीठंपञ्चमतःपरं ॥ ॐउड्डीशपरेनोदेविनाथात्मकेपदन्ततः ॥ तदन्तेयोजयेद्देविभग
पूर्वांचमालिनी ॥ ब्रह्मात्मशक्तिशाख्यानेपूर्ववत्हृद्दलेन्यसेत् ॥ सूर्य्यबीजमथोच्चार्य्यब्रह्मचक्रेपदान्तत
तथैवोड्याणपीठंतुवर्ण्णनाथात्मकेपदं ॥ तदन्तेपरमेशानिमहात्रिपुरसुन्दरी ॥ परंब्रह्मात्मशाख्यन्तेपूर्व
वत्ब्रह्मरन्ध्रके ॥ विन्यसेदेवंमहेशानितत्वन्यासंसमाचरेत् ॥ मूलान्तिब्रह्मरन्ध्रान्तंमूलान्तंपुनरेवहि मू
लवाग्भवमुच्चार्य्यआत्मतत्वपदन्ततः ॥ व्यापिकायैचतुर्थ्यन्तामहात्रिपुरसुन्दरी ॥ नमइतिप्रविन्यस्य
कामराजमतःपरं ॥ विद्यातत्वपदान्तेसर्व्वंपूर्ववत्हृदयावधि ॥ न्यसेत्सामीयबीजान्तोशिवतत्वस्वरू
पिणी ॥ मूलाद्विब्रह्मरन्ध्रान्तंतदिम्केलतावधि ॥ ततोन्यसेन्महादेविविद्याकूटत्रयंपृथक् ॥ कारयो

मूलमध्याग्रे मूलहृन्मुणान्ते ॥ मूलविद्यात्रयार्हन्न्यास्थानेषु पुनःक्रमान्न्यसेत् ॥ ब्रह्मरन्ध्रे तुरीयस्त्वं तेनैव या
पकेन्न्यसेत् ॥ ब्रह्मरन्ध्रं तथाधारे हृदि नेत्रत्रये तथा ॥ कर्णयोर्मुखवृत्ते च भुजयोः पृष्ठदेशके ॥ जानुद्वये
तथा नाभौ मूलवर्णान् प्रविन्यसेत् ॥ स्वयं मन्त्रतनुर्भूत्वा देवीं मन्त्रमयीं यजेत् ॥ त्रैलोक्यमहतीं ध्यायन्
श्रीविद्यां मनसि स्मरन् ॥ योनिमुद्रां महेशानि ब्रह्मरन्ध्रे प्रविन्यसेत् ॥ ललाटे च प्रविन्यस्य स्वकर्माध्ये च
घिन्यसेत् ॥ मुखे कण्ठप्रदेशे तु हृदये नाभिमनुक्रमात् न्यासः सम्मोहनाख्योऽयं त्रैलोक्यमोहनक्षमः ॥
देव्युवाच ॥ अन्तर्योगविधिं ब्रूहि योगविधिन्तथा ॥ ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि यज्ज्ञानस्था
नं महत् ॥ मनोजीवात्मनः शुद्धिः प्राणायामेन जायते ॥ अन्तर्गतं यत्त्वपलं तत्त्वशुद्धं प्रजायते ॥ प्राणाया
मैर्विना देवि सन्तं तव कर्मनिरर्थकं ॥ प्राणायामात् परं तत्त्वं प्राणान्नामात् परं तपः ॥ प्राणायामात् परं ज्ञानं प्रा
णायामात् परं योगं प्राणायामात् परं ध्यानं ॥ नास्ति नास्ति पुनर्नास्ति कथितं न वसुव्रते ॥ वत्सरेणाभ्यासयोगे
न ब्रह्मसाक्षाद्भवेद्ध्रुवं ॥ चैतन्याचरणाय क्षतक्षीयते नात्र संशयः ॥ प्राणायामं विना मुक्तिमार्गो नास्ति मे यो

CC-0. In Public Domain. Digitization by eGangotri

दित॥ प्राणायामेन मुनयः सिद्धिमाहुर्नचान्यथा ॥ प्राणाभ्यासपरो योगी न योगी शिव एव सः ॥ रामनाग
समं वायोः प्राणस्य धारणा तथा ॥ प्राणायाम इति प्रोक्तो योगशास्त्रविशारदैः ॥ प्राणो वायुरिति ख्यात आ
यामस्तन्निरोधनं ॥ प्राणायाम इति प्रोक्ता योगिनां योगसाधने ॥ वाह्यादापूरणं वायोरुदरे पूरको भवे
त्॥ संपूर्णं कुंभवद्वायोर्धारणं कुंभकं भवेत्॥ वहिर्यद्रेचनं वायोरुदराद्रेचको भवेत्॥ प्रवाञ्च यथाश
क्त्याहृत्कं ततश्चतुर्गुणं ॥ कुंभकार्द्धं भवेद्रेचं प्राणायामोऽयमीरितः ॥ कनिष्ठानामिकांगुष्ठैर्यन्नासापु
टधारणं ॥ प्राणायामं स विज्ञेयस्तर्जनीमध्यमे विना ॥ वामया पूरयेद्वायुं शनैः शनैस्सुमध्यया ॥ धार
येद्दक्षया मुंचेद्द्वयं तत क्रमात्क्रमात् ॥ यावच्छक्यं निषेव्याथ मननं मनसैव स्मरन् परं ॥ सर्वस्य सुखवी
जनाः समस्तं वाजपन्प्रिये ॥ मूलाधारे त्रिकोणाख्ये कोटिसूर्यसमप्रभे ॥ ध्यायेत् कुण्डलिनीं नित्यं कामा
नन्दशिखोपमां ॥ रक्तां सूक्ष्मां त्रिकिम्बस्य सृष्टिस्थितिलयात्मिकां ॥ विश्वातीतां ज्ञानरूपां चिन्तयेदूर्द्ध्ववा
हिनीं ॥ उच्चारोच्चारणेनैव समुत्थाय परां शिवे ॥ षट्चक्रं च विनिर्भिद्य पापयित्वा परं शिवं परमानन्दे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नसंयोज्य परमानन्दरूपिणीं ॥ तद्भेदसमापन्नामनाकुलमनाः स्मरेत् ॥ श्रावयित्वा सुधाधारां प्लावये
च्छकिमरकलं तेनैव चक्रभेदेन मूलाधारं समानयेत् ॥ मूलादिब्रह्मरन्ध्रान्तं विद्युत्तन्तुस्वरूपिणीं ॥ उद्यत्
सूर्यसहस्राभां ध्यायेन्मन्त्रात्मदेवतां ॥ कुण्डलीं त्रिविधां तत्र तथा बीजत्रयं त्रिधा ॥ तुरीयां कुण्डलीं सूक्ष्मरू
त्रिपुरसुन्दरीं ॥ वाग्भवं मूलदेशे च द्रवत्स्वर्णनिभं स्मरेत् ॥ मूलादि हृदयं यावद्वह्निकुण्डलिनीं तथा
हृदये कामराजं च सूर्यकोटिसमप्रभं ॥ सूर्यकुण्डलिनीं तत्र सूर्यकोटिसमप्रभाम् ॥ हृदयात्तालपर्य
न्तं ध्यायेदत्राकुलशिवे ॥ भ्रूमध्ये शक्तिबीजं तु कोटिचन्द्रसमप्रभम् ॥ भ्रूमध्याद्ब्रह्मरन्ध्रान्तं चन्द्रकुण्ड
लिनीं शिवे ॥ चन्द्रकोटिसमप्रख्यां श्रवदमृतविग्रहां ॥ बीजत्रयमयीं बिन्दोस्तुरीयां बिन्दुत्रयात्मिकां ॥ दे
शकालानवच्छिन्नां सर्वतेजोमयीं स्मरेत् ॥ तुर्यकुण्डलिनीं तत्केवलं ज्ञानविग्रहं ॥ एवं ध्यात्वा पुन
र्ध्यायां सम्पूर्णमनसा स्मरेत् ॥ चिदानन्दमयीं स्वच्छामेकात्मकतया प्रिये ॥ स्वधाहृद्धाभिपतन्त्या तर्प
येत् परदेवतां ॥ ध्यात्वा ध्यात्वा पुनर्ध्यात्वा सहजानन्दविग्रहः ॥ बिन्दुभूतनसुधाभिस्तु तर्पयेच्च पुनः पुनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तर्यागइतिप्रोक्तोजीवतोमुक्तिदायकं ॥ मुनीनाञ्चमुमुक्षुणामधिकारोऽत्रकेवलंयानःसायस्त्वरन्नित्यं
षोडशप्राणसंयमं ॥ नाशयेत्सर्वपापानितृणराशिरिवानलः ॥ सर्वेषामेवपापानांप्रायश्चित्तमिदं
स्मृतं ॥ स्वदेहस्तंयथासर्पैश्चर्मोन्मज्यनिरामयः ॥ प्राणायामान्तथामुञ्चेद्विषयात्मकर्मकं ॥ परो
पपापजंपापंपरद्रव्यापहारजं ॥ परस्त्रीमैथुनोत्पन्नंप्राणायामशतंदहेत् ॥ महापातकजातानिब्रह्म
हत्यादिकानिच ॥ सर्वाणिपेतानिदह्यन्तेप्राणायामचतुःशतैः ॥ नमःशक्तिसमाख्यातापश्चात्स्यःपञ्चदे
हगः ॥ एकरूपंशिवंज्ञात्वातदङ्केतांनिवेशयेत् ॥ शून्यरूपेपरेस्थाप्यतावुभौसमसास्थितौ ॥ चिन्तये
त्साधकोनित्यानादरूपंतयोःक्रमात् ॥ तदन्तस्मिन्सात्मानंज्योतीरूपंसनातनं ॥ समाधिनासमाराध्य
त्यजेत्संसारबन्धनं ॥ ॥ इतिगन्धर्वतन्त्रेदशमःपटलः ॥ ईश्वरउवाच ॥ अथवापरमेशा
नीलीलाकलितविग्रहः ॥ हृत्पुण्डरीकमध्यस्थांनिगृह्येन्द्रियमानसः ॥ तन्मनाःसाधकवरोमनसा
पूजयेच्छिवां ॥ वामकरस्यतर्जन्यांदक्षिणस्यकनिष्ठया ॥ तथादक्षिणतर्जन्यावामाङ्गुष्ठेनयोजयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्ध
५०

उत्तानं दक्षिणाङ्गुष्ठं वामस्य मध्यमाद्विका ॥ अङ्गुलीयोजयेत् पृष्ठे दक्षिणस्य करस्य च ॥ वामस्य पितृतीर्थे
न मध्यमानामिके तथा ॥ अधोमुखं तु तं कुर्याद् दक्षिणस्य करस्य च ॥ रक्तपुष्पं गृहीत्वैवं विधाय पाणिकच्छ-
पं ॥ कुर्यात् हृदयाम्भोजे निमील्य नयनद्वयं ॥ समकायशिरोग्रीवं कृत्वासनपरिग्रहः ॥ पश्यन्नेवं ततो देवि-
मेकाग्रमनसा ततः ॥ प्रताक्षीकृतहृदये मानसैरुपचारकैः ॥ षोडशानां प्रकारैस्तु हृदिस्थां पूजयेच्छिवां ॥ आ-
सनं प्रथमं दद्याज्जलं सिंहासनं शुभं ॥ पाद्यं चरणयोर्दद्याच्छिरस्यर्घ्यं निवेदयेत् ॥ परमामृतपानीयमा-
वपुष्पे सुवासिते ॥ स्वर्णपात्रे जलं कृत्वा दद्यादाचमनं मुखे ॥ मधुपर्कं ततो दद्यात् पुनराचमनं ततः
स्नानमेमराजुलं कृत्वा पयस्कं परिभावयेत् क्षीरतः पादुके दत्वानीतानां स्नानमन्दिरे भद्रासने नापविद्याय
उद्वर्तनं समाचरेत् ॥ घृतेनोद्वर्तनं कृत्वा स्नानमनापरिभावयेत् ॥ कर्पूरागुरुकस्तूर्या तथा मृगमदेन च ॥
रोचनाकुङ्कुमैस्मिश्रैर्नानागन्धसमन्वितैः ॥ सुगन्धिदिव्यतैलैश्च स्नापयेत् परमेश्वरीं ॥ देवकन्यासहस्रै-
स्तु स्वर्णकुम्भसमस्थकैः ॥ नदीभिर्नदराजैश्च अस्मरोरगपन्नगैः सिद्धतावारिणास्नानं चिन्तयेत् पारदेव

तन्त्र
५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ता ॥ दुकुलेर्म्मार्जितं गात्रं दुकुले परिधेन्तथा ॥ कङ्कतीकेशसंस्कारो विधिम्बधनं तथा ॥ मुक्तावलीकेशपाशे
सिन्दूरकेशमध्यमे ॥ ललाटे तिलकन्दद्याद् अलकोरदनच्छदे ॥ नेत्रेषु रञ्जनं कृत्वा गन्धैर्गात्रानुलेपनं
कास्त्वनास्वितकञ्चुली शोभनं हृदयोपरि ॥ विभूषणानि ततो दद्यात् सुवर्णरजतादिना ॥ शिरकर्णग्रीवा
दीनि उज्वलाभरणानि च ॥ नुपुरौ च ततो दद्याद् आनन्दहारसुउज्वलं ॥ अन्यदाभरणाश्चैव यत्रयेन विरा
जते ॥ श्रीरत्नपादुके दत्वा चक्रमध्ये समानयेत् ॥ गन्धपुष्पञ्च धूपञ्च दीपं नैवेद्यमेव च ॥ हेमपात्रगतं
दिव्यं परमान्नं सुसंस्कृतं ॥ कपिलाघृतसंयुक्तं नानाव्यञ्जनसंयुक्तं ॥ भक्ष्यं भोज्यं तथा लेह्यं पेयं चो
ष्यं तथैव च ॥ क्षीरपाणीयसंयुक्तं दधिमधुसमन्वितं ॥ सकर्पूरञ्च ताम्बूलं मानसं परिकल्पयेत् ॥ म
नसापि महादेव्यै नैवेद्यं दीयते यदि ॥ यो नरो भक्तिसंयुक्तः स दीर्घायुः सुखी भवेत् ॥ माल्यं पञ्चसहस्र
स्य मनसा यः प्रयच्छति ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ स्थित्वत वपुरस्त्री मानुसाश्चैभे
मा भवेत् क्षितौ ॥ मनसा तु महादेव्याः कुर्याच्च प्रदक्षिणां ॥ स दक्षिणो यमगृहे नरकानि न पश्यति

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्ध ५१

नमनं मानसं देव्या यो भक्त्याकुरुते नरः॥ सोऽपि लोकान् विजित्यैव नरलोके महीयते॥ महामायां महा
देवीं समर्च्चयामि शक्तितः॥ नानाविधैस्तु नैवेद्यैररतिचित्ताकुलस्तु यः॥ नैवेद्यं देहि नित्यं मिति यो
भावयेत् मुहुः॥ सोऽपि लोकान् विजित्यैव देवीलोके महीयते॥ वहिर्द्रव्यपूजाद्यं मनसैव समाचरेत्॥ नव
वराणशक्तीनां पूजनं मनसैव हि॥ इत्थं मन्त्रः समाराध्य मनसैव जपेन्नन्तु॥ तदा भवति सिद्धीशो र
ववद्विहरेत्क्षितौ॥ एवमेवं महेशानि पूजयामि महेश्वरी॥ योगिनो मुनयश्चैव पूजयन्ति सदा प्रिये
केवलं मानसेनैव नैव सिद्धो भवेत् गृही॥ सवाह्येन तु तेनैव गृहस्थो मुनिपुङ्गवः॥ पार्वत्युवाच॥ ध्यान
योगं महादेव श्रोतुमिच्छामि हे प्रभो॥ संपूर्णं कथये शान्त येन सिद्धो भवेत् परः॥ ईश्वर उवाच॥ विना
न्यासैर्विना पूजां विना जप्यैः पुरश्क्रियां॥ ध्यानयोगाद्भवेत् सिद्धो नान्यथा खलु पार्वति॥ ध्यानयोगादहं
सिद्धो विष्णुर्ब्रह्मा पितामहः॥ ध्यानयोगात् परं सिद्धा नरा अपि पापिनः॥ सर्वतन्त्रेषु यत् गुह्यं सर्वसि
द्धिप्रदायकं॥ विना येन न सिध्यन्ति वर्षकोटिशतैरपि॥ ध्यानयोगं प्रवक्ष्यामि सर्वज्ञत्वप्रदायकं॥ प्र

तंत्र ५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कान्तिविजनेरम्यकृतासनपरिग्रहः ॥ निमृताखिलविद्भूतिर्मूर्त्तसमुदितविग्रहः ॥ कारणानन्दसम्मोहैर्ष्याहि
रन्नप्रपूरितः ॥ शुक्लसन्निधिधानेन सोऽस्मीतिपुरोधृतः ॥ एकांसन्तावयेद्भ्रमात्मजीवस्यब्रह्मणोःऽपिच
चारणे सर्वभूतानां तत्त्वान्यपि च चिन्तयेत् ॥ बीजभावेनलीनानिस्युतश्चमात्परमात्मनि ॥ एवंवि
चिन्त्य देवेशि पार्थिवांशं जलेगतं ॥ जलञ्च तेजसो रूपं तेजोरूपं विचिन्तयेत् ॥ निर्वाणावायुना
वह्निं वायुनाथ विचिन्तयेत् ॥ आकाशेः संहृतं वायुस्तच्च मनसि लीयते ॥ मनोऽहंकारवशगं तथा वे
मनसि स्थितं महान्तं प्रकृतौ सा नं चिन्तयेत्परमेश्वरि ॥ मुमुक्षुश्चिन्तयेल्लीनां प्रकृतिं परमात्मनि
नाहो नरात्रिर्नस्म्यान्नसूर्यो नैव चन्द्रमा ॥ इदन्नामामयं सर्वमासीद्भुवनवर्जितं ॥ अप्रज्ञातमलक्षञ्च
प्रसुप्तमिव सर्वतः ॥ चिन्तयित्वा महेशानि न किञ्चिद्रूपिभावयेत् ॥ एकमासीत् परंब्रह्म नित्यं सूक्ष्मम
तीन्द्रियं ॥ विन्यावन्दमयं धाम तेजोरूपं सनातनं ॥ तदेव प्रकृतिः सा तु तेजोरूपा सनातनी ॥ नित्यानन्द
वपुर्देवी तद्रूपा तत्प्रकाशिनी तयो योगाद्भूत्सृष्टिः परमामृतरूपिणी ॥ परिपूर्णमिदं देवि समस्तं

CC-0. In Public Domain. Digitization by eGangotri

ग्लावयेत्तया ॥ तथाम्भसि तमात्मानं चिन्तयेत् साधकोत्तमः ॥ बुद्बुर्दविभिन्नयेत् तत्र प्रकृतिं चिन्तयेत् परां
प्रकृते हि महान्नैवे अहङ्कारमहन्ततथा ॥ अहङ्कारान्मनस्तस्य वमनमसः खमसुत्थिते ॥ आकाशाद्वायुमाकृ
ष्य वायोस्तेजः समुत्थितं तेजसो जलमासाद्य जलाद्भूपृथिवीं स्मरेत् ॥ बहिरुत्क्रमय यथास्थाने निवेश्य विधि
नाततः ॥ हेमं वुस्वाराढ्यमेभिस्यात्मूबीजेन दृढं स्मरेत् ॥ प्राणवेनाभिधाकृत्वा जलौघैः परिपूरयेत् ॥ ब्र
ह्माणं भान्यौरेतोयं तदधो मेकसमाचवयं ॥ तस्य पृष्ठे महादेवि कालाग्निरुद्ररूपकं ॥ आधारशक्तिं तत्रै
वमूलप्रकृतिरूपिणीं ॥ ब्रह्मशिलासमारूढां कूर्माकारांशशिप्रभां ॥ पद्मदयधरान्देवीं कूर्मस्यमू
र्द्धधारिणीं ॥ नीलाभ चिन्तयेत्कूर्मं मनमन्नं कुन्दसन्निभं ॥ तस्य मूर्द्धि स्थितं देवि श्वेतवाराहरूपकं ॥ त
मालस्यामलोदन्ते धारणं वसुन्धरां ॥ तान्च संचिन्तये तत्र नीलेन्दीवरधारिणीं ॥ चिन्तयेत् सलिलैः पूर्णं
चतुःसागरमेखलां ॥ तन्मध्ये चिन्तयेद्देवि सुधासागरमद्भुतं ॥ रक्ताभमसृतं तत्र शुक्लाभस्रोपमं
तन्मध्ये चिन्तयेद्देवि दिव्यद्वीपं विद्रुमसन्निभं ॥ गिरिराजशताकीर्णपरितस्तु वनं महत् ॥ गिरौ सर्वागिरिश्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कल्पोद्यानेगिरेस्तटे ॥ अस्यकाशोकपुन्नागपाटलैः कुब्जैस्तथा ॥ लवङ्गमाधवीविल्वैश्चदारुणामेहुभिः
मन्दारपारिजातैश्च कल्पवृक्षैः सुपुष्पितैः ॥ सर्वतोऽलङ्कृतं दिव्यैर्नित्यपुष्पफलङ्गमैः ॥ चन्दनैः कर्णिकारैश्च
मातुलुङ्गैः करञ्जकैः ॥ द्राक्षेक्षुन्नाजम्बुभिर्मधूकैराम्रकैरपि ॥ दाडिमीच्युतपनसैः पूगैः कर्पूरकैरपि ॥ क
दलीकुब्जरवज्रमुनारिकेलैरलङ्कृतं ॥ कदम्बैः करवीरैश्च भङ्गैर्नागकेशरैः ॥ यावन्तोभूरुहापृथिभिर्वज्रैर्द्रुम
नैकैरपि ॥ मालतीमल्लिकाजातीकेतकीशतपत्रकैः ॥ अन्यैः सुगन्धिपुष्पाद्यैः शोभितं यूथिकादिभिः ॥ अ
न्याभ्यासमन्तवल्लीभिर्वृक्षपरीष्वसमाश्रितं ॥ सर्वर्त्तुकुसुमोपेतैर्नमद्रिरूपशोभितं ॥ मन्दमारुतसञ्चि
न्त्रैः सुमायोद्दिष्टसुखं ॥ उत्फुल्लकुसुमामोदप्रहृष्टमत्तभृङ्गसंकुले ॥ कूजत्कोकिलसंह्लेनवाचालितदि
गन्तरे ॥ बालमेघसमालोकनृत्यद्बर्हिवृन्दके ॥ शारिकाशुकपक्षौघैः कूजत्कलरवैर्युते ॥ द्वन्द्वभावप्रकु
र्वद्भिर्मृगैर्नानाविधैरपि ॥ सरित्सरोभिराच्छादैः शोभितं कुसुमोत्पलैः ॥ तेषु सरःसु विपुलं महासरसा
न्तं ॥ सर्वतोऽलङ्कृतं दिव्यं समस्तकाञ्चनपङ्कजं ॥ मत्तषट्पदनिर्घोषं सुशकुन्तैश्च कलस्वनैः ॥ हंसकारण्डु

वाकीशतैश्च सौम्यैः सारसैरपि ॥ तन्महासरःपुलिने रत्नसोपानमण्डिते ॥ महारससमाम्भोलवीचिविक्षेपशी-
तले ॥ सर्वकामदुघं दिव्यं सर्वरत्नसमन्वितं ॥ मौक्तिकैः कुसुमैः श्रीभिर्दुकूलैः स्वर्णतोरणैः ॥ स्मरेत्तु क-
ल्पतरुं तत्र तदधो रत्नभूमिकां ॥ विस्तीर्णां सुमहद्व्याप्तां तन्मध्ये रत्नमण्डपं ॥ परितः पारिजातांश्च था-
स्वरं शशिशीतले ॥ उद्यदादित्यसंकाशं रत्नसोपानमण्डितं ॥ शतयोजनविस्तीर्णं चतुर्द्वारसमन्वितं
चतुर्दिक्ष्वमदेहल्या भान्तं वज्रकपाटकं ॥ रत्नसंकल्पसंशोभितकवाटस्तवकसंयुतं ॥ नानारत्नविशोभा-
ढ्यं रत्नप्रकारमण्डितम् ॥ नवरत्नसमाकॢप्तं तुङ्गगोपुरतोरणम् ॥ तत्र तत्र विनिःक्षिप्तनानारत्नोप-
शोभितम् ॥ महामरकतस्थल्या युक्तं विद्रुमवेदिभिः ॥ शिखरैः स्फटिकैर्नीलैः हेमकुम्भोज्ज्वलत्कृतम् ॥ च-
न्द्रस्मेरतपद्मरागगैर्वज्रभित्तिषु निर्मितैः ॥ पुष्पैर्विविचित्रैर्वितानैर्मरकतैर्हेमतोरणैः ॥ सर्वर्तुकुसुमपवनैर्वर्ध-
मणोत्तमैर्विराजितम् ॥ हेमदण्डशिखालम्बिध्वजावलिपरिष्कृतम् ॥ स्वस्वस्थानस्थितावस्थैर्लोकपा-
लैरधिष्ठितम् ॥ सिद्धचारणगन्धर्वैर्विद्याधरमहोरगैः ॥ किन्नरैरप्सरोभिश्च क्रीडद्भिरुत्सदित्सुखम् ॥

नृत्यसङ्गीतनिरतैरप्सरोभिर्गणैर्युतम्॥ नवरत्नसमाबद्धस्तम्भराजिविराजितम्॥ तप्तहाटकसंकॢ
प्तवातायनमनोहरम्॥ नानारत्नांशुकोद्बद्धसुवर्णशतकोटिभिः॥ किङ्किणीमणिसन्नद्धपताकाभिरल
ङ्कृतम्॥ मरकमाणिकावैदूर्यरत्नचामरभूषितम्॥ जातरूपमयै रत्नैश्चित्रैरतिविस्तृतैः॥ माणि
क्यरत्नवैदूर्यस्वर्णमालावलीयुतैः॥ अन[…]नानारसम्बद्धरत्नैर्दृष्टिमनोहरैः॥ विचित्रैश्चित्रवर्णैर्वि
तानैरुपशोभितम् स्थूलमुक्ताफलोद्दाममलम्बमानैरलङ्कृतम्॥ उपर्युपरिविन्यस्तनिलयं पृथ
क्पृथक्कॢप्तैः कक्षिभूमिभिः नानापर्यङ्कशय्यजनासनैः॥ दिव्योपकरणोपेतं सर्वकालसुखावहम्॥
दुकूलक्षौमकौषेयैर्नानावर्णैर्विराजितम्॥ स्रग्भिर्विचित्ररूपाभिर्मत्तशिञ्जयदङ्घ्रिभिः॥ चन्द
नागुरुकर्पूरमृगनाभिविलेपितम्॥ चन्दनागुरुकर्पूरधूपधूपितमनोहरम्॥ नानाकुसुमसौरभ्य
वाहिगन्धवहान्वितं नन्दनोद्यानमध्यस्थमप्यकल्पतरोरपि॥ एवं सञ्चिन्त्य मनसा समरालसुमनो
हरम्॥ तन्मध्ये स्फुरितं ध्यायन्महामाणिक्यमण्डपम्॥ शास्त्रदृनिभंष्ठन्नं सुकामामाणिक्यमणिरत

गन्ध ५४

म् ॥ हेमदण्डशिखालम्बिश्वेतचामरभूषितम् ॥ तदधःस्थांस्मरेद्रक्तां महामाणिक्यवेदिकाम् ॥ ऊर्ध्व
देशेस्फुरितरत्नां ॥ रत्नस्तोपशोभिताम् ॥ वेदिकां वेदिकास्थाने सिंहासनं ततोपरि ॥ तस्याग्नेय्यादिकोणे
षु धर्म्मादिकांस्तु संस्मरेत् ॥ दिक्षु धर्मादिकांस्तत्र चिन्तयेद्गात्ररूपिणः ॥ रक्तश्यामहरिद्रेन्द्रनील
भासः पादरूपिणः ॥ वृषकेशरिभूतेन रूपान् धर्म्मादिकान् स्मरेत् ॥ प्रसूनतूलिकां तत्र सिंहासनस्य
मध्यमे ॥ तन्मध्ये परमेशाय तत्सर्वतन्त्रात्मकाम्बुजम् ॥ आनन्दकन्दस्सेवात्रसम्बिन्नालन्तथैव च
प्रकृतिविकाररूपद्वात्रिंशत्पत्रकेशरम् ॥ पञ्चाशद्वर्णबीजाख्यकर्णिकापरिमण्डितम् ॥ कर्णि
कायां स्मरेत्सूर्यं तन्मध्ये सोममण्डलम् ॥ वह्निमण्डलमध्ये तु सत्वस्वपरिचिन्तयेत् ॥ रजश्च तत्र
सञ्चिन्त्य तमोऽपि च तन्मध्यतः ॥ ज्ञानतत्वात्मनश्चैव मायातत्वात्मनस्तथा ॥ विद्यातत्वात्मनो देविक
लानतत्वात्मनो यजेत् ॥ ब्रह्मविष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ एते पञ्च महाप्रेताः चतुर्दिक्षु च सं
स्थिताः ॥ सदाशिवोपरि गतं त्रिभङ्गं स्फातिरव्ययम् ॥ तस्य मध्ये महापद्मपीयूषपरिपूरितम् ॥ सुधाणी

तंत्र ५४

CC-0. In Public Domain. Digitization by eGangotri

वासनेनतस्त्रिपुरांप्रकटेश्वरीम् ॥ योनामुद्रासनेनातद्ध्यायेत्त्रिपुरेश्वरीम् ॥ चिन्तयेत्साधकोभ
क्त्यारुद्रयोगिन्यधिश्वरीम् आत्मासनगतांतत्रस्मरेत्त्रिपुरसुन्दरीम् ॥ तुष्टतरेश्वरीं देवीं चक्रासनेवि
चिन्तयेत् ॥ त्रिपुरवासिनीं देवीं सम्प्रदायगणेश्वरीम् ॥ सर्वमन्त्रासने देवि चिन्तयेत्त्रिपुरश्रियम्
कुलकौलेश्वरीम् देवीं साध्यासनगतां ततः ॥ त्रिपुरमालिनीं प्रोक्तां गर्भयोगिनीश्वरीम् ॥ सिद्धास
नेन ततः पश्चात् सिद्धां त्रिपुरसूक्तिकाम् ॥ पर्यङ्कशक्तिपीठेतु त्रिपुराम्बां विचिन्तयेत् ॥ कामेश्वराङ्कप
र्यङ्कसमासीनां परांबलाम् ॥ रक्तपद्मनिभां देवीं वालार्ककिरणारुणाम् ॥ जवाकुसुमसङ्काशांदा
डिमीकुसुमप्रभाम् ॥ पद्मरागप्रतीकाशांकुङ्कुमोदकसन्निभाम् ॥ स्फुरन्मुकुटमाणिक्यकिङ्किनी
जालमण्डिताम् ॥ कालालिकुलसङ्काशकुटिलालकपल्लवाम् ॥ प्रत्यग्रारुणसङ्काशवदनाम्भोजमण्ड
लाम् ॥ पिनाकिधनुराकारसुभ्रुवं परमेश्वरीम् ॥ आनन्दमुदितोल्लासलीलाललितलोचनां ॥ किञ्चि
दर्द्धेन्दुकुटिलललाटमदुपट्टिकाम् ॥ स्फुरन्मयूखसंघातविलसद्धेमकुण्डलाम् ॥ सुगण्डमण्डला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध ५५

मोगजितेन्दुसुतलोचनाम्॥ विश्वकर्म्मादिनिर्म्माणसूत्रविस्पष्टनासिकाम्॥ ताम्रविद्रुमबिम्बान्तर्द्धि
म्बोष्ठीसम्मतोपमाम्॥ दाडिमवीजवज्राभदन्तपंक्तिसुशोभिताम्॥ रत्नदीपस्फुरज्ञासजिलमूलवि
राजिताम्॥ स्मितमाधुर्य्यविजितमाधुर्य्यरससागराम्॥ अनौपम्यगुणोपेतचिवुकोद्देशशोभिताम्
कम्बुग्रीवां महादेवीं स्फुरत्तालललितैर्भुजैः॥ रक्तोत्पलदलाकारसुकुमारकराम्बुजाम्॥ कराम्बुजनखज्यो
तिर्विराजितनभस्थलाम्॥ मुक्ताहारलतोपेतपीनोन्नतपयोधराम्॥ त्रिवलीवलनायुक्तमध्यदेश
सुशोभितम्॥ लावण्यसरिदावर्त्ताकारनाभिसुशोभिताम्॥ अनर्घ्यरत्नघटितकाञ्चीयुक्तनितम्बिनी
म्॥ नितम्बबिम्बद्विरदरोमराजीवराम्बुजाम्॥ कदलीललितस्तम्भसुकुमारोरुमीश्वरीम्॥ लावण्य तंत्र
कदलीतुल्यजङ्घायुगलमण्डिताम्॥ गूढगुल्फपदद्वन्द्वप्रपदाजितकच्छपाम्॥ नूपुरैर्विलसत्पाद ५५
पङ्कजातिमनोहराम्॥ ब्रह्मविष्णुशिरोरत्ननिघृष्टचराम्बुजाम्॥ तनुदीर्घाङ्गुलीभास्वन्नखचन्द्रविरा
जिताम्॥ शीतांशुशतसङ्काशकान्तिसन्तानहासिनीम्॥ लौहित्यजितसिन्दूरवज्रदाडिमरागिणीम्

CC-0. In Public Domain. Digitization by eGangotri

रक्तवस्त्रपरीधानां रक्ताभरणभूषिताम् ॥ इच्छाशक्तिमयं पाशमङ्कुशं ज्ञानरूपिणम् ॥ क्रियाशक्तिम
यं बाणं धनुर्षी दधतीं पराम् ॥ कर्पूरशकलोन्मिश्रताम्बूलपूरिताननाम् ॥ महामृगमदोद्दामकुसुमाढ्या
चित्रलाम् ॥ सर्वशृङ्गारवेशाढ्यां सर्वाभरणभूषिताम् ॥ जगदाह्लादजननीं जगद्रञ्जनकारिणीम् ॥ जगदा
कर्षणकरीं जगत्कारणरूपिणीम् ॥ सर्वदेवमयीं देवीं सर्वमन्त्रमयीं पराम् ॥ सर्वलक्ष्मीमयीं साक्षा
त्परमानन्दरूपिणीम् ॥ निर्लेपं निर्गुणं शुद्धमात्मानं त्रिपुरामयम् ॥ आत्माभेदेन सा श्रीश्च त्यजति न
न्मयतां नरः ॥ सोहमित्यस्य सततं चिन्तनात्तन्मयो भवेत् ॥ तामेव चिन्तयेद्देवि त्येनोत्किञ्चित्तया विना
तत्तेजोभिरिदं सर्वं परिपूर्णं विभावयेत् ॥ एवं भावनया हृष्टो देववद्विहरेत्क्षितौ ॥ ध्यानयोगपरस्या
स्य पूज्यो नास्तीह कश्चन ॥ स एव सुकृती लोके स पूज्यो न तु पूजकः ॥ योगात्मा योगविज्ज्ञानी स देवो न तु
मानुषः संन्यासी स च विन्यासी युक्तात्मा समुनिर्मतः ॥ नासाध्यं वर्त्तते तस्य स सिद्धो योगिपुङ्गवः ॥ इन्द्रिय
प्रीणनैरस्या पधेन्नमस्ययेत् सदा ॥ आत्मानमेव सततं पूजयेद्देवताधिया ॥ देववद्विहरेन्नित्यकालयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गपरायणाः ॥ यत्पश्यति यत्शृणोति गीतनृत्यादिकञ्च यत् ॥ परिदधाति यत् किञ्चित् स्वयं यत्तु लिम्प
ति ॥ कस्तूर्यम्बरखण्डादि यद्दातोऽपि साधकः ॥ यत्करोति यदश्नाति तत्तत्सर्वं देवताधिया ॥ विषयानपि
चीमुञ्जानो यानेव स्वमनोत्थान् तत्तत्समस्तमात्मसात् यत् तत्सर्वं देवताधिया ॥ आग्रहादिसुयुञ्ज्यन्तं स
र्वं तद्देवताधिया दिव्यभावो भवेत्तत्र येन सिद्धो भवेन्नरः ॥ दिव्यस्त्वभवेत् सिद्धो नैव चान्यस्य चन तस्मा
द्दिव्यपरो यस्तु देवीमानन्दरूपिणीम् पूजयेत् सततं भक्त्या महात्रिपुरसुन्दरीम् ॥ मोक्षार्थी लभते मोक्षं
ध्यानयोगपरायणाः ॥ तान्तु यश्चिन्तयेज्ज्ञो भोगी ध्यानपरायणाः ॥ कामेश्वराङ्कपर्यङ्कं समासीनां
परां कलाम् ॥ सर्वाङ्गसुन्दरीं हृद्यां प्रसादसुमुखेक्षणाम् ॥ सकृत्तामभिध्यायन् सर्वाङ्गसुमनोद्यत्
चतुर्वर्गं करे तस्य जीवन्मुक्तः स एव हि ॥ ॥ इति श्रीगन्धर्वतन्त्रे एकादशः पटलः ॥ ॥

पार्वत्युवाच ॥ बहिर्योगविधिं ब्रूहि साङ्गं च परमेश्वर ॥ विशेषाद्यस्य संस्थानं नितः जननमेव च ॥ ईश्वर
उवाच ॥ नारङ्गीमन्त्रिकां ध्यात्वा त्रिधामानं स्वतन्मयम् ॥ तेनैव मूलमन्त्रेण शिरोदेशात् देवहि ॥ स्वकीयकु

सुमंदद्यादङ्कस्या सम्पुनस्तथा॥ चैतन्यं सर्वभूतानां यद्धदुल्लासोऽहमीश्वरः॥ सोऽहमित्यस्य सततं चिन्त
नाद्देवरूपता॥ आत्मनो जायते सम्यग्भावनान्नात्र संशयः॥ एवोपकरणस्यापि देवत्वमिह जायते
सर्वेषां देवतारूपत्वाज्जायते शुद्धतापि च॥ अहं देवो यतस्तेन गंधपुष्पगन्धादिकं स्वयम्॥ देवाधारोऽस्म्यहं देवो
न देवो मत्परः क्वचित्॥ देवमेव यजे चाहं देवदेवोऽहमेव च॥ यदि वा स्यार्घ्यनाडव्यासस्यत्तिरपि विद्य
ते॥ विशेषार्घ्यादिकं देवि तदा कुर्यात्तदन्तितः॥ पूजार्घ्यपात्रनैवेद्याद्याधारस्थानपात्रकम्॥ सर्वं तास्त्र
मयं कुर्यात् यत्किञ्चिदिह पूजने॥ ताम्रे देवाः प्रमोदन्ते ताम्रे देवाः स्थिताः सदा॥ देवी प्रीतिकरं ताम्रं
तस्मात्ताम्रं प्रयोजयेत्॥ पञ्चशुक्तिरजतश्च गौरिद्वयानां पात्रमिष्यते॥ महाशङ्खं सुवीराणां कल्पं अव
नवासिनाम्॥ अथाङ्कुलस्य सम्पूर्णं माक्षिकं सार्द्धपाणितः॥ सर्वेषामेव पात्राणां मानमेवं विधीयते॥ प
ञ्चरत्नैर्महादेव्याः पञ्चपात्राणि कारयेत्॥ सामान्यञ्च विशेषञ्च पाद्यमाचनीयकम्॥ कुत्र का पि च प
ते रत्नैः कुर्याद्विभूतये रत्नं गगनसंज्ञं च स्वर्गरत्नं तथैव च॥ मर्त्यपातालरत्नौ च नागरत्नं तथैव च॥

गन्ध
५७

गारुडञ्चैव माणिक्यं वज्रं वैदूर्यमेव च ॥ नीलञ्च क्रमतो भिद्यां पञ्चरत्नानि योजयेत् ॥ वीजपञ्चकमेते
षां क्रमाद्धस्ये सुदुर्लभम् ॥ गासो च सप्त नाः पञ्चादि दस्थाः क्रमतः प्रिये ॥ नादविन्दुकलायुक्ता वावक
र्णादि भूषिता ॥ तर्पणार्थं विशेषेण चक्रपूजानिवेदने ॥ श्रीपात्रं साधयेद्धीमान् विधिना साधकोत्तमः
योनिमुद्रां विधायादौ कुर्याद् दृष्ट्यस्य साधनम् ॥ आत्मभागचक्रयोर्मध्ये चतुरस्रन्तु कारयेत् ॥ तन्मध्ये चैव ष
ट्कोणान्तन्मध्ये वृत्तसुत्तमम् ॥ त्रिकोणान्तत्र संलिख्य चन्दनेन वरानने ॥ मण्डलं तं समभ्यर्च्य साधये
दासनेन तः ॥ वालावीजत्रयं देवि नत्वा त्रिपुरसुन्दरी ॥ अर्घ्यपात्रासनञ्चैव साधयामीति साधयेत् ॥ त
थैवास्त्रेण पुनर्या सामान्यार्घोदकेन तु प्रक्षाल्य परमेशानि मण्डले स्थापयेत्ततः ॥ वह्निमण्डलरूपन्तं
कलाभिः सह पूजयेत् ॥ पूर्ववत् परमेशानि पात्रं प्रक्षाल्य साधकः ॥ विशेषार्घ्यपदान्त्यात्रं प्रतिश
व्यादन्नान्तरम् ॥ स्थापयामीति मनुना संस्थाप्य तदनन्तरम् ॥ सूर्य्यमण्डलरूपन्तं कलाभिः सह पूजयेत्
पूजयेत्तं विधानेन विन्दुस्कन्नसुधामये ॥ मातृकां प्रतिलोमेन मूलाभिमन्त्रितां सतैः ॥ आदिमैः पूरये

तंत्र
५७

वापिन थापुष्पासवैरपि॥ कपिलायास्तथा क्षीरैर्नारिकेलाम्भनैरपि॥ इक्षुरसैः सुगन्धैश्च मधुरत्रितये
नवा॥ पूरयेत्तं महापात्रं नानाद्रव्यैः कदाचन अधिकारिप्रभेदेन द्रव्यभेदा भवन्ति हि॥ स्वयम्भूकुसुमन्त
त्रेकर्पूरागुरुचन्दनैः॥ रोचनाकुङ्कुमैस्मिश्रं कस्तूरीपरिभावितम्॥ निक्षिपेत्परमेशानि सर्वकामप्र
संयुताम्॥ पूर्वोक्तमण्डलं तत्र सन्निन्यस्य साधकोत्तमः॥ अङ्कुशमुद्रया पश्चात्तीर्थं वै प्रार्थयेत्ततः॥ ऋ
जुमध्यामध्यपर्वाक्रान्तातर्जन्यधोमुखी विज्ञेयाङ्कुशमुद्रेयं कुञ्चितामध्यपर्वतः॥ सौरमण्डलतः पश्चा
त्तीर्थं वै प्रार्थयेत्तु मावाहयेत्तथा॥ गङ्गावतारमन्त्रेण सर्वैस्तीर्थगणैः सह॥ गङ्गापि यमुना याति
पूजापात्रजलं प्रति॥ मीनमुद्रां विधायाथ हस्ताभ्यां पात्रमुत्तमम्॥ आच्छाद्य परमेशानि चिन्तयेत्तीर्थ
मागतम्॥ अधमुखावुभौ हस्तौ सव्यस्योपरि च संस्थितौ॥ पार्श्वद्वयगताङ्गुष्ठौ मीनमुद्रेयमीरिता मा
णिक्यं मौक्तिकं देवि विद्रुमं गारुत्मतं तथा॥ पुष्पराग तथा वज्रं नीलं गोमेदकं शुभम्वैदूर्यं नवरत्नानि त
त्रनासि नियोजयेत्॥ रत्नेशीं पूजयेत्तत्र सर्वपापविनाशिनीम्॥ श्रीबीजञ्च पराबीजं तथैव बीजपञ्च

गन्ध
५८

कमम्॥ पूर्ववीजेविलोमेनुततत्पश्चात्विनियोजयेत्॥ इयदेवहृदादेवीरत्नेश्रीयंनमाक्षरीवडङ्गानि
चषट्कोणेषुवीजानिप्रपूजयेत्॥ तन्मध्येपरमेशानिहृन्नपूर्णेन्दुसन्निभम्॥ चन्द्रमण्डलरूपंत
मनन्तेपरिचिन्तयेत्॥ कलाभिरतंप्रपूज्याथचिन्तन्मध्यमण्डले॥ अकथादित्रिरेखाख्यंहक्षाभान्तर
मध्यगम्॥ तदग्रेकामरूपञ्चजालन्धरञ्चवामतः॥ दक्षेपूर्णगिरिञ्चैवमध्येचोड्डियानकं॥ तस्य
मध्येयजेद्देवींचतुर्व्यूहस्वरूपिणीं॥ सूर्यकोटिप्रतीकाशांचन्द्रकोटियुतप्रभां॥ तथादशभुजांदेवींप
ञ्चवक्त्रांत्रिलोचनां॥ खड्गखेटकपट्टीशमुद्गरांश्शूलदन्तकं॥ विभ्रतीखेटकंशक्तिंवरदाभयपा
णिनीं॥ तस्योत्सङ्गेस्वयंदेवीचन्द्रकोटियुतप्रभां॥ हिमकुन्देन्दुधवलांपूर्णेन्दुध्वक्रोद्यतां॥ ग्रह तंत्र
सन्तींविशालाक्षीदेवदेवस्यसन्मुखे॥ एवंध्यात्वासमावाह्यकुलाकुलमयंविभुः॥ अमृतीकरणंकु ५८
र्यान्मुद्रयाधेनुसंज्ञया॥ अवगुण्ठ्यततोमन्त्रीनीराजायतलोचने॥ सकलीकरणंकुर्यात्षडङ्गेनच
पूर्ववत्परमीकरणंकुर्यान्महामुद्रिकयाततः॥ सुषलमुद्रिकांयोनिंगालिनींञ्चप्रदर्शयेत्॥ वाम

मुष्टिन्तेनैकृष्टदक्षिणेसवशाङ्गुली ॥ वामाङ्गुष्ठस्याग्रदेशे योजिता दक्षिणादयः ॥ मुष्टिं कृत्वा तु हस्ताभ्यां वाम
स्यापरि दक्षिणां कुर्यान्मुसलं मुद्रेयं सर्वविघ्नविनाशिनि ॥ कनिष्ठिकाङ्गुष्ठकौ सक्तौ करयोरितरेतरं ॥ तर्ज
नीमध्यमानामाः संहतामुक्तवर्जिता ॥ मुद्रेयं मालिनी प्रोक्ता परमामृतदायिनी ॥ शिवचन्द्रौ मातृका
न्तकालशक्राख्यवह्नय ॥ वायुस्ववामकर्णेन योजिता विन्दुवादिनः ॥ बीजमेतत्समुच्चार्य तथा चानन्द
भैरवम् ॥ ॐ ऽस्त्रं शारदामन्त्रयुक्तं पुनर्बीजानि संलिखेत् ॥ चन्द्रं हित्वादिदं कुर्यात्तत्कर्णे वामाक्षि योजयेत्
स्वधादेव्यैस्ततो बोधद्वितीयमानन्दभैरवी ॥ अनेन तौ तु संयोज्य परमानन्दनन्दितौ ॥ तदामृतेन योर्योगाद्
मृतं क्षरते चिरं ॥ तयोः पश्चात्पश्चादेवामृतःपश्चान्नियोजयेत् ॥ प्रथमं प्रकृतेर्हंसः प्रतद्विष्णुरनन्तरं त्रैयपु
रुषस्तृतीयः स्याच्चतुर्थस्तत्पदादिकः ॥ विन्दुर्यानिंपयादिस्तु पञ्चमः परिकीर्तितः ॥ दशधा प्रजपेद्विद्यां सम्य
गमृतसिद्धये ॥ वाग्भवं कामबीजञ्च सर्गवानमृतयुग्मकं ॥ तथामृतेपदं कुर्यात्पश्चादमृतोद्भवेस्तथा
अमृते श्वापि तथेत्युक्ता पश्चादमृतवर्षिणि अमृतं स्रावयद्वन्द्वं वह्निजायावधिर्मनुः ॥ वाग्भवं यद्युग्मस्त्र वा

CC-0. In Public Domain. Digitization by eGangotri

गन्ध
५९

वाग्वादि निजवाग्भवं ॥ कामबीजं क्लीं नैन्द्रुतानां कैयिनिकैरुद्दयेन्निज ॥ महाशोभं कुलद्रव्यं कामबीजं समन्वितं ॥ ता
नीयं मोक्षमित्युक्ता कुलद्रव्यं वदेत्ततः ॥ शक्तिबीजं तु नखान्तेसमीपकमनुः श्रियै ॥ सन्दीपनादिकं कृत्वा वोर
धिन्या बोधयेत्ततः ॥ कृताञ्जलिपुटो भूत्वा स्मरेन्मन्त्रं वरानने ॥ पूर्वं लिखितं ब्रह्माण्डखण्डसंभूतमित्यादिम
पि चितस्फुरणान्मुर्दि यन्नमत्र ॥ एवं पात्रं तु कुर्यात्स्व वटुकादेः पुनर्भवेत ॥ गुरुपात्रं त्रयं स्त्रीणां एकमेकं मानवो
भवेत् एवं भवन्ति पात्राणि नैवेद्यं मानितु ॥ पञ्चपात्रं भवेन्मध्ये मध्यमं त्वेकपात्रकं ॥ गुरवे गुरुपुत्रा
यतत्पत्नीतनमसमर्पयेत ॥ वराह्यौ वरपात्रं निवेद्यात्मनि योजयेत् ॥ एवमेव वान्तोर्द्धविभवेदमन्त्रमुत
मं ॥ कुलाग्रेण समादाय अमृतं सर्वपावनं ॥ गुरुत्रयं स्व समन्यौ वटुकाद्यन्त्र पतर्पयेत ॥ ॐ आईज्वलतिज्योति
रेवाहं ब्रह्माहमस्मि सोहमस्मि अहमेवाहं मां जुहोमि स्वाहा ॥ एवमयान्तलसं कोशे सिद्धमौ जुहुयात्ततः ॥ आ
त्मनः कुण्डलिन्याश्च कृत्वा वेवलमप्युके ॥ वीजत्रयं यतास्त्रिः प्राङ्मुद्यानन्द संज्ञया ॥ विधुक्रान्तम्भेनाः स्तो.
योग्यः स्यात्योगकर्मणि ॥ अमृतं तत्वं कवितस्वप्नशमयामृतं लभेत्त्वा ॥ संशानादस्य पात्रस्य भूमौ विन्दुनिपा

तंत्र
५९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तनात् ॥ अष्टुभस्यान्तदातस्य होमाच्छादिनिर्मचाभ्यतः ॥ प्रोक्षयेत्तेन वाम्नान्तं मूलेन चास्त्रेण वा ॥ पूजोपकर
णान्यापिस्विषमुख्यन्तयेवहि ॥ असृतैः प्रोक्षितं यत्तु सर्वं कुस्ममयं भवेत् ॥ सर्वेषां देवमुख्यानां मूलमुख्यार्थ
सर्वतः ॥ अर्घ्यपात्रस्य तोयेन तत्पुष्पाणि नाम्नानि वेदयेत् ॥ अन्यतोयेस्तु संस्पृष्टं अर्घ्यपात्रस्थितेन तु वै ॥ तत्कारणम्
तीर्थदेवीदत्त विधिश्चानेतोपि ॥ इति श्रीगन्धर्वतन्त्रे सप्तदशः पटलः ॥ ईश्वर उवाच ॥ आधारशक्ति
मारभ्य कामेश्वरान्तमण्डिके ॥ पूजयेत् साधको भक्त्या पीठमन्त्रसमन्वितः ॥ ॐ कारबिन्दुमध्यस्थं नामध्वयाद्य
मध्यगं ॥ देवतानां स्वबीजान्तं पूजायां सिद्धिसिद्धिदं ॥ कामपीठं ततो ध्यात्वा पूजयेत् साधकस्तथा ॥ देवं का
मेश्वरं तत्र त्र्येकवक्त्रं चतुर्भुजं ॥ तस्याङ्कं तु मध्य हृदि रक्तारुणास्यं कुङ्कुमैः ॥ त्रिशूलखड्गपिनाकस्त्वं वामहस्ततः
दयस्थितं ॥ उत्पलं बीजपूरं च दक्षिणाहितयेत्तथा ॥ श्वेतपद्मपरिस्थं च ध्यात्वा मध्येण पूजयेत् ॥ ज्ञानयायु
क्तायदेवि साधकः परिचिन्तयेत् ॥ आत्मध्यानापरः पश्च मूलदेव्याः समं निशि ॥ ज्ञानवाख्येन यजेद्दे
वं पूर्वोक्तेन च साधकः ॥ सपत्न्यां मूले मूर्त्या पूर्वं महात्रिपुरसुन्दरी ॥ अमृतपदसन्नायां चैतन्यमूर्तिमादिम

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्पयामीति मनुनामूर्त्तिं संचिन्तयेत्तथा ॥ देवीं कामेश्वरांकस्थां परमानन्दनन्दितां ॥ साधकाग्रयच्छन्तीं
पुरुषार्थचतुष्टयं ॥ आनन्दालसयादृष्ट्या वीक्षन्तीं करुणार्द्रया ॥ नाराचमुद्रया पश्चाद्रक्ष्यमन्त्रेण कारयेत्
अवगुण्ठनतो मन्त्री कुर्याद्दिग्बन्धनन्ततः ॥ प्राणायामं ततः कृत्वा गृह्णीयात्कुसुमाञ्जलिं विनो देवीं वा वाहये
त्कचपदं ॥ ततो ध्यायेन्महादेवीं यथोक्तां परमेश्वरीं ॥ एतस्य श्रीक्रमय हृदये जितप्राणोऽथ साधकः ॥ स्वे कायस
म्भूतयेद्देवीं वासाग्रान्नर्मुक्तियुग्मयोः ॥ ततस्तु वायुबीजेन वह्निना सम्पुटेन तु ॥ तत्रैव तन्त्रयामि निःसार्य्यपुष्पा
ञ्जलौ निवेशयेत् ॥ नासिकावायुनिःसारात्पुष्पस्थादेवता भवेत् ॥ यावत्संस्थापयेद्देवीं स्वहस्तेन वियो
जयेत् ॥ कृत्वैधियोजहस्तस्य पुष्पात्तस्मान्महेश्वरि ॥ गन्धैः पूज्यते देवी पूजकेनोप्यते फलं ॥ त्रिखण्डमु
द्रया तस्मात्तामावाहनं विधाय च ॥ निर्गमर्यांति देवीं श्रीपीठान्तान्निधारयेत् ॥ पाणिद्वयसमस्य कपरि
वर्त्तनयोगतः ॥ योजयित्वा तर्जनीभ्यां मध्यमे चापि ततः ॥ मध्यमे योजयेन्मध्ये कनिष्ठेन तथा ततः ॥ अङ्गु
ष्ठावपि संयोज्यो त्रिधा युग्मक्रमेण तु ॥ त्रिखण्डेयं महामुद्रा त्रिपुराह्वानकर्म्मणि ॥ हंसबीजसमारूढा वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाचाग्यामनस्थिता ॥ अनयामुनमुद्रार्यमुद्रयाथः त्रिखण्डया ॥ महापद्मवनान्तःस्थेकारणानन्दवि-
ग्रहेसर्वभूतहितेमातरेह्येहि परमेशानि ॥ देवेशिभक्तिसुलभे परिवारसमन्विते ॥ अस्यांसमागच्छ स्थि-
तिमनन्कृपयाकुरु ॥ एहिदेविप्रभावाने शुभदे भयनाशिनि ॥ यावत्वांपूजयिष्यामि तावत्वंसुस्थिराभव ॥
कामेश्वरित्वमिहागच्छ सर्वैः परिकरैः सह ॥ पूजाकर्म्मणि सान्निध्यमिह कल्पय कामिनि ॥ कामेश्वरि समाग-
च्छ कामेशाङ्कस्थिते प्रिये ॥ अव्युच्छिन्नां मतिं शुद्धां वाचं कण्ठस्य देहि मे ॥ एवं कृते महादेवि स्थितिस्तस्याः
पुजायते ॥ सम्यक्संपूरितः पुष्पैः कराभ्यां कल्पितोऽञ्जलिः ॥ आवाहनी समाख्याता मुद्रा सर्वार्थसाधिका
अधोमुखीकृता सैव तदा वै स्थापनी भवेत् ॥ मिलितं मुष्टियुगलं सन्निधापनरूपिणी ॥ अन्तरङ्गुष्ठमुष्ट्या-
तु सन्निरोधनरूपिणी एतस्याएव मुद्रायास्तर्जनीसवनेयदा ॥ अवगुण्ठनमुद्रेयं सर्वरक्षाकरी मता ॥ अम-
तीकरणं कुर्यात् साधको धेनुमुद्रया ॥ परिवर्त्य करौ पश्चात् तर्जनी मध्यमे युगे ॥ कनिष्ठानामिकायुग्मंय-
रस्परयुतं कुरु ॥ धेनुमुद्रेयमाख्याता अमृतीकरणे प्रिये ॥ अङ्गमन्त्राण्यसेद्देवि देवाङ्गे साधकोत्तमः ॥ सक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध
६१

मीकरणं नाम मुद्रेयं चाखिलप्रियकारिणी ॥ अन्योऽन्यग्रथिताङ्गुष्ठा प्रसारितकराङ्गुलिः ॥ महामुद्रेयमाख्याता प
रमीकरणे शिवे ॥ ततोऽवगुण्ठये देवीमवगुण्ठनमुद्रया ॥ आवाहनमवेद्देवि धुरादाह्वानमेव च ॥ संस्थापनं
मवेद्देव्या निश्चलत्वोपपादकं । नैकट्यावस्थितित्वं च सन्निधानमितीरितं ॥ अनन्यचित्तत्वयाज्ञा सन्निरोध-
नमुच्यते ॥ सम्पूर्णावस्थितेर्याज्ञा सकलीकरणं प्रिये ॥ अयोग्यदृष्टाविषयता पादे न सवगुण्ठनं ॥ आनन्दपू
र्णावस्थितित्वममृतीकरणं प्रिये ॥ सर्वपराधजातानां सहिष्णुत्वप्रकाशकं ॥ परमीकरणं नाम संसार्थं नामि
होच्यते ॥ सम्मुखमुद्रया देवीं सम्मुखं प्रार्थयेत्ततः ॥ मुष्टिद्वयास्थिताङ्गुष्ठौ सम्मुखौ च परस्परं ॥ संश्लिष्टावुद्धि
तौ कुर्यात्सेयं सम्मुखमुद्रिका ॥ मूलविद्यां च समुच्चार्य महात्रिपुरसुन्दरी ॥ श्रीपादुकां ततः पश्चात्पूजया
मीति भक्तितः ॥ देवीपादाम्बुजद्वन्द्वे पुष्पाञ्जलित्रयं दिशेत् ॥ तथैव तर्पयाम्यन्ते मुद्रया तर्पयेत्त्रिधा ॥ प्रार्थन
मुद्रया शम्भ्वा न्यर्थयेदनेन तु ॥ प्रसादसुमुखे देवि त्रिपुरसुन्दरि ॥ पूजाभागं गृहाणेमं मामकं भक्तव
त्सले ॥ अहं यद्यपि देवेशि त्रिगुणे बलोऽप्यल्पसाधनः ॥ भक्त्या करोमि पूजां ते कृपया नु गृहाण मां ॥ प्रसृताङ्गुलि

तंत्र
६१

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोहस्तौ मिथः क्षिप्तौ च सम्मुखौ ॥ कार्य्या च हृदये सेयं मुद्रा प्रार्थनसंज्ञिका ॥ सन्ध्याय तत्त्वबीजपूर्वं मुद्राश्
मानव ॥ संक्षोभद्रावणाकर्षवश्योन्मादमहांकुशाः ॥ खेचरीबीजयोन्याख्या नवमुद्रास्ततः क्रमात् ॥ एता मुद्रा
महेशानि बन्धूककुसुमप्रभास्तु मुद्राः सर्वाः श्रीविद्यासम्मुखीः स्मरेत् ॥ अथैवं परमेशान्या उपचारान्नि
वेदयेत् ॥ भक्त्यैवैतेष्वन्तादेवे साधकं देवसन्निधिं ॥ चारयन्ति यतस्तस्मादुच्यन्ते ह्युपचारकाः ॥ समीप
चारणा ह्यपि फलानां येन तथोदिताः ॥ नमोऽन्तमासनं दद्यात् स्वागतं दर्शनं भवेत् ॥ नमोऽन्तं पाद्ययोः पा
द्यमर्घ्यं शिरसोऽन्तमेव च ॥ स्वधेत्याचमनं प्रोक्तं मधुपर्कं तथैव च ॥ तेनैव मनुनाचामं नमोऽन्तं स्नानमे
व च ॥ नमोऽन्ते वाससी प्रोक्ते तथाभरणानि च ॥ नमोऽन्तमर्पयेद् गन्धं पुष्पं च वौषडन्तकं पुष्पं समर्प
येद्देवि मुद्रया ज्ञानसंज्ञया ॥ अङ्गुष्ठातर्जनीयोगाज्ज्ञानमुद्रा प्रकीर्तिता ॥ नमोऽन्तं च तथा धूपं दीपमा
ला तथैव च ॥ नैवेद्यं च ततो दद्यात् यथोक्तं च चतुर्विधं ॥ पानार्थं मधुरं वारि दद्यादाचमनं पुनः ॥ कर्पूर
सहितं देव्ये ताम्बूलं च निवेदयेत् ॥ तर्पणानि पुनर्दद्यात् त्रिपाणीतत्त्वमुद्रया ॥ अङ्गुष्ठानामिकायोगात्तत्त्वमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध
६२

देयमीरिता ॥ अङ्कुशं शिवमित्याहुरेनामाशक्तिरुच्यते ॥ नर्यागमुनयोयोगादमनेर्वा मपाशिना ॥ योनिमु
द्रां प्रदर्श्याथ मुद्रा सन्दर्शयेत्ततः क्रमात् ॥ मुद्राप्रणाम्यविधिवज्जपेत् विद्यामनन्यधीः ॥ जपान्ते गुरुपाद
स्निं होमान्ते बलिमुत्सृजेत् ॥ बलिदानावसाने तु निवेद्यानि निवेदयेत् ॥ दत्वा ग्रास्ये ततो धूपैः पुनर्देवीं प्र
धूपयेत् ॥ दीपमालाः प्रदर्श्याथ पादाम्बुजलाटकावधि ॥ वीरेश्वराय वौषट् सिन्दूरं दापयेदथ ॥ अङ्करागेषु
सिन्दूरं सोने कुसुमदितां तथा ॥ वस्त्रं भूषणकौषेयं त्रिपुराप्रीतिदायकं ॥ नैवेद्यं निवेद्याथ दर्शयेद्दर्पणं
ततः ॥ सुर्द्धिच्छत्रं निधायाथ वीजयेद्वज्रचामरैः ॥ सितैर्वा परमेशानि नतु कृष्णैः कदाचन ॥ वादयन् शङ्ख
घण्टां च पुनः पुनः प्रधूपयेत् ॥ ततः सन्तोषयेद्देवीं गीतवादित्रनिःस्वनैः ॥ वाद्यैर्नानाविधैर्देवि विचित्रैर्ड्डाकौतु तंत्र
कमङ्गलैः ॥ नटनर्तकसंदैश्च वेश्याभिरपि पार्वति ॥ आत्मानं सर्वभावेन निवेदयेत् समयी भवेत् ॥ ६२
इति गन्धर्वतन्त्रे त्रयोदशः पटलः ॥ ॥ देव्युवाच ॥ उपचारान्कथं देव फलं तेषां च कीदृशं ॥ यच्च
प्रियतमं देव्यास्तत् सर्वं वद शङ्कर ॥ ॥ ईश्वर उवाच ॥ उपचारान्प्रवक्ष्यामि शृणु षोडश पार्वति

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

येऽस्माभ्यत्तुष्यते देवी विधानैर्विविधैर्विभु ॥ सौवर्णं राजतं वस्त्रः तथा रत्नविनिर्मितं । आसनं प्रथमं दद्या
त्पीठं स्वं सदा रत्नमेव च ॥ नपत्रमासनं दद्यान्न कदाचिदिह पूजने ॥ यथोक्तविधिना देवि रक्तकम्बलमेकवा
समेव तु पादपीठं तेपवनकल्पितासनं ॥ भोगमोक्षप्रदं मातः रत्नस्तम्भपरमेश्वरि ॥ अनेनैव वासनं दे
वैयाद्याद्धि हिताज्ञिके ॥ भुक्तिमुक्तिकरं तस्य सर्वत्र स्थानवान् भवेत् ॥ पाद्यार्थमुदकं पाद्यं चन्दनागु
रुसंयुतं ॥ सुशीतलं मया देवि दत्तं स्नाय तव पादयोः ॥ नैत्तेजसेन पात्रेण शङ्खेनाथ प्रदापयेत् ॥ धर्मार्थ
काममोक्षाणां संस्थानं पाद्यमिष्यते ॥ पाद्यमन्त्रं मया प्रोक्तमनेनैव निवेदयेत् ॥ अर्घ्येण लभते कामा
न् अर्घ्येण लभते धनं ॥ पुत्रायुःसुखमोक्षाणि दानादर्घ्यस्य वै लभेत् ॥ पूर्वसंस्थापिते तैव शङ्खे नविधि
नाखयं ॥ श्वेतसर्षपमुद्गाभ्यां तिलक्षीरैस्तथा यवैः ॥ रक्तचन्दनपुष्पैश्च त्रिपुरायै महेश्वरि ॥ निधाय पु
रतो दद्यादर्घं मन्त्रेण साधकः ॥ अर्घ्यमर्घ्यमिदं देवि मया भक्त्या निवेदितं ॥ सजलं शङ्खपात्रस्थं गृहीत्वा
मूर्ध्नि योजय ॥ उदकं दीयते यत्तु सगन्धं पुष्पवर्जितं ॥ आचमनाख्यं देवाय तदाचमनसुच्यते ॥ कर्पूरे

गन्ध ६३

वासितैर्दीपिकालागुरुप्रधूपितैः॥ यथा तथा सुगन्धैर्वा प्रसन्नैः वर्णवर्जितैः॥ दद्यादाचमनीयन्तु सुग
न्धसलिलैः शुभैः॥ तैजसेन तु पात्रेण शङ्खेनाप्यथवा प्रिये॥ आयुर्बलं यशो वृद्धिं प्रददात्याचमनीयकं॥
लभते साधको नित्यं समाश्चैव यथेप्सितान्॥ सुगन्धाचमनं देवि सर्वयामक्तानिवेदितं॥ आयुर्बलयशो
वृद्ध्यै तदिदं प्रतिगृह्यतां॥ दधिसर्पिर्जलं क्षौद्रं सिताभिश्चापि पञ्चभिः॥ प्रोच्यते मधुपर्कस्तु देवी प्री
तिप्रदायकः॥ जलञ्च नारिकेलाल्यं सिता दधि घृतं समं॥ सर्वेषामपि च क्षौद्रं मधुपर्के प्रयोजयेत्॥
तद्दद्यात्कांस्यपात्रेण रौप्यपात्रेण वा पुनः॥ ज्योतिष्टोमाश्वमेधौ दीयतप्यफलं लभते नरः॥ सर्वं तत्परमे
शानि मधुपर्के प्रतिष्ठितं॥ आज्यं दधि मधुमिश्रं जलञ्चापि सशर्करं॥ मधुपर्कं रौप्यपात्रे गृहीत्वा म
ध्यसुन्दरि॥ मधुपर्कं विना पूजा साधकक्षयकारिणी॥ मधुपर्कं महेशेन्द्र साधकं भक्षयेत्परं॥ कर्पू
रागुरुद्रवकस्तूरीरोचनाकुसुमं तथा नारिकेलजलं क्षौद्रं खेश्वररसमुत्तमम्॥ सिताश्च पञ्चगव्यञ्च स
र्वौषधिगणं तथा प्राणेनेतायमितिप्रोक्तं स्नानीयं परिकुरा प्रियं॥ भृङ्गारेणाथवा शङ्खे त्रिपुरायै निवेदयेत्

तंत्र ६३

CC-0. In Public Domain. Digitization by eGangotri

साधकस्नानदानानुहरमेधं फलं लभेत् ॥ दीर्घायुः कामभोगी च सन्ध्यानं कृ भवेत् । प्रत्येकं सर्ववस्तू
नां सहस्रफलमाननस्नानं भवेद्देवि मध्यफलं शतेन तु ॥ कनिष्ठं वै भवेत् स्नानं पलानां दशभिः रिति
मिश्रीकृतेन तु सर्वे षाम्नाल्लमानेन विधीयते ॥ स्नापयेत् प्रथमं देवीं त्रिपादिति ऋचा पुनः ॥ मूलेनापि ततः
पश्चादमुना च निवेदयेत् त्वमापः पृथिवी चैव ज्योतिस्त्वं वायुरेव च ॥ केवलं भक्तिभावेन देवि त्वां स्नाप
याम्यहं ॥ स्नापयित्वा महादेवीं वस्त्रं यदि न दापयेत् ॥ स निर्लज्जः परं पापं प्राप्नुते कृमिजातिवे ॥ वस्त्रा
भावे ततो दद्यादक्षतं सुमनं पाजवाः स्नापयित्वा महादेवीं वस्त्रयुग्मं प्रदापयेत् ॥ वस्त्रेण हीयते लक्ष्मी वस्त्रे
णाहीयते त्वघं ॥ सर्वभूषणावर्गेषु वस्त्रमुत्तममुच्यते ॥ देवीप्रीतिकरं वस्त्रं चतुर्वर्गप्रदं शुभं ॥ निर्दग्धं
मलिनं जीर्णं छिन्नं गात्रावलिङ्गितं ॥ परकीयं स्वयं तु दष्टं सूचीविद्धं तथोषितं ॥ सत्यतः कारितानां च
सूचिविद्धं प्रयोजयेत् ॥ केशान्वितमधौतं च श्लेष्ममूत्रादिदूषितं ॥ वह्निदग्धं तु चैन्नस्त्रं महादेव्यै न दापये
त् ॥ चित्रवस्त्रं दुकूलं च देवीप्रीतिकरं परं ॥ वर्द्धसिद्धिप्रदं वस्त्रं वह्निस्तोमफलप्रदं ॥ विद्यात्सत्तु समायुगे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्त्रवर्णसमन्विते ॥ विद्याविधोजवाशोणा नासमीनवसुन्दरी ॥ उद्यदादित्यसङ्काशं वासोयुग्मं सुनि
र्मले ॥ नूतनं गात्रसुखदं परिधत्स्व सुरेश्वरि ॥ किरीटञ्च शिरोरत्नं कुण्डलञ्च ललाटिका ॥ तालपत्रञ्च
हारञ्च ग्रैवेयकमथोर्मिका ॥ सूत्रावली केशपाशमादर्श वलयान्वदो ॥ पादङ्गुरीयकं सूत्रं नूपुरं क्षु
द्रघण्टिका ॥ अलङ्कारा समाख्यातास्त्वलङ्कारेषु षोडश ॥ चतुर्वर्गप्रदं नित्यं भूषणां सर्वसौख्यदं ॥ तु
ष्टिपुष्टिप्रदं नित्यं यथाशक्त्या निवेदयेत् ॥ नवरत्नसमायुक्तास्तु हाटककल्पिताः ॥ गात्राणि शोभ
यस्वेतेनअलङ्कारस्तु सुन्दरि ॥ कामेश्वरीकालरूपे त्वं सर्वकामफलप्रदे ॥ भूषणं गृह्ण चार्वङ्गि मयाम
न्यानिवेदितं ॥ चूर्णीकृतो वा घृष्टो वा दाहकर्षित एव वा ॥ रसः सम्मर्दजो वापि प्राण्यङ्गोद्भव एव वा ॥ ग
न्धः पञ्चविधः प्रोक्तो देवी प्रीतिप्रदायकः ॥ प्रशस्तगन्धयुक्तानु गन्धचूर्णानि यानि च ॥ तानि गन्धाख्यया
नि स्युः सगन्धः पनसः स्मृतः घृष्टो मलयजो गन्धः सबलश्च नमेरुणा ॥ अगुरुप्रभृति प्राप्यो यस्य पङ्कः प्र
दीयते ॥ अगुर्वादिवदादग्धोदियो गन्धा गृह्यतेरसः ॥ सदाहाकर्षितो गन्धरसतीयः परिकीर्तितः ॥ सुग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्य गन्धिनी विल्व तिलकं शालपत्रिकां ॥ निर्य्यासगल्यते योऽसौ सम्भंद्जः सज्ज्यते ॥ मृगनाभिसमुद्भु
तस्तत्कोषाद्भवस्तु वदिस्मात्तेवा गन्धधारागुजः प्रोक्तः पञ्चमस्तु समुच्यते ॥ गन्धस्य विस्तरो भेदादिस्मा
त्र समुदाहृतं ॥ सर्व्वेषु गन्धजातेषु श्रेष्ठो मलयोद्भवः ॥ तस्मात् सर्व्वप्रयत्नेन दद्यान्मलयजं सदा ॥
कुंकुमागुरुकस्तूरीकर्पूरैर्म्मलयोद्भवे ॥ समीकृतेस्तु यो गन्धस्त्रिपुराप्रीतिदायकः ॥ कुचन्दनशितश्चैव
कालीयकसमन्वितं ॥ अनुलेपनमुख्यन्तु देव्याः प्रीतिकरं परं ॥ अलक्तं नखरी गेसु देव्याः प्रीतिकरन्न
था ॥ गन्धेन नन्दमते का सा नृगन्धाधर्म्मप्रदः सदा ॥ आम्बानां साधको गन्धो सांक्षेत्वापि प्रतिष्ठितः श
रीरस्तु न जानासि वै स्पष्टैव महेश्वरि ॥ सर्य्यानिवेदितान्गन्धान् प्रतिगृह्य विलिप्यतां ॥ गन्धैस्तु तोषि
ता देवी चतुर्वर्गप्रदा भवेत् ॥ अनेनैव महेस्थानि गन्धान् देव्यै निवेदयेत् ॥ घृतेनैलादियोगेन स्वर्णी
ये दीपवर्त्तिना ॥ यच्छन्नं प्रजायेत सत्वा कर्पूरमिश्रितं ॥ धर्म्मार्थकाममोक्षाय त्रिपुरायै निवेदयेत्
विधिवन्नाञ्जनं कुर्य्यान्महामायार्थमद्विजे ॥ नमतत्पात्रेगतं कुर्य्यात् साधको नेत्रञ्जनं ॥ नपूजाफल

गन्ध
६५

माघ्रातिस्मृतपात्रविहितान्यन्यैः ॥ परकीयांस्तथाघ्रातांस्तेषां सत्याभिमर्द्दितान् ॥ पुष्पधूपस्रगन्धस्त्र
नोपचारांस्तथापरान् ॥ घ्रातान्निवेदयन्देवेशि नरो नरकमाप्नुयात् ॥ नैव पर्युषितैः पुष्पैः पत्रैश्चापि महे
श्वरीं ॥ पूजयेन्न परमेशानिं महात्रिपुरसुन्दरीं ॥ सर्वं पर्युषितं पर्ण्यं पत्रं पुष्पं फलं तथा ॥ पद्मानि सि
तरक्तानि कुमुदास्तूत्पलानि च ॥ एषां पर्युसिताशङ्का कार्या पञ्चदिनोर्द्ध्वतः ॥ अन्येषां कुसुमानां त्वया
वद् गन्धविपर्ययः ॥ बिल्वपत्रे महेशानि नास्ति पर्युषिता मता ॥ बकुलं केशरं वज्रं माल्यं कुन्दस्त्वशा
ल्मकं ॥ करवीरश्चार्कपुष्पं बन्धूकं कमलं तथा ॥ मालती मल्लिका जाती यूथिका माधवी तथा ॥ नगरं क
र्णिकारश्च शेफालीन्द्वोनचपलं चम्पकौ ॥ अशोकः कुमुदश्चैव शेफालिकाकदम्बकौ केतकी वनमाला च कु
सुन्तकिंशुकौ तथा ॥ वहारं बकुलैश्चैव लवङ्गं नागकेशरौ ॥ सर्वेषु पुष्पजातेषु त्रिपुरायाः सदैव हि ॥ ए
तान्येव प्रियाणि स्युर्णां पत्रैरर्चयेच्छिवां ॥ पत्रेषु बिल्वपत्रं स्यात्तथा मदनपल्लवं ॥ दूर्वाङ्कुरस्तथा प्रोक्ता ना
न्यत्पत्रं प्रयोजयेत् ॥ मल्लिकामालती कुन्दो जाप्याथ सिताम्बुजः शुक्लपक्षे महादेवि त्रिपुरायै नि

पुरः
६५

CC-0. In Public Domain. Digitization by eGangotri

वेदयेत् ॥ सर्वेषां पुष्पजातीनां रक्तपद्मन्तथाम्बुजा ॥ देवीप्रीतिकरं प्राज्ञे सर्वकामफलप्रदं ॥ रत्नपुष्पञ्च
देवेशि तथा स्वर्णादिनिर्म्मितं ॥ रक्तपद्मेन वज्रेशा तुलं नास्याति किञ्चित् ॥ एतेषां पुष्पजातानां येन के
नचिन्निर्म्मितां ॥ मालां धृत्वा महादेव्यै शतफलं लभते नरः ॥ अपि रक्तसहस्रैस्तु वक्त्रमालेन ततः प्रभुः ॥ पु
ष्पमूले वसेद्ब्रह्मा पुष्पमध्ये तु केशवः ॥ पुष्पाग्रे ऽयं स्थितो नित्यं सर्वे देवाः स्थिता दले ॥ चराचराश्च सक
लाः सदा पुष्पवसाः स्मृताः ॥ यतं ज्योतिः पुष्पगतं पुष्पैस्तेन प्रसीदति ॥ भोगमोक्षप्रदं पुष्पं तुष्टिश्री
पुष्टिमोददं ॥ पुष्पैर्द्देवी प्रसन्ना स्याद्धर्म्मकामार्थदायिनी ॥ तस्मात् पुष्पैर्यजेद्देवीं नित्यं भक्तियुतो न
रः ॥ ब्रह्मविष्णुशिवादीनां पुष्पमेव सदा प्रियः ॥ न ते मानवयक्षाभिप विच्चं प्रतिगृह्यतां ॥ उग्रग
न्धमगन्धं च कृमिकेशादिदूषितं ॥ अशुद्धपात्रपाणिस्थं वासोभिः कुत्सितान्यपि ॥ आनीतं ना
र्पयेद्देव्यै प्रमादादपि दोषकृत् ॥ स्नात्वानीतैः पर्युषितैर्याचितैः क्रमश्चरीकैः ॥ स्वयं विकशितैर्मु
क्तैः स्वयं स्वपतितैर्भुवि ॥ नार्चयेत् कलिकाभिश्च विना चम्पकपङ्कजैः ॥ पुष्पं वा यदि वा पत्रं फलं

CC-0. In Public Domain. Digitization by eGangotri

नैस्तमधोमुखं॥ दुःखदं तान् समाख्यातं यथोत्पन्नं तथार्पणं॥ चित्रपूजासु सर्वासु न विरुद्धं न दूषणं॥ अ
धोमुखार्पणं नैवं पुष्पाञ्जलिविधिं विना॥ किञ्चातिबहुनोक्तेन सामान्येनेदमुच्यते॥ उक्तास्मुक्तेस्तथा
पुष्पैर्जलजैः स्थलजैरपि पत्रैः सर्वैर्यथालाभं भक्तिमान् सततं यजेत्॥ पुष्पाभावे यजेत् पत्रैः प
त्रालाभे च तत्फले॥ अक्षतैर्बीजसंस्थैर्वापि न दूर्वां व्यतिलङ्घयेत्॥ एतेषामप्यलाभे तु मानसीं भ
क्तिमाश्रयेत्॥ दह्यमानस्य काष्ठादेर्निर्यासो यस्य जायते॥ नासाप्रियस्तु सुखदः सुगन्धोऽतिमनोह
रः॥ स धूप इति विज्ञेयो देवप्रीतिप्रदायकः॥ पुष्पमूलं नखं कुष्ठं जटामांसीं च शैलजं॥ सरलं देव
काष्ठं च जतु सर्वं सचन्दनं॥ कपिलाघृतकर्पूरशर्करामधुसंमिश्रितं॥ षोडशाङ्गो महाधूपः षोडशी
प्रीतिदायकः॥ न भूमौ विनिरेद्धूपं नासने न कलसे न तु॥ यथा तथाधारगतं देवाग्रे तु निवेदयेत्॥ व
नस्पतिरसोत्पन्नो गन्धाढ्यो गन्ध उत्तमः॥ आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यतां॥ अथ दीपं
प्रवक्ष्यामि ज्योतिष्टोमफलप्रदं॥ घृतदीपस्तु प्रथमस्तिलतैलोद्भवस्ततः॥ सार्षपश्चाधमः प्रोक्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तदन्यो निन्दितः स्मृतः ॥ पञ्चसूत्रभवा चाद्या कार्पाससम्भवापरा ॥ दर्भगर्भभवा चापि वर्त्तिका
परिकीर्त्तिता ॥ कोषजं रोमजं वास्त्रं मलिनं पर्युषितं तथा वर्त्तिकार्थं न चादद्यात् साधको भूतिमि
च्छुकः ॥ तैजसं पार्थिवं लौहं दीपपात्रं प्रशस्यते ॥ दीपवृक्षाश्च कर्त्तव्यास्तैजसाद्याः पृथक् पृथक् ॥ वृ
क्षे दीपः प्रदातव्यो न तु भूमौ कदाचन ॥ कुर्वन्तं पृथिवीतापं यो दीपमुत्सृजेन्नरः ॥ तामिस्रं नरकं घो
रं याप्नोत्येव न संशयः ॥ नेत्राल्हादकरः स्वर्च्चिर्दूरतापविवर्जितः ॥ सशिखः शब्दरहितो निर्धूमो नाति
ह्रस्वकः ॥ दीपवृक्षास्थिते पात्रे शुभ्रस्नेहप्रपूरिते ॥ दक्षिणावर्त्तवर्त्त्यैव चारुदीप्तः प्रदीपकः ॥ उत्तमः
प्रोच्यते सोऽत्र त्रिपुराप्रीतिदायकः ॥ वृक्षेणावर्जितो दीपो मध्यमः परिकीर्त्तितः ॥ विहीनः पात्रतैला
भ्यां मध्यमः परिकीर्त्तितः ॥ दीपमाला प्रकर्त्तव्या नैकदीपः कदाचन ॥ त्रयो दीपाः प्रदातव्याः पञ्च वा पर
मेश्वरि ॥ इतो न्यूनं न दातव्यं त्रिपुरायै कदाचन ॥ नैव दीपं प्रदातव्यो विधूतः श्रीषिहृत्य येन मिश्रीकृ
त्य दद्यात्तु दीपस्नेहान् घृतादिकान् ॥ कृत्वा सम्मीक्षितं स्नेहं रौरवं नरकं व्रजेत् ॥ नैव निर्वापयेद्दीपं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवार्थमपि कल्पितं॥ दीपहर्त्ता भवेदन्धः कोनो निर्वापको भवेत्॥ नेतन व्यवहारोऽपि कर्त्तव्यः ना
धकोत्तमैः॥ सूर्य्याचन्द्रमसोर्ज्योतिर्विद्युदग्नेस्तथैव च॥ त्वमेव ज्योतिषां ज्योतिर्दीपोयं प्रतिगृह्य
तां॥ दीपं दक्षिणतो देव्याः पुरतो न तु वामतः॥ वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे॥ निवेदयेत्पु
रोभागे गन्धं पुष्पञ्च भूषणं॥ नैवेद्यं दक्षिणे वामे पुरतो वा न पृष्ठतः॥ गान्धेदानं तु स्वयं योग्यं य
न्नेष्ठव निवेदयेत्॥ दद्याद्दक्षिणगं पुरतो नैवेद्यं भोजनादिकं॥ मदिरां पृष्ठतो दद्यात्पानन्तु वामतः॥ या
वियात्वेह देवेशि श्रीविद्यायां मन्त्रसर्वी॥ फलही नास समाख्याता स्वाभिचारायकल्पते॥ ॥इ
ति श्रीगन्धर्वतन्त्रे चतुर्दशः पटलः॥ ० ॥इक्षुरसं समादाय पर्युषितं सुसंस्कृतं॥ सहकाररसं त
त्र निक्षिप्य मधुना सह॥ बादरं जाम्बवं चैव खर्जूरमेव च॥ नारिकेलोद्भवं तत्र द्राक्षारसमनुत्तमं
मोचिनीफलजं चूर्णं जातीकोषरजस्तथा॥ कर्णिकाबीजचूर्णं च जातीफलसमुद्भवं॥ त्रिजातं त्रिसुग
न्धिं च त्रिकटुं त्रिफलान्वितं॥ तथान्य वास्तु द्रव्याणां सुगन्धीनां रजः शिवे॥ किञ्चित्किञ्चिद्विनिक्षिप्य क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ईसैस्वाधिवासयेत् ॥ स्वर्णे वा राजते पात्रे काचपुटेऽथवा प्रिये ॥ स्थापयित्वा सितां तत्र निक्षिपेत् पर
मेश्वरि ॥ निक्षिप्य लौहितं द्रव्यं विवस्वैराख्याय यत्नतः ॥ सप्तरात्रोषितं तत्तु जायते ह्यमृतोपमं ॥ चंद
नागुरुकर्पूरैर्धूपयित्वा निवेदयेत् ॥ एषा सर्वात्मना योज्या देवी प्रियतमा सदा ॥ मदिरेति समा
ख्याता परमानन्ददायिनी ॥ एवं त्रिंशत्य सुन्दर्य्यै सर्व्वसिद्धिमुपालभेत् ॥ देवीलोके चिरं स्थित्वा ततो
राजा क्षितौ भवेत् ॥ तत्रापि पानयोगाद्ध्यात् कैवल्यमुक्तिमाप्नुयात् ॥ सविकल्पस्य देवेशि विहितं पान
यात्यथा ॥ निर्विकल्पस्य देवेशि सूरैर विहितागमे ॥ अमृतं तस्य न देवस्य मद्यस्यापितं देवहि ॥ नाप
श्यपि द्विजो मद्यं दद्याद् द्विजे कदाचन ॥ मोहात् यदि ददेन्मद्यं ब्राह्मणाय देवहीयते ॥ ब्रह्मघाती स एव
स्यात्तस्मान्मद्यं विवर्जयेत् ॥ मद्येन वपुरासेव्य मासीत् कमललोचने ॥ पीत्वा मद्यं पुरा शुक्र आत्मानं स्वा
पि विस्मृतः ॥ पीत्वा मत्तो निशानाथः पत्नीं तां जग्मे गुरोः ॥ अतस्तेनापि मुनिना शापो दत्तः सुदारुणः
ब्रह्मा च मुनिभिः सार्द्धं सिद्धसेव्य पुराजगौ ॥ महादेव्यो द्विजो मद्यं यो दद्यात् ज्ञानविह्वलः ॥ पशुभावे

स्थितो यश्च स महापातकी भवेत् ॥ ज्ञोषयो विहितं मद्यं निर्विकल्पकयोः पुनः ॥ नाद्यस्य विहिते नु
नत्रुत्सघाती भवेन्नरः ॥ तेनेदं पृथिवीक्षेत्रे वर्ज्यमासीत् सुलोचने ॥ ज्ञानिनां सिद्धिदां चेयं मस्तत्त्व
प्रदायिनी ॥ ज्ञानेन संस्कृता चेयं महापातकनाशिनी ॥ ब्रह्महत्यासुरापानस्वर्णस्तेयादिपातकान्
नाशयेत् पूजनाद्देवि निर्विकल्पो भवेद्यदि ॥ निर्विकल्पाय दातव्यं महादेव्यै निवेदयेत् ॥ अश्व
मेधसहस्रस्य वह्निष्टोमशतस्य च ॥ राजसूयशतस्यापि फलमाप्नोत्यसंशयं ॥ अनिमाद्यष्टसिद्धी
नां नायको जायतेऽचिरात् ॥ सविकल्पो यदा देवि पापभाक् स्यान्न संशयः ॥ त्वं देवानघ धामासि स्वध
त्वं स्वर्दिवौकसां ॥ स्वधा त्वं पितृमुख्यानां मनुष्याणां त्वसि प्रिया ॥ क्षीरोदधिमथने पूर्वं सुदृष्टा देवसं
सदि ॥ आनन्दभैरवी साक्षादानन्दभैरवेण तु ॥ त्वयि प्रसन्नया तासां सिद्धिर्भवति संशयः ॥ विमुखी
भवति तस्य कुलज्ञानविनाशिनी ॥ प्रसन्ना त्वं तु देवानां गन्धर्वाणां तथैव च ॥ विमुखा त्वं तु दैत्यानाम
सकृत् सर्वनाशिनी ॥ त्वामथानन्ददे देवि वीमयि चिन्तनस्फुरांकुरु ॥ एवं स्तुत्वा सुरां देवी वोषयेन्निन च वं स

स्कृताम् ॥ त्रिपुरायै: निवेद्यैव निग्रहानुग्रहक्षम: ॥ चर्व्यं चोष्यं तथा लेह्यं पेयश्चेति चतुर्विधम् ॥ स
र्वयज्ञमयं नित्यं नैवेद्यं सर्वतुष्टिदम् ॥ ज्ञानदं कामदं पुराया: वलारोग्यमयं तथा ॥ नैवेद्येन लभेत् स्व
र्गं नैवेद्येनामृतं लभेत् ॥ धर्म्मकामार्थमोक्षश्च नैवेद्ये सुप्रतिष्ठित: ॥ तस्मात् सर्वप्रयत्नेन नैवेद्यं
खलु दापयेत् ॥ हवि: सुसंस्कृतं दिव्यमाज्ययुक्तं सशर्करम् ॥ शुभ्रस्फटिकसंकाशं चन्द्रविम्वसमप्रभ
म् ॥ लसत्तन्तुजलन्येविचारुगन्धसहमट्ठु ॥ सुगन्धिशालिजञ्चान्तं मधुमांससमन्वितम् ॥ अपूप
पायसं क्षीरमन्नं देव्या प्रदास्यति ॥ वनितानेषु वहिता यष्ट्वमृगपक्षिणा: ॥ तेषां मांसानि मत्स्या
नि देयानि विविधानि च ॥ सर्वसुरभिगन्धाढ्यं व्यञ्जनं सुमनोहरम् ॥ यथा यथा भवेद्भक्ष्यं यन्नद्रव्यं
तथा तथा ॥ संस्कृत्य वेश्यावाराऽथ मनोहरं देव्यै निवेदयेत् ॥ यत् पूतिगन्धसंयुक्तं दुर्ग्धं भोगवहिष्कृत
म् ॥ तत्कमपि यो दद्यात् त्रिपुरायै कदाचन ॥ कामशाकं कलायञ्च पालङ्कं च पियोतिकाम् ॥ सार्षप
मूलकञ्चैव वार्ताकं श्वेतलम्बिकाम् ॥ शाकानेतान् महादेव्यै यो दद्याद्भक्तिसंयुत: ॥ सोऽनुलोम्भिय मान्नो

मन्त्र ६९

तिदेवीलोकेमहीयते॥ माषमुद्गमसूराद्यैर्व्यञ्जनैस्तुसमन्वितम्॥ हिङ्गुजीरमरीचाद्यैरिडकैश्चा
पिसंस्कृतम्तिन्तिडाम्लसुसंयुक्तंभक्तियुक्तोनिवेदयेत्॥ ज्योतिष्टोमफलंलब्ध्वादेवीलोकमवाप्नुया
त्॥ नानाविधानिपेयानिव्यञ्जनानिबहून्यपि॥ क्षीरादीन्यथशाल्यानिसहितानिचसर्वशः॥ आमि
क्षांपरमेशान्यैदधिचापिसशर्करम्॥ पायसंशर्करापूपंकपिलाघृतसंयुतम्॥ पक्वान्नमतिमि
ष्टंचसिताकर्पूरसाधितम्॥ शर्करालोडितांसम्यक्कृत्वावटकान्कुण्डलकुमारणान्॥ सशर्करंपक्वदुग्धं
कदल्यादिफलान्वितम्॥ सितोपदंशसंयुक्तंस्वर्णपात्रेनिवेदयेत्॥ अथवारौप्यपात्रेवाताम्रपा
त्रेऽथवापुनः॥ अभावात्पत्रपात्रेवाअन्यथानरकंव्रजेत्॥ आममन्नंमहादेव्यैनैवदद्यात्कदाच तंत्र
न॥ मन्त्रकालाविद्युन्नानिनैवेद्यानिकदाचन॥ देवेभ्योनोपयुञ्जीतगुरोर्वामेहितेरतः॥ सितासम्मि ६९
श्रितांदत्वासुरांमधुसमन्विताम्॥ देवीलोकेचिरंस्थित्वाकैवल्यमुक्तिमाप्नुयात्॥ आमिक्षयासम
न्वितांसलिलंनारिकेलजम्॥ क्षीरंचमधुकर्पूरसितादधिसमन्वितं॥ त्रिजातंत्रिकटुंताम्बूलंतेऽ

नहरोरपि तथान्येषां स्वर्वसूनां चतुर्णां सम्भवतां शिवे ॥ साधयित्वा प्रकारेण वासितं गन्धरेणुभिः ॥ ष
ट्त्रिंजसे न पात्रेण पेयं देव्यै निवेदयेत् ॥ भक्तिप्रवणचित्तेन तस्य पुण्यफलं शृणु ॥ कल्पकोटिसह
स्राणि कल्पकोटिशतानि च ॥ स्थित्वा देवीपुरे श्रीमान् सार्वभौमो भवेत् क्षितौ ॥ ततः परं तु कैवल्य
माप्नोति च यथेच्छया ॥ केवलं नारिकेलाम्बु दत्वा देव्यै महेश्वरि ॥ वर्षेशतसमं फलं लभ्या नवलेके मही
यते ॥ ग्रामारण्यैः फलैर्देवीं सकलैः परिपूजयेत् ॥ बलिप्रियश्च नैवेद्यं कशेरुकविधादिकं ॥ अतेष्वे
ष्मानकं विल्वं शोनकश्च विशेषतः ॥ फलान्यन्यानि पक्वानि निसर्गमधुराणि च ॥ सुपक्वानि सुगन्धी
नि मनोहराणि यानि च ॥ स्वयमेतानि नित्यानि नानाव्याधिप्रभदानि च ॥ सौवर्णे राजते वापि ताम्रे वा
प्रस्तरेऽपि च ॥ पत्रपत्रेऽथवा दद्यान्नैवेद्यं त्रिपुराप्रियं ॥ निराच्छादं समालोक्य भक्तिश्रद्धासमन्वि
तः ॥ वायुबीजेन संशोष्य सन्दहेद्वह्निना तथा ॥ अरूपेण स्वधाहृन्मया प्लावयेद्धेनुमुद्रया ॥ अस्त्रमन्त्रे
णास्त्रं रक्ष्य मूलेनैवाभिषिच्य तु ॥ मूलदेव्याः स्वनामान्ते नैवेद्यमिति चोच्चरेत् ॥ गृहाण वह्निजायान्ते

CC-0. In Public Domain. Digitization by eGangotri

ग.स्व ७०

नैवेद्यमनुरीतितः॥ अन्नञ्चतुर्विधं देवि रसैः षड्भिस्समन्वितं मया निवेदितं भक्त्या तदितं प्रतिगृ-
ह्यतां॥ लेह्यचोष्यानुपानादि भक्ष्यभोज्यानि यानि च॥ मयाहृतानि यत्नेन स्वप्रया देवि भुज्यतां॥ जा
शीतलं कुंकुमोलवासितं स्वधुनीजलं॥ मुखवासकांपुगफलगृहाणत्वंसमसुन्दरि॥ मूल्यमन्त्रेण देवे-
शि कृत्वेतत्पश्चाद्धृतीं क्रमात्॥ प्राणापानौ तथा व्यानमुदानञ्च समानकं॥ एतत्स्वरूपं जानीयाद
हुतीनाञ्च पञ्चकं॥ पञ्चाङ्गुलीभिरेवस्यात्क्रमात्पञ्चाहुतीः प्रिये॥ पुनराचमनं दत्वा मुखवासं
निवेदयेत्॥ ताम्बूलं गन्धसंयुक्तकर्पूरादिसुवासितं॥ संस्कृत्य विविधैर्द्रव्यैर्गन्धवद्भिर्निवेदयेत्
स्तवन्नानाविधैस्तोत्रैर्भक्तिभावसमन्वितः॥ प्रणामेत्परमेशानि विधिना साधकोत्तमः॥ देवमा-
नुषगन्धर्वयक्षराक्षसपन्नगाः॥ नमस्कारेण तुष्यन्ति महात्मानः समन्ततः॥ नमस्कारेण लभते तंत्र ७०
चतुर्वर्गमहोदयं॥ सर्वत्र सर्वसिद्ध्यर्थं नमस्कारे वपुत्रस्यते॥ नत्वा विजयते लोकान नत्वाधस्मे प्र-
वर्तते॥ नमस्कारेण दीर्घायुरच्छिन्नां लभते प्रजाः॥ चतुर्वर्गं लभेन्नूनं चिरादेव साधकः॥ नमस्कारे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सहायज्ञः प्रीतिदः सर्वतस्सदा॥ नमस्कुर्य्यान्महादेवीं प्रदक्षिणाञ्च भक्तितः॥ कायिको वाग्भवश्चैव
मानसस्त्रिविधस्मृतः॥ नमस्कारश्च विज्ञेय उत्तमाधममध्यमः॥ कायिकेस्तु नमस्कारे देवास्तुष्यन्ति
सर्वतः॥ नमस्कारेषु सर्वेषु कायिकः प्रथमः स्मृतः जानुभ्यामवनीं गत्वा संस्पृश्य शिरसा क्षितिं॥
क्रियते यो नमस्कारः स एव कायिकस्मृतः॥ पुटीकृत्य करौ शीर्षे नमस्कारः प्रदीयते॥ अस्पृष्ट्वा जा
नुशीर्षाभ्यां क्षितिं सोऽधमस्त उच्यते॥ जानुभ्यां क्षितिं स्पृष्ट्वा शिरसा स्पृश्य मेदिनीं॥ क्रियते यो नम
स्कारो मध्यमः कायिकस्तु सः॥ पौराणिकैस्तान्त्रिकैर्वा मूलमन्त्रेण वा पुनः॥ प्रदक्षिणप्रमाणाञ्च कु
र्य्यात् सर्वार्थसाधनं प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः॥ दक्षिणं दर्शयन् पार्श्वं भक्तिश्रद्धा
समन्विता॥ सकृत् प्रदक्षिणां कृत्वा वर्त्तुलाकृति साधकः॥ स च प्रदक्षिणो ज्ञेयः सर्वदेवौघतुष्टिदः॥
अश्वेनरशतेयस्तु देव्याः कूर्य्यात् प्रदक्षिणां॥ स सर्वकामनासाद्य पश्चान्मोक्षमवाप्नुयात्॥ त्रिकोण
मथ षट्कोणमर्द्धचन्द्रं प्रदक्षिणं॥ दण्डमष्टाङ्गमुग्रञ्च सप्तधा नतिलक्षणं॥ दक्षिणाशायवीं गत्वा

CC-0. In Public Domain. Digitization by eGangotri

गन्ध ७१ दिशां तस्माच्च शाम्भवी ॥ ततोऽपि दक्षिणां गत्वा नमस्कारस्त्रिकोणकवत् ॥ त्रिकोणाख्यो नमस्कारस्त्रि-
पुराश्रीसिद्धिदायकः ॥ दक्षिणाद्वायवीं गत्वा वायव्याः शाम्भवी तथा ॥ ततोऽपि दक्षिणां गत्वा तां त्यक्त्वा·
रैनोप्रविश्य च ॥ अग्नितो राक्षसीं गत्वा कौबेरीञ्च ततो विशेत् ॥ आग्नेयीञ्च ततो गत्वा नमस्कारः षट्की-
र्तितः ॥ षट्कोणाख्यो नमस्कारो दुर्गायाः सिद्धिदायकः ॥ दक्षिणाद्वायवीं गत्वा तस्माद्याञ्च तद्दक्षिणां
गत्वा यासौ नमस्कारः सोऽर्द्धचन्द्रः समप्रियः ॥ नमस्कारैश्च जानीयादासां प्राकृतमण्डिजेत्यक्तास्त्वयास
नस्थानं पश्चाद्दण्डवन्नमस्कृतः ॥ निपत्य दण्डवद्भूमौ दण्ड इत्युच्यते बुधैः ॥ तथैव दण्डवद्भूमौ निप-
त्य हृदयेन च ॥ चिबुकेन मुखेनाथ नासया हनुकेन च ॥ चक्षुषा चाथ कर्णाभ्यां ब्रह्मरन्ध्रेण चैव हि तंत्र
न दत्वाङ्गमिति प्रोक्तं यद्भूमिं स्पृशते क्रमात् ॥ ब्रह्मरन्ध्रेण संस्पर्शः क्षितेर्यस्या नमस्कृते ॥ सऽग्रह- ७१
ति विज्ञेयो विह्नोस्तु सिद्धिदायकः ॥ यत्तत्त्वयं गज्ञपञ्चाभ्यां गतिनाभ्यां नमस्कृतिः ॥ क्रियते भक्तियुक्ते
न वाचिकस्तु नमः स्मृतः ॥ पौराणिकैर्वैदिकैर्वा तान्त्रिकैः क्रियते नतिः ॥ समध्यमोऽन्न नमस्कारो भवेद्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वचिकः सदा ॥ परैर्वाग्गद्यपद्याभ्यां नमस्कारो यदा भवेत् ॥ स वाचिकोऽधमो ज्ञेयो नमस्कारेषु सर्व
तः ॥ इष्टध्यानाभियुक्तेन मनोभिस्त्रिविधं भवेत् ॥ नमने मानसं प्रोक्तमुत्तमाधममध्यमं ॥ त्रिविधे
च नमस्कारे कायिकश्चोत्तमः स्मृतः ॥ ॥ इति मत्स्यवर्त्ततन्त्रे पञ्चदशः पटलः ॥ ॥ दे
व्युवाच ॥ प्रकरण्याः कथं देव पूज्यते परमेश्वर ॥ तत्सर्वं कथयेशान सुजविरचनं तथा ॥ ईश्वर उ
वाच ॥ तासु प्रपूजयेद्ब्रह्मा सृष्टिस्थितिलयक्रमैः ॥ सोहं नत्वा ततं चक्रं दक्षावर्त्तक्रमात्यजेत् ॥ वामा
वर्त्तक्रमेणैव शेषचक्राणि पूजयेत् ॥ आरभ्य पश्चिमाद्दिव्या पव्यन्तं समापयेत् ॥ रश्मिवृन्दानि ते
द्वि पूजयामि विधानतः ॥ आज्ञापय जगन्नात तर्पतस्समेवतानिच ॥ कृताञ्जलिर्महेशानि देव्याज्ञा
साधकोत्तमः ॥ गृहीत्वा पूजयेत्तशोडा गुरुक्रमयोगतः ॥ पूजावरणशक्तीनां गन्धैपुष्पाद्भिरक्षतैः ॥ ज्ञा
नसुजन्वितैर्दिवितर्पणांततत्वमुज्ज्या ॥ महायोगेश्वरं देवं योगिनेकरुणामयम् ॥ वारणां पूर्वसंपूत्य
दक्षकर्णोस्तु भूषितम् ॥ कुब्जायनमज्ञत्पुत्नापूजयेज्जगदीश्वरम् ॥ पश्चिमाधिवंतु दिक्षु पूजयेदनि

CC-0. In Public Domain. Digitization by eGangotri

मादिकाः॥ वायव्यादिषु कोणेषु वह्नित्वष्ट सुरान्यजेत्॥ प्राप्तिसिद्धिमधो भागे सर्वकामां तथोर्द्ध्वके॥ मा
यालक्ष्मीसमायोगं कृत्वा पूर्वं महेश्वरि॥ तथैव सिद्धिं ज्ञात्वा तेऽशीपादुकान्ततो वदेत्॥ पूजयामीति म
नुना पूजयेदुक्तमार्गतः॥ तथा द्वितीयरेखायां ब्राह्मण्याद्याः प्रपूजयेत्॥ अमिताङ्गरुरुश्चैव चण्डक्रो
धस्तथैव च॥ उन्मत्तश्च तथा देवि भैरवश्च कपालिनं॥ भीषणश्चैव संहारं नाभिः सह प्रपूजयेत्॥ सर्व
संक्षोभिणीमुख्यास्तथा तृतीयरेखगाः॥ करशुद्धिकरीं पूर्वां पूजयेच्च कनायिकाम्॥ दक्षिणे पूजये
द्देव्या मुद्रां संक्षोभकारिणीम्॥ अग्निमं पूजयेद्द्रावे वुद्धं तस्याः पुनः पुनः॥ मध्यं समध्यतः ज्ञात्वा कनि
ष्ठाङ्गुष्ठबोधितेतर्जन्यौ दृढाग्रेवत् कृत्वा मध्यमे पर्यनामिके॥ रूपान्तु प्रथमा मुद्रा सर्वसंक्षोभकारिणी
व्यान्तं वह्निसमारूढं द्वितीयस्वरभूषितम्॥ नादबिन्दुकलायुक्तं बीजं तस्याः प्रकीर्तितम्॥ आदाय
दक्षहस्ते न विज्ञेयार्घ्योदकं ततः॥ बीजद्वयं समाभाष्य तथैनाः प्रकटास्ततः॥ योगिन्यश्च समुद्राश्च ससि
द्धयश्च सायुधास्तथा सपरिवाराश्च सर्वोपचारकैस्तथा॥ त्रैलोक्यमोहने चक्रे त्रिपुराधिष्ठिते तथा पूजि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ताम्रर्पिताः सन्तुष्टेश्चाहस्तेन्निवेदयेत् ॥ स्वयमखिलचक्र स्थैर्योगिनीनां महौजसां ॥ यथावद्दवा
क्येन चक्रपूजां निवेदयेत् ॥ आद्या लक्ष्मीकलाभिरन्ता नित्यकलाः प्रपूजयेत् ॥ तुल्याकमण्डलुधरश्चतु
र्वक्त्रश्चतुर्भुजः ॥ राजहंससमासीनः प्रांशुरक्त्रांशउन्नत ॥ सावित्री वामपार्श्वे स्याद्दक्षिणे च सरस्वती ॥ स
र्वदेवाः स्थिता नग्रे देवाः सर्वेऽग्रतः स्थिता ॥ वर्णेन रक्तगौराङ्गो जपमालकमतकाः ॥ वराभयप्रदो देवः स
र्वलोकपितामहः ॥ प्रणवं पूर्वमुत्कृत्य ब्रह्मणो नम आलिखेत् ॥ अनेन मनुनादेवि ब्रह्माणं परिपूजयेत् ॥
बालयाग्योजितां कृत्वा पूजयेच्चक्रनायिकां ॥ दक्षिये ज्ञाविणींमिमुज्ञान्तनक्षीजपुरक्तां ॥ रत्नानेवक्रिमारूढ
न्तर्य्यस्वरविभूषितं ॥ नादबिन्दुकलायुक्तं द्राविणीबीजमुत्तमं ॥ सर्वसंक्षोभमुद्रायामध्यमेसवलयदा
ङ्क्रियते परमेशानि सर्वविद्राविणी नदा ॥ शुद्धस्फटिकसंकाशं पञ्चवक्त्रं त्रिलोचनं व्याघ्रचर्मस्थिते
पद्मेप भासनगतं सदा ॥ संस्मिप्यनुमुमान्देवीं वामरीन्पलधारिणीं ॥ द्विभुजां सर्वगौराङ्गीं सौम्याति
सौम्यरूपिणीं ॥ लीलारविन्दं वामेन पाणिना विभ्रतीं सदा ॥ भुजेनैतु वामस्यन्दनाक्षिवस्याङ्कुऽथदक्षिणे

विन्यस्य दक्षिणां हस्तं त्रिस्तनीं परिचिन्तयेत्॥ त्रैलोक्यजननीं त्रैलोक्यजनकं शिवं॥ उमां महेश्वरं ध्यात्वा
मोहयेज्जगतीमिमां॥ कामेशाङ्कगता कामेशान्तरीयमनुभूषितं॥ नादबिन्दुकलायुक्तं दद्याद्बीजं तयोः क्र
मात्॥ उमादेव्या तथा देवो महेश्वरो हृदर्पितः॥ मन्त्रराजः समाख्यातश्चतुर्वर्गफलप्रदः॥ अनेन तौ सम
भ्यर्च्य सर्वज्ञं क्षोभके ततः॥ अनङ्गकुसुमां पूर्वे कवर्गेण तु पूजयेत्॥ चवर्गेणाथ देवेशि दक्षिणेऽनङ्ग
मेखलां॥ अनङ्गमदनां देवि टवर्गेण च पश्चिमे॥ तवर्गेणोत्तरे भागे पूजयेन्मदनातुरां॥ तथैवानङ्ग
रेखां तु पवर्गेण हुताशने॥ यवर्गेणाथ देवेशि नैरृतेऽनङ्गवेगिनीं॥ शवर्गेणाथ वायव्येऽनङ्गाङ्कुशां
च पूजयेत्॥ लक्षाभ्यां परमेशानि ईशानेऽनङ्गमालिनीं॥ एतेषु स्थानेषु समावाह्य पूजयेच्चक्रनायिकां॥ तंत्र
कामबीजं पुरस्कृत्य मुद्रां संदर्शयेत्ततः॥ मध्यमानामिकाभ्यां तु कनिष्ठानामिके समे॥ अङ्कुशाकार ७३
रूपाभ्यां मध्यमे परमेश्वरि॥ इयमाकर्षिणी मुद्रा त्रैलोक्याकर्षकारिणी॥ सर्वसौभाग्यदं चक्रं भास्वरं
परिचिन्तयेत्॥ पद्मरागप्रतीकाशां किरीटाङ्गदभूषणां॥ पद्मासनसमासीनं श्मशानालिङ्गितां पि

रं ॥ दधानां वाहुभिर्देवं वरमूप भेक्षामयौ ॥ प्रागुक्तेन तु मन्त्रेण भास्कं परिपूजयेत् ॥ संप्रदायाः प्रपूजे
च पूजयेत्सनायिकां ॥ वाराणाक्षि रुवीजस्थं दक्षकर्णविभूषितं ॥ नादविन्दुकलायुक्तं वीजं वश्यकरं म
हत् ॥ पुराकारो करीहत्वात जत्यकुडा रूपिणी ॥ परिवर्तं क्रमेणैव समयमत दयोगते ॥ क्रमेणादे वि
तेनैव कनिष्ठानामिके अपि ॥ संयोज्य निविडाकार्याः सर्वा अङ्गुष्ठदेशतः ॥ मुद्रैषा परमेशानि सर्व
वश्यकरी मता ॥ सर्वार्थसाधके चक्रे वाह्ये दशारकेततः ॥ मणिमयमहद्रत्नपद्मजे ऽतिमनोहरे ॥ पी
ठे तस्मिन्निविष्टस्य प्रद्योतन शतद्युते ॥ तप्तकाञ्चनवर्णाभा वनतो यस्य पार्वति ॥ आसीनस्तु स्मृतं
शंचविद्युद्विद्रुमसन्निभि ॥ स्वरामेरुगतां पद्मां भिषं नमरुरोक्षणां पीतवस्त्रपरीधानां सस्मितवा
द्मभूषणां शङ्खचक्रगदापद्म दधानं वाहुभि सदा ॥ चिन्तयित्वा महेशानि पूजयेज्जगदीश्वरीं ॥ मन्त्रम
स्याः प्रवक्ष्यामि चतुर्वर्गप्रदायकं ॥ कामवीसमुद्धृत्य हृषीकेशमतः परं ॥ ङेऽन्तश्च नतिसंयुक्तमनेन
तं प्रपूजयेत् ॥ कुलाकौलात्प्रपूज्यैव पूजयेत्सकनायिकां ॥ सर्वास्मादकारीं सुजंदर्शयेत्क्षीजपूर्विकां

समर्गोमध्यगुरेतस्याबीजमेतदुदाहृतं ॥ सम्मुखौ तु करौ कृत्वा मध्यमे मध्यमे यजेत् ॥ अनामिके तु सर
लेतदहि स्वर्जनीद्वयं ॥ दशकारेण ततोऽङ्गुष्ठौ मध्यमानखदेशगौ ॥ मुद्रैषा सादिनी नाम्नान्ते दिनीस
र्वयोषितां ॥ सर्वरक्षाकरे चक्रे तथा नर्ईशकोणके ॥ त्रैलोक्यमोहनं विष्णुं ध्यायेद्बन्धूकसन्निभं ॥ जवा
कुसुमसङ्काशं दाडिमीकुसुमप्रभं ॥ उद्यदादित्यसङ्काशं रत्नसिंहासनोऽम्बुजे पद्मासनसमासीनं
भुजैश्चतुर्भिरायते ॥ पाशाङ्कुशौ च दधतं पुष्पबाणेक्षुकार्मुकं ॥ अरुणायतलोलाक्षियुगलं मदघू
र्णितं ॥ सर्वाङ्गस्फुरवेशाढ्यं वीरहाराङ्गदभूषितं ॥ रक्तमालाम्बरधरं रक्तगन्धानुलेपितं ॥ सव्यामोहन
तां शक्तिं श्लिष्यन्तीं दक्षपाणिना ॥ वामेन पाणिना पद्मं धारयन्तीं शुचिस्मितां ॥ रुचिराङ्गभूषाढ्यांशु
कलौसमविराजितां ॥ मदनोन्नप्रहृदयां श्लिष्यन्तोऽसि परमेश्वरीं ॥ कलाकलितमधुरान्तरुणीयौवनाश्रि
तां ॥ सकामुकभुजैनैव श्लिष्यन्तं सुदृढं तथा ॥ तज्जनितपरानन्दनन्दितां परमेश्वरं ॥ नागगन्धर्वदेवानां
सङ्कलाभिः समावृतं ॥ मदनोल्लसिताङ्गाभिर्भूषिताभिर्विभूषितोः ॥ आत्मभेदेन योध्यायेदेवदेवं जग

नयुतं ॥ त्रैलोक्यमोहनं विष्णुं त्रैलोक्यमोहनो भवेत् ॥ बीजमस्य प्रवक्ष्यामि लक्ष्मीनारायणात्मकं ॥ ब्र
ह्मा पुरन्दरः पद्मा मायाक्षरमतः परं ॥ नादबिन्दुकलायुक्तं बीजं त्रैलोक्यपूजितं ॥ श्रुतिषु मथितसारं दे
वता कण्ठहारकं ॥ त्रिभुवनवशकारी श्रीधनाद्यर्थकारकं ॥ शमदमयविनाशं सर्वशक्त्याप्रणाशं
भवजलधिविशोषं ज्ञानसान्द्रप्रकाशं ॥ अनेनैतं समभ्यर्च्य निगर्भं योगिनीं यजेत् ॥ नायिकां तत्र स
म्पूज्य मुद्रां सन्दर्शयेत्तथा ॥ तस्मादनामिका युग्ममधः कृत्वांकुशाकृतिः ॥ तर्जन्यावपि तेनैव क्रमेण
विनियोजयेत् इयं महांकुशा मुद्रा सर्वकार्यार्थसाधिका ॥ कामदेवाग्निमारूढो बिन्दुनादककलान्वितः
त्रयोदशाक्षरोपेता मुद्राबीजमितीरितं ॥ अष्टकोणं महेशानि रहस्य योगिनीर्यजेत् ॥ वाशन्यौ प्रमु
खाः सर्वाः पूर्ववद्बीजसंयुताः ॥ पादुकां पूजयामीति न्यासादेव विशेषतः ॥ ज्ञानानि कां यजेष्ठांकिंभ
किंसिद्धिश्च वामतः ॥ नदस्केशचरी मुद्रां तां सन्दर्शयेत्ततः ॥ सव्यं दक्षिणदेशे तु दक्षिणं वामदेश
तः ॥ ताडं कृत्वा महेशानि हस्तौ सम्परिवर्त्य च ॥ कनिष्ठानामिके द्वे वियुक्ते तेन क्रमेण तु ॥ तर्जनीभ्या

गन्ध
७५

समाकाने सर्वौर्द्धमपि सध्यमे ॥ अङ्कुशाख्यं महेशानि कारयेत्सरलाविह ॥ इयं सा खेचरा मुद्रा नाम्ना
सर्वोत्तमा प्रिये ॥ रचिते यं महामुद्रा सर्वतेजोपहारिणी ॥ शिवं चन्द्रं तथा कान्तं यानं वह्निसमन्वितं ॥ स
कादशस्वरोपेतं बीजमस्याः प्रकीर्त्तितं ॥ मध्यत्रिकोणचक्रे च अग्रदक्षोत्तरे शिवे ॥ तांएव पूजयेद्देवि
विन्यासोक्तविधानतः ॥ पादुकां पूजयामीति विशेषोऽत्र प्रकाशितः ॥ त्रिपुरापाशुचक्रे श्री सिद्धासिद्धि
श्ववामतः ॥ परितर्ज्जकयोस्पर्शो वक्रचक्राकृती प्रिये ॥ तर्ज्जन्यङ्कुशयुगलं युगपत्कारयेत्ततः ॥ अधक
निष्ठावस्थे मध्यमे विनियोजयेत् ॥ तथैव कुटिले योज्यौ सर्वाधः छादनामिके ॥ बीजमुद्रेयमाख्याता
परा चै सौकमातृका ॥ सदाशिवस्य बीजाद्या दर्शयित्वा विधानतः ॥ सर्वानन्दमये चक्रे ब्रह्मविष्णुस्वरू
पिणीं ॥ पूजयित्वा विधानेन चक्रेशीमपि भैरवी ॥ ज्ञानेच्छादिक्रियारूपां मोक्षसिद्धिश्च वामतः ॥ सिंदूर
पुरतो देव्या जगदाधारमध्यितं पूजयेत्सततं भक्त्या पश्यत्सुमखिलासुरं ॥ वाग्बीजं पूर्वमुच्चार्य योनि
मुद्रां प्रदर्शयेत् ॥ अनामिकायुगे न्दविपरिवर्त्तनयोगतः ॥ अङ्कुशाकाररूपाभ्यां तर्ज्जनीभ्यां तु धारयेत्

तंत्र
७५

मध्यमेरुरजन्मध्येक निमिषेकेनतथाविधेः ॥ दशाकौरौतनोऽङ्कुरशोकनिखायरिसंस्थितौ ॥ योनिमुद्रेय
माख्याताप्रात्रैलोक्यमातृका ॥ अत्रपदंसमाभाष्यसर्वानन्दमयाननतः परं ॥ चक्रराजपदस्यान्तेत्रुस्तत्व
रूपमालिखेत् ॥ सम्विदेत्ययपदंकुर्याद्विन्दुचक्रेततः परं ॥ रुपायपरापराशक्त्याऽऽस्थयोगिनीततः ॥ श्रुस्र
स्व—रूपिणीपरमात्मरात्रिपुरसुन्दरी ॥ ससुजसायुधांश्चैवसवाहनांस्तथैवच ॥ तथासपरिवारान्तेसर्वो
पचारकैस्तथा ॥ पूजितास्तुतथादेवीतर्पितनमीतिपूर्ववत् ॥ पुष्पाञ्जलिभिरभ्यर्च्यतर्पयेत्त्रिविधिनाततः
॥ ॥ इतिगन्धर्वतन्त्रेषोडशः पटलः ॥ ० ॥ ईश्वरउवाच ॥ प्रमादस्तुसुश्रोणिदेवीभाव
यन्प्रजपेन्मनुं सर्वयज्ञेषुसर्वत्रजपयज्ञः प्रशस्यते ॥ जपात्तुष्यन्तिदेवाश्चजपात्सिध्यन्तिसा
धकाः तस्मात्सर्वप्रयत्नेनजपनिष्ठापरोभवेत् ॥ जपस्यादक्षरामूर्तिरङ्गंतंनविलम्बितं ॥ पूजाध्यानं
जपोहोमइतिकर्मचतुष्टयं ॥ प्रत्यहंसाधकः कुर्यात्स्वयंचेत्सिद्धिमिच्छति ॥ जपस्यान्तेशिवंध्याये
ध्यानस्यान्तेपुनर्जपेत् जपध्यानसमायुक्तः शीघ्रंसिध्यतिमन्त्रवित् ॥ जपरूपाशिवाशक्तिर्ध्यानरूपः

गन्ध
७६

सदाशिवः तयोर्योगाद्भवेत् सिद्धिर्नान्यथा खलु पार्वति ॥ संयुक्तं संयुतं कृत्वा यद्युक्तं तत्र योजयेत् ।
यथा सिद्धिस्तथा मालामालाङ्कं जपकर्मणि ॥ मालया जपतो नित्यं सिद्धिरेव न संशयः ॥ आशु सिद्धि
करी माला वर्णमयी समीरिता ॥ अनुलोमविलोमाभ्यां मातृकायाः सबिन्दुके ॥ सुमेरुके सदा कार्या मा
ला सर्वसमृद्धिदाः ॥ अष्टाधिके ऽष्टवर्गैस्तु पुनरेव समापयेत् ॥ वर्णान्नान्तरितं मन्त्रं कृत्वा जप्यते साधकः
मालामावर्तनैः स्वासु अङ्गुलीषु जपेद्बुध ॥ नित्यं जपं करे कुर्यान्न तु काम्यं कदाचन ॥ आरभ्यानामिका
मध्यात् प्रदक्षिणेन वै क्रमात् ॥ तर्जनीमूलपर्यन्तं जपेद्दशसु पर्वसु ॥ तर्जन्यग्रे तथा मध्ये यो जपेत्त
त्र मत्सरः ॥ चत्वारि तस्य नश्यन्ति आयुर्विद्या यशो बलं ॥ अनामामध्यपर्वन्तु मेरुत्वेन लङ्घयेत् ॥ मेरु
प्रदक्षिणां कुर्वन्ननामामूलपर्वतः ॥ अङ्गुलीपर्वभिर्मन्त्रं जपेत्स्वान संख्यशेत् ॥ अङ्गुलीर्नापि युञ्जी
त किञ्चिद्यद्युञ्जितान तले अङ्गुलीनां वियोगे तु छिद्रे स्रवते जपः ॥ स्फाटिकादिभिरप्यत्र माला जपस
समृद्धिदा ॥ निधाय पुरतो मालां सव्यहस्तगतां च वा ॥ जपादौ पूजयेन्मालां तोयैरभ्युक्ष्य यत्नतः

तंत्र
७६

इत्थं मन्त्रेण मालायाः प्रोक्षणं परिकीर्त्तितं ॥ ऐं मां माले महामाले सर्वशक्तिस्वरूपिणि चतुर्वर्गस्त्वयि न्य
स्तस्तस्मान्मे सिद्धिदा भव चन्दनकस्तूरीरोचनागुरुकुङ्कुमैः ॥ पूजयित्वा ततो मालां गृह्णीयाद्द
क्षपाणिना ॥ बीजं गणपतेः पूर्वमुच्चार्य्येत यत्नतः ॥ अविघ्नकुरु माले त्वं गृह्णीयादित्यनेन तु ॥ यथा
हस्तान्न च्यवते जपतः स्वकं तथा चरेत् ॥ हस्तच्युतायां विघ्नः स्याच्छिन्नायां मरणं भवेत् ॥ यत्नात्सं
गोपयेदेनां भ्रमयेन्न विधानयेत् ॥ गुरुं प्रकाशयेन्नैव यन्त्रं मन्त्रं कदाचन ॥ अक्षमालाञ्च मुद्राञ्च गुरवे
ऽपि न दर्शयेत् ॥ भूतराक्षसवेतालाः सिद्धगन्धर्व्वचारणाः हरन्ति प्रकटं यस्मात्तस्माद्गुप्तं जपेत्सदा
मालां स्वहृदयासन्नां दक्षिणस्य करस्य च ॥ मध्यमाया मध्यभागे वर्ज्जयित्वा तु तर्ज्जनीं ॥ अनामिकाकनि
ष्ठाभ्यां युतया ॥ नम्रभागतः स्थापयित्वा तत्र मालां अङ्गुष्ठाग्रेण ततः गतं ॥ प्रत्येकं बीजमादाय कुर्य्यात्क्ष
मेनन स्पृशेत् ॥ प्रतिवारं यथेष्टमन्त्रेशानेनैव स्वं न चालयेत् ॥ तर्ज्जन्या न स्पृशेन्मालां मुक्तिदो गणनाक्रमः
अङ्गुष्ठपर्वमध्यस्थां परिवर्त्तं समाचरेत् ॥ अङ्गुष्ठेन विना कर्म्म कृतं भवति निष्फलं ॥ अङ्गुष्ठं मोक्षदन्ते

गन्ध ७७ वितर्जनी शाङ्गनाशिनी मध्यमाधनसिद्धिस्यास्थानिकर्म्मण्यनामिका ॥ कनिष्ठा कर्षणी ज्ञेया जपक-
र्म्मणि सिद्धिदा ॥ मालाबीजन्तु जप्तव्यं स्पृशेन्न हि परस्परं ॥ पूर्वबीजं जपन्वस्तु परबीजन्तु संस्पृशेत्
अङ्गुष्ठेन भवेत्तस्य निष्फलं तस्य तज्जपः ॥ छिद्रिताक्रान्विता माला छिन्ना भिन्नापि वा भवेत् ॥ वामाङ्गे
दक्षपादञ्च विन्यस्य परमेश्वरि ॥ कुर्व्वीतासने मन्त्री दिशश्चानवलोकयन् ॥ गुरुदैवतमन्त्राणामेक-
सन्नावयन्धिया ॥ अथवा चिन्तयन्मूर्द्धि गुरुं वर्णादिनेदतः ॥ मन्त्रस्वरूपकन्ततो ध्यात्वा चिन्तयन् हृदि
देवतां ॥ निरोदेनोपांशुना वापि मानसेनाथवा प्रिये ॥ जपारन्तं सुधीः कुर्य्याद्देवताभावतत्परः ॥ निःश-
ब्दं परमेशानि स्पष्टवाचा निगद्यते ॥ अव्यक्तः प्रस्फुरद्वक्त्र उपांशुः परिकीर्त्तितः ॥ धिया यदक्षरश्रेणीव-
र्णस्वरपदात्मिकां ॥ उच्चरेदनुसंस्मृत्य स मानसो जपः ॥ सोषुम्नाध्वन्तु हृदितं ध्वनिमात्रं विभावये- तंत्र ७७
त् ॥ यन्त्राक्षराणि चित्स्थौ तानि विभावयन् ॥ नामैव परमेश्वो स्थिरमासनसंहितः ॥ दर्शयन्त्या-
त्मजं वपूजाहोमादिभिर्विना ॥ मनः संहृत्य विषयान्मन्त्रार्थगतमानसः ॥ नद्रुतं न विलम्बञ्च जपेन्मौ-

त्किंपंकिंचित्‌॥ निगयेन्नतुयज्ञांस्तलक्षमात्रेवराननं॥ उपांशुस्त्वारसौनैवतुल्यंभवतिशैलजे॥ उपां
शुलक्षमात्रस्तुयज्ञपंकमलेक्षणे॥ मानसोस्त्वारणान्तुल्यमेकेनवरवर्णिनि॥ विशेषात्रिपुरातन्त्रे
प्रशस्तोमानसोजपः॥ मनसावस्मरेत्तस्तोत्रंवचसावाजपेन्मनुं॥ उभयंनिस्फलन्तस्यभिन्नभाण्डेय
कंयथा॥ उत्तमोदशसाहस्रःसहस्रोमध्यमःस्मृत॥ अधमस्तुद्विजानीयाद्दशोन्तरशतंशिवे॥ इत्यादस्तु
नमेकेशानिनशस्तंजपकर्म्मणि॥ यथाशक्तिजपंकुर्यात्संख्यायैवप्रयत्नतः॥ अथस्त्यात्संख्यायज्ञ
पंततसर्व्वंनिस्फलंभवेत्‌॥ गन्रूशिराक्षसायेतनगाणायन्तेसर्व्वथाबुध॥ नैकवासाजपेन्मन्त्रंबहुवस्त्रा
कुलोऽपिवा॥ अप्राहृतकेशोवाप्पिक्षारसापाहृतोपिवा॥ चिन्ताव्याकुलचित्तोवाक्षुधोवापिचरान्वितः
निर्वोधःप्रीतिचित्तोनरस्त्वगोनक्षुधान्वितः॥ तथाचान्यमनाभूत्वाप्रलपन्नजपेन्मनुं॥ अनासीनःश
यानोवागच्छन्नभुंजानएवच॥ यथाविधिजपंकृत्वासमन्त्रेणार्घ्योदकेनचजपंतच्चमहेश्यावामह
स्तेसमर्पयेत्‌॥ तेजोरूपंजपफलंशिवयास्वीकृतंस्मरेत्‌॥ श्रीवीजेनैवपाणिभ्यामवनाम्यशीर्षतः

CC-0. In Public Domain. Digitization by eGangotri

नारसंतेन बीजेन दक्षाभ्यां स्थापयेत्ततः ॥ जपकर्म्मणि मालायाः प्रतिपत्तिरियं प्रिये ॥ एवं यः कुरुते मा
लां जाप्यं स्व साधकः प्रिये ॥ स प्राप्नोतीप्सितं देवि हानस्यायुर्विपर्ययः ॥ निःसेतुस्तु यथा तोयं क्षरणा
न्निम्नं प्रसर्पति ॥ मन्त्रस्तथैव निःसेतुः क्षरणात् क्षरति मन्त्रिणां ॥ तस्मात् सर्वेषु मन्त्रेषु सर्ववर्णादिम
ध्ययोः ॥ पार्श्वयो सेतुमादध्याज्जपकर्म्मणि साधकः ॥ अकारस्त्वाप्युकारस्तु मकारस्तु प्रजापतिः ॥ वेदत्रया
त् समुद्धृत्य प्रणवं निर्म्मितं पुरा ॥ जपादौ जपकर्म्मान्ते प्रणवं सेतुरूपकं ॥ नियोजयेन्महेशानि सर्वका
र्य्यार्थसिद्धये ॥ जपान्ते जुहुयाद्देवि दशांशं जपमानतः ॥ तत्र देव्याः पुरोभागे साधकः परमेश्वरि ॥ होम
येत्संस्कृते वह्नौ तत्र देवीं ध्यात्वा स्मरन् ॥ उद्दंतस्त्वे समाभाष्य मूलमन्त्रेण सुन्दरि ॥ स्वाहान्तेन व होतव्यं पा तंत्र
यसैर्म्मधुराप्लुतैः ॥ वरलाभस्ततो हुत्वा सन्नव्य चान्यदेवता ॥ षडाहुतीः षडङ्गेन नित्यहोमेऽयमी ७८
रितः ॥ एकतः सर्वकर्म्माणि एकतो जपहेनयोः ॥ सर्वौषधिकं होमकर्म्म होमात् किं वा न साध्यते ॥ अन
यादीक्षितो मन्त्री यदि होमविवर्जितः ॥ त्रिविधं दुःखमाप्नोति नित्यं होमपरो भवेत् ॥ अकुर्वतामग्निहो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रमगौर्मूर्त्वामहेश्वरी ॥ धनानि श्रीयुग्रसन्ति गृहक्षेत्रपशून्यपि ॥ बहुदुःखेनार्जितानि सन्त्विमानि
चिरं रात्तु ॥ आत्मप्राणाधिकान्याशुभूतानि प्रसन्नीश्वरि ॥ अग्निहोत्रं सदा कुर्यात्तस्मादग्निमयी
श्वरि ॥ अग्निहोत्रविधानेन सम्यक्संभाजनं भवेत् ॥ अग्निहोत्रपरस्योक्तं वह्निर्भवति शीतलः ॥ गृहक्षे
त्रादिवित्तेषु जाठरः परः ॥ अग्निर्देवसुरश्रेष्ठा तस्मादग्नौ कुर्वीत सदा ॥ पक्षान्ते मासान्ते वापि वर्षान्ते वा
यथाविधि ॥ होमान्ते जपेच्छ्रियं होमद्विगुणसंख्यया ॥ स्तवन्नानाविधैः स्तोत्रैः प्रणमेत् सप्रद
क्षिणं ॥ एवं नानाविधैर्देवीं सन्तोष्य साधकोत्तमः ॥ भक्तिप्रवणचित्तेन निवेद्यानि निवेदयेत्
अनुलेपञ्च सिन्दूरं नेत्राञ्जनमुत्तमं ॥ धूपमारदीपाश्च दर्पणं व्यञ्जनं तथा ॥ उष्णीषं चामरं चैव
घण्टानादमनुत्तमं ॥ वाद्यं गीतं तथा नृत्यं क्रीडाकौतुकमञ्जसे ॥ निर्मञ्जनं च सिञ्जयैर्दीपावलि
भिरेव च ॥ दूर्वार्पणं शिरोदेशे साक्षात्कुशानैः शनैः ॥ भक्तिप्रवणचित्तश्च दास्यान्यात्मनिवेदनं
एवं निवेदयेद्देव्यै निवेद्यानि तथा बुधः ॥ स धन्यः सर्वलोकानां नानां पूज्यश्च भूतले ॥ देवताना

मुधीनाञ्चैदैत्यानामथरक्षसां॥ गन्धर्वाणां मनुष्याणां नागादीनां महात्मनां॥ तस्मात्कार्यापि सर्वेषां
माननीयः सुरासुरैः॥ सार्वभौमपदं भव्यावैवल्यं लभते ततः॥ अनुलिप्य महादेवीं गसय ज्ञागमी
मिमां सिन्दुरैस्तिलकं देव्या दत्वा सर्वाश्च योषितः॥ दिव्यज्ञानं भवेत्तस्य सहाज्ञानमनुत्तमं॥ माल्या
दीनां प्रदानेन महालक्ष्मीः स्थिरा गृहे॥ ताम्बुलस्य प्रदानेन पानीयस्यापि शोभने॥ सदानन्दम
यो भूयात्समन्तुःखविवर्जितः॥ धूपैः प्रधूपिता देवी दीपैश्चापि निराजिता॥ ददाति वित्तं पुत्रांश्च
धरां भुक्तिमरोगितां॥ धान्यश्चाप्यखिलान्कामान्मतिं धर्मे तथा शुभां॥ दर्पणं दर्शयित्वैव माह
प्यं लभते विभो॥ व्यजनेनाथ मेर्यापि व्यजयित्वा महेश्वरीं॥ नैवेद्ये महालक्ष्मीश्चामरञ्च यथावि
ती॥ निमेयार्धं महादेव्याश्छत्रं चोपरि धारयेत्॥ तस्योपरि महच्छत्रं धार्यते तु समादरं॥ लोक
पालैः समागत्य सर्वदा जिञ्चिदग्नापतिः॥ घण्टाशङ्खनिनादं ततो दर्शयेन्महेश्वरीं॥ भेरीदुन्दुभिवा
द्यश्च महत्वं तस्य मनुव्रजेत्॥ अपानोवा दर्शयेत् घण्टां शङ्खं वा तस्य मेव हि॥ स निर्लज्जः कथं कुर्ते पूज

नेत्र
७९

CC-0. In Public Domain. Digitization by eGangotri

यामिमहेश्वरीं॥ ब्रह्माविष्णुरुद्राद्यायेसर्वेशक्राद्यादिवादिनः॥ शक्रःप्रतापमयस्तस्माद्देवदेवसन्निधौ
वाद्यंयःकारयेद्देविगीतंनृत्यंतथैवच॥ तुम्बुरुर्नारदश्चैवहाहाहूहूस्तथैवच॥ प्रसादयन्तितंनि
त्यंविद्याधराप्सरादयः॥ सुवासिन्योसदष्टौभोजयित्वायथाविधि॥ वेश्यास्त्वलंकृताःसर्वाःक्री
डयेयुरलंयदि॥ देवीसुहृदिश्चपुरतस्तस्यपुराणफलंशृणु॥ उर्वशीप्रमुखास्तस्यास्तत्क्रीडयेयुरलं
सुत॥ योनृत्यंकारयेद्देविहास्यानन्दाययद्भवेत्॥ तेनप्रमुदितोनित्यंदेवीलोकेमहीयते॥ मङ्गलानि
महादेव्याःकारयित्वायथाविधि॥ विमानवरमारुह्यब्रह्मविष्णुपुरःसरः॥ सर्वकामसुखंदिव्यंसर्वर
त्नसमन्विता॥ अनुव्रजन्तिमित्राद्यैःसपत्नीकैःसवाहनैः देवीलोकेसामायान्तेसमागतंसुराङ्गनाः
अरुन्धत्यथसावित्रीतन्महल्याशचीतथा॥ अनुसूयादितिश्चैवमातरश्चसहाङ्गना॥ निर्मञ्छमौक्ति
कैर्दिव्यैरत्नदीपैर्निवेश्यच॥ अक्षयंमङ्गलंशीर्षेअर्पयन्तिसुरान्विताः॥ गोपृष्ठोपरियत्कालेतिष्ठे
त्सर्षपसमर्पितं॥ तावत्तिष्ठेत्महादेव्याःभक्तिःकृतानरःप्रिये॥ पुनातिसर्वपापेभ्यःपापात्मापापकृत्तन

CC-0. In Public Domain. Digitization by eGangotri

गन्ध
८०

यदि ॥ पितृमातृकुलैः सार्द्धं स्वर्गलोके महीयते ॥ ततः पुनरिहागत्य चिरेण भक्तिमान् ॥ प्रभुः सार्वभौ
मपदं लब्ध्वा केवल्यमाप्नुयात्ततः ॥ प्रावृष्यां पथमेकेन्तु जगन्नाथमुपस्पृशति ॥ अनुमेयमनेनैव बहुना
ववसावर्षि ॥ भक्तिः पुनर्महेशानि यदि हात्यचिन्तना ॥ भजनं सर्वभावेन नैस्वयसेवकवर्त्मना ॥ ज
जन्मान्तर्महादेव्या दासोऽहमिति भाव्यते ॥ सक्षात् यस्य हि भृत्यास्ते पुरन्दरमुखाः सुराः ॥ पितृमातृमु
खान् विप्रान् गाश्च भृत्याननेकशः ॥ हत्वा निवेदयेत् यस्तु आत्मानं तत्पदाम्बुजे ॥ सुकृतगुणमय
न्देहं परं ब्रह्माधिगच्छति ॥ अहं पुनरिदं विश्वं ब्रह्माण्डं ब्रह्मणा सह ॥ मिलितार्थितातथालोकान् समोप्य
परमेश्वरि ॥ तस्यै निवेद्य चात्मानं त्यास्यामि ब्रह्मशाश्वतं ॥ तस्माद्यत्क्रियते कर्म्म ममेति च यदा भवेत्
आत्मानं तत्पदाम्भोजे मत्वा मन्त्रेणार्पयेत् ॥ तर्पणानि पुनर्दत्वा नवमुद्राः प्रदर्शयेत् ॥ मुद्रानि
च तापस्मात्तेन मुद्राः प्रकीर्तिताः ॥ कामं सोक्षन्तथा धर्म्ममर्थं मुद्रा निज्जास्वयं ॥ ददाति साधकायाशु
देवीगणं समुन्मुका ॥ संक्षोभमजगिरीणीकर्षवश्योन्मादमहाङ्कुशा ॥ खेचरी बीज योन्याख्या नवमुद्राः

नव
८०

स्तताः क्रमात् ॥ दर्शितास्वासु मुद्रासु भवेत् पूजासमापनं ॥ स्वस्वबीजेन मुद्रायावस्थानं परिकीर्तितं
दर्शनं मूलमन्त्रेणान्यागः ॥ क्षोभोद्भवेन च ॥ मुद्रानुष्ठानमज्ञात्वा यो मुद्रां धारयेद्बुधः ॥ विफलं तस्य
तत्सर्वं जीवहीनं वपुर्यथा ॥ पूजान्ते दर्शितास्वासु देव्याश्च सन्निधिर्भवेत् ॥ मन्त्रैः प्राचुर्यमन्त्रे वस्तु
द्रव्याभ्यर्चनं तथा ॥ निर्जनस्थानसंशुद्धिश्च दोषराहित्यता तथा ॥ पूजोपकरणस्येह वाहुल्यं च पवि
त्रता ॥ सौरभ्यमान्ति सौरभ्याश्च मन्तव्या रक्तिस्तथा ॥ संस्थानयोरद्वैरणाव मनोहारित्वमात्मनं ॥ सौम
नस्यसुवेशश्च यस्तुः कानुर्तिरेव च ॥ पूजाविधिसुदक्षश्च तथैवानन्यचिन्तना ॥ स्तुतिर्नीतिजपश्चैव
बलिः पेयं तथैव च ॥ हेतुरत्र समाख्यातो देवी सान्निध्यकारकः ॥ मन्त्रं श्राव्य न सिन्दूरं स्वाङ्गरागेषु
कुङ्कुमं ॥ इति योग्यत्रसंप्रोक्तो विशेषस्त्रिपुरार्चने ॥ एभिर्विशेषैः सहितं त्रिपुरातन्त्रगोचरं ॥
इति ज्ञानार्णवे नित्यतन्त्रे सप्तदशः पटलः ॥ ० ॥ ईश्वर उवाच ॥ ॥ अथ वक्ष्ये महेशानि वटुका
दिविधिं शृणु ॥ येनानुष्ठितमात्रेण साधकः सिद्धिमाप्नुयात् ॥ बलिभिस्तर्पिता येन पूजिता यस्य

गन्ध ८१

सुव्रते ॥ सिद्धयः सकलास्तस्य करस्था नात्र संशयः ॥ अन्यथा रुषितैस्तैर्हि सविघ्नैः परिभूयते ॥ तस्मा
त्तेभ्यः प्रयत्नेन बलिं कुर्यात्तिहेतुना ॥ मांसेन साधितं भक्तं स्वतं दधिसपिस्तृकं ॥ मांसानि विविधान्य
न्नमुदग्धमीनमेव च ॥ श्रीचक्रमध्यतो देवि मण्डलानां चतुष्टयं ॥ ईशानवह्निनैरृत्यवायुकोणेषु
पार्वति ॥ ध्येया देवस्तथा विघ्नः पुत्रोऽयं वटुरूपधृक् ॥ वटुकः कमलाक्षस्तु स्वर्णगौरश्चतुर्भुजः ॥ गदा
पद्मश्च शूलश्च चक्रश्चापि करैर्धृतं ॥ विघ्नं पुरतो देव्या गजेन्द्रासनसंस्थितं ॥ वारुण्यां शक्तियुक्तश्च
चतुर्दशस्वरान्वितं ॥ सहितं चन्द्रबिन्दुभ्यां वटुकाय समन्ततः ॥ अनेन मनुना देवि गन्धाद्यैः पूजयेत्ततः
तदग्रे परमेशानि पायसान्नोक्तान्वितं ॥ कृत्वा च विधिवत्तत्र बलिं मन्त्रेण दापयेत् ॥ त्र्यैयहि देवि
पुत्रा ते वटुकानाथनाथ च ॥ कपिलाकोजटाभारभास्वरा नेत्रिनेत्र च ॥ ज्वालामुख्यास्व सर्वमेतं विघ्नना
शय नाशय ॥ सर्वोपचारसहितं बलिं गृह्णद्वितयपदं ॥ वह्निजायान्वितो मन्त्रो वटुकस्योद्धृतः ॥ वामा
कुष्ठानामिकाभ्यां बलिं तस्मै निवेदयेत् ॥ अस्यैवाराधनं कृत्वा मन्दभाग्योऽपि सुव्रते ॥ सर्वबाधाविनि

तंत्र ८१

र्मुक्तः सम्पदां भाजनं भवेत् ॥ यजनं ह्यस्य देवस्य साङ्गं कथितं पुरा ॥ बलिप्रदानमात्रं तु प्रसङ्गात्तत्क-
थितं शिवे डाकिनीप्रमुखाः स्यथा ह्लिना तर्पयेत्ततः ॥ तथैव वा मनोदेव्या मण्डले योगिनीः स्मरेत् ॥ अथवा
चिन्तयेदेता योगिनीः सर्वसिद्धिदाः ॥ योगिन्यः कामरूपाश्च रत्नकाञ्चनभास्वराः ॥ मनाकङ्कालमालाढ्या
कर्त्रीतत्प्रसन्नताः ॥ गलद्रुधिरगन्धाढ्या रक्तवस्त्रानरीयिका ॥ लिङ्गपाशाङ्कपालखड्गचर्माणि चापि धृता करैः
अभिमतं समस्तानां दीयमानां मुदान्विता ॥ गन्धादिभिः समभ्यर्च्य बलिमन्त्रेण दापयेत् ॥ यामात्मकं समु-
च्चार्य योगिनीभ्यस्ततः परं ॥ स्वाहान्ते सर्ववर्णान्ते योगिनीपदमालिखेत् ॥ ककचश्चात्र मालिख्य वह्निजा-
यान्तं लिखेत् ॥ अनेन मन्त्रेणापि योगिनीनां बलिं हरेत् ॥ अङ्कुशमध्यमानामायोन्याकारेण योजयेत्
कृताञ्जलिस्ततो देविसंप्रार्थयेदनेन तु ॥ ऊर्द्ध्वब्रह्माण्डतो वा पिदिविगगनतले भूतले निस्तले वा पाताले वा
पवनसलिलयोर्यत्र कुत्र स्थिता वा ॥ क्षेत्रे पीठोपपीठादिषु कृतपदा धूपदीपादिकेन प्रीता देव्यः सदा नः शु-
भबलिविधिना पान्तु वीरेन्द्रवन्द्य ॥ क्षेत्रपालं महादेव्या वामतः परिचिन्तयेत् ॥ अपराजितवस्त्रिभिन्य

CC-0. In Public Domain. Digitization by eGangotri

स्थितस्य महात्मनः ॥ आरक्तवर्णाः स्तनंसुस्मेरूपशोभिते ॥ निनिडीकल्पवृक्षस्य मच्छायेरत्नभूषिते नी
लाब्जलचयप्रक्षंदधानेकरपङ्कजेः ॥ कृपाराम्बकपालस्त्वशूलं डमरुमेव च ध्यायेत्स समनन्तर्थं दंष्ट्रभि
न्नाधरं परं ॥ पूजयित्वा विधानेन वलिं मन्त्रेण दापयेत् ॥ षड्दीर्घस्वरसंभिन्नं क्षकारं विलिखेत् प्रिये
ततः क्षेत्रपदं पालभुपदीयादिवा लिखेत् ॥ सहितं वलिमालिख्य गृह्णगृह्णततो वदेत् ॥ वह्निजायान्वितोम
न्त्रः क्षेत्रपालस्य पार्वति ॥ वाममुष्टिं विधायाथ तर्जनीं सरलां कुरु ॥ अनया मुद्रया देवि वलिं तस्मै निवेद
येत् ॥ चतुर्थमण्डले देव्याः पुरतो दक्षभागतः ॥ नवीननीरदश्यामं सर्वाभरणभूषितं ॥ तुन्दिलं गजव
क्त्रं च चतुर्बाहुं दिगम्बरं वामदक्षोर्द्ध्वपाणिभ्यां पाशाङ्कुशवरं विभुं दक्षिणाधःकरेणैव मधुपूर्णकपालकं तंत्र
क्षिप्तरसदृशाकारां सुन्दाममदविह्वलां दूतरक्तोत्पलालस्य पाणिना तं गजः स्पृशां ॥ आलिङ्ग्य वामहस्तेन ८२
तस्या मदमन्दिरं ॥ स्पृशन्तं परमेशानं ध्यात्वा तं परिपूजयेत् ॥ गां गीं गूं रूपमालिख्य हे ० नं गणपति न
तः ॥ वरान् वरदानेनेच सर्वाननेजनमालिखेत् मे वशमानय प्राप्यवलिं गृह्णद्विधापदं ॥ वह्निजायान्वितो

मन्त्रोगणपस्यउदाहृतः॥ सुषिमध्यस्थितांदेविअङ्कुलींदशुवतुकुरु॥ गजानुरत्नमहामुजागणपस्य
सदाप्रिया॥ एतदन्नेमहेशानि सर्वभूतवलिंहरेत्॥ सुरासुराश्चपितरोयक्षरक्षःपिशाचका॥ एतेभूता
समुद्दिश्यवलिभिस्तान्प्रतर्पयेत्॥ वलिभिस्तर्पितास्तेतुयान्तियज्ञेश्चसहायतां॥ अतर्पितायदातस्मि
न्नैवेविघ्नरूपिणः॥ आत्मानंस्वाङ्कियासर्वांसहामन्त्रेणपार्वति ततोऽत्रस्वस्वरूपिरौपषिट्ठोपेणसम
र्पयेत्॥ वारत्रयमितःपूर्वप्राणानुद्धितनतःपरं॥ देहधर्माधिकाराणेजाग्रत्स्वप्नसुषुप्तिषु॥ मनसाचव
सावाचाकर्मणाचततःपरं॥ हस्ताभ्यांचततःपद्भ्यांउदरेणततःपरं॥ शिश्नाचयत्स्मृतंपश्चादद्युक्तं
यत्कृतंतन्तरेत्॥ मांयदीयंततोदेविसकरास्त्रंततःपरं॥ तथैवत्वयिशव्यानेवस्वाम्पर्पितमस्थिति॥
स्वाहान्तोमनुरित्युक्तोमन्त्रः आत्मसमर्पणेएतदन्नेनमहामन्त्रेणयतःसमुदीरयेत्॥ आवाहनंनजा
नामिनजानामिविसर्जनंपूजाभागंनजानामित्वंगतिःपरमेश्वरि॥ सत्यंसत्यंपुनःसत्यमुत्क्षिप्य
भुजमुच्यतेकायेनमनसावाचात्वत्तोनान्यागतिर्मम॥ अनन्तश्चारणाभूतानामनन्तत्वमेवसंस्थिता

CC-0. In Public Domain. Digitization by eGangotri

यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलं ॥ आवेदितं नैवेद्यं तन्मे गृहाणानुकम्पया ॥ विधिहीनं क्रिय
हीनं भक्तिहीनं यदर्चितं ॥ यदक्षरं परिभ्रष्टं मात्राहीनं च यद्भवेत् ॥ अन्नकृत्यवधानादि अपराधशता
नि च ॥ क्षन्तुमर्हसि मे देवि त्वमेव शरणं यतः ॥ त्वयि मे हृदयं चानु त्वयि चित्तं मनस्त्वयि ॥ त्वत्पूजायां
महामाये सर्वदेहं त्वया प्रयोजितः ॥ ये पुनर्विघ्नकर्त्तारो नश्यन्तु त्वदाज्ञया ॥ मन्त्रेषु पठितेष्वेवमुक्त्वैवं
देवी प्रसीदति ॥ दातुं देवी चतुर्वर्गमित्येतन्नात्र संशयः ॥ एवं संप्रार्थ्य देवेशि स्तुत्वा नत्वातिभक्तितः
प्रधानदेवतामुक्तोपचारान् समर्पयेत् तस्या एव महेशान्याः शरीरे सर्वदेवताः ॥ विलीनाः सन्तम्
लेन देव्यङ्गे मीलिताः स्मरेत् ॥ कामकलारूपमात्मानं परिचिन्तयेत् ॥ ततस्तां परमेशानीं विसर्जेत्
हृदयाम्बुजे ॥ ज्ञानतोऽज्ञानतो वापि यन्मया क्रियते शिवे ॥ तव कृत्यमिदं सर्वमिति मातः क्षमस्व मे
उक्तास्य परमेशानीं दिव्यर्घ्यात्मनियोजयेत् ॥ अनेनैव तु मन्त्रेण ध्यायन्तां स्थापयेद्धृदि ॥ तिष्ठ देवि
परे स्थाने स्वस्थाने परमेश्वरि ॥ विसृज्यैवं महेशानीं ततः पूरकवायुना ॥ संहारमुद्रयादाय समाघ्रा

यगुरुकृपया ॥ तत्वैतत्त्वं समक्लेन मुलरेव निवेशयेत् ॥ प्राणायामैस्तु सन्तर्प्य यजेन्निर्माल्यधारिणीं नि
र्माल्यं निक्षिपेद्भूमौ नीत्वा तां चित्कलां पुरः ॥ अस्या जगन्मयीं सैव मामेवाशोषिकापरा ॥ ततः परं न हि वा
विहतत्त्वज्ञानादहं प्रभु ॥ महापद्मवनान्तःस्थ स्फुरटोदर संस्थितां ॥ देवीं परां समाज्ञो कथ आत्मान
न्नाविचिन्तयेत् ॥ उन्मन्यन्ते शिवो भूत्वा तिष्ठेदानन्दनिर्भरः ॥ शिवेनैक्यं समासाद्य अनन्यावमनोन
य्यः ॥ निवर्तितसमाधिर्ना गुरवे मूर्द्धवासिने ॥ अललाटं नमस्कुर्यान्निवेद्यार्घ्यं तदाज्ञया ॥ ऐं शास्त्रं म
द्य लंकृत्वा हारपक्वविवर्जितं ॥ शोषिकां सुन्दरीं तत्र निर्माल्येन प्रपूजयेत् ॥ लेह्यचोष्यान्नपानादि ता
म्बूलमनुलेपनं ॥ निर्माल्यं भोजनं तुभ्यं ददामि श्रीशिवाज्ञया ॥ अनेन मनुना देव्या यजेन्निर्माल्य-
धारिणीं ॥ ० ॥ इति गान्धर्वतन्त्रे ऽष्टादशः पटलः ॥ ० ॥ देव्युवाच ॥ कथं सा परमेशानि शोषि
का पूज्यते शिवे ॥ कीदृशी सा महादेवी तदशेषं वद प्रभो ॥ ईश्वर उवाच ॥ शोषिकां सुन्दरीं वक्ष्ये दे
वीं गुह्यतमां प्रिये ॥ उच्छिष्टपुर्विकां देवीं मातङ्गीं सर्वसिद्धिदां ॥ सर्वपत्नारिणीं विद्यां सर्वदोषविवर्जि

गन्ध
८४

तां ॥ यया विज्ञातया देवि क्षयं गच्छन्ति चापदः ॥ स्थावरं जङ्गमं चैव वर्त्तते मन्त्रसंजनया ॥ विशेषयं नाश-
येद्देवि सर्वपापाङ्गसमाश्रितं इयं विद्या महाविद्या सर्व्वपापहारिणी ॥ स्वर्गदा मोक्षदा चैव राज्यसौभाग्यदा
तथा ॥ इयं देवी मया पूर्व्वं साधिता देवि निर्ज्जने ॥ सकृदुच्चरिता विद्या ब्रह्महत्याविनाशिनी ॥ यदुच्छिष्टमुखो
भूत्वा स्मरेद्देवीं कस्य चन नतया चा नो भवेद्दु विविनेवाचमनेन्तु ॥ निर्द्धनो धनमाप्नोति मूर्खो विद्यामवाप्नु-
यात् ॥ मन्त्रं शृणु महादेव्या यथावत्कथयामि ते ॥ उच्छिष्टशब्दमुच्चार्य्य तथा चण्डालिनीति च ॥ सुमुखी-
ति ततो देवि महापिशाचिनीति च ॥ मायाबीजं ततः पश्चात्त्व कार्द्धितयन्ततः ॥ सर्व्विसर्गं महादेवि सर्व्व-
सिद्धिप्रदायकं ॥ अथान्यं सम्प्रवक्ष्यामि मन्त्रं परमदुर्लभं । वाङ्मायाकमलाबीजं नमो भगवतीति च
मातङ्गेश्वरि सर्व्वजनवशङ्करीति च ॥ वह्निजायान्वितो मन्त्रः सर्व्वसिद्धिप्रदायकः ॥ नास्ति दोषोऽत्र देवे-
शि न विघ्नो नियमस्तथा ॥ अङ्गन्यासकरन्यासौ मायाबीजैर्व्वास्य देवता ॥ यस्यास्ति स्मृति मन्त्रोऽयं स भवेत्सु-
रपादपः ॥ ध्यानमस्याः प्रवक्ष्यामि यथा दृष्टिं लेभ्य शि ॥ रत्नोपरि समासीनां रक्ताम्बरपरिष्कृतां ॥ रक्ताल

तंत्र
८४

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्वारभूषाढ्यां गुञ्जाहारविभूषितां ॥ नवयौवनसम्पन्नां पीनोन्नतपयोधरां ॥ कपालकर्तृकाहस्तां परमज्यो-
तिरूपिणीं विधानज्ञां अथ वक्ष्यामि शृणु देवि मनोहरं ॥ भोजनानन्तरं देवि विशेषाचमनेक्षते ॥ बलिं कृ-
त्वा प्रथमतो मूलमन्त्रेण साधकः ॥ ततो मन्त्रं जपेद् ध्यात्वा जपेद् युतमानसः ॥ उच्छिष्टेनैव कर्त्तव्यो जपो ऽस्या
सिद्धिमिच्छता ॥ अपरञ्च प्रवक्ष्यामि शृणु देवि फलप्रदं ॥ होमसन्तर्पणाश्चैव सर्वकार्यार्थसिद्धये ॥ स्थ-
ण्डिले मण्डलं कृत्वा चतुरस्रं सविन्दुकं ॥ पूजयेन्मण्डले देव्या मूलमन्त्रेण साधकः ॥ तत्र देवीं समावा-
ह्य वह्निरूपस्थितां ॥ संपूज्यैव चरेद्धोमं दधिसक्तार्थतण्डुलैः ॥ सहस्रैकविधानेन राजा भवति र-
क्ष्य ग मार्जारस्य तु मांसेन देव्यै होमं समाचरेत् ॥ सप्ताहेनापि गौविद्याशस्त्रशास्त्रवशीकृतौ ॥ कुर्याच्छाग-
स्य मांसेन होमं मधुघृतान्वितं ॥ सहस्रैकप्रमाणेन भवन्ति फलसिद्धयः ॥ विद्याकामश्चरेद्धोमं मधुना
सह सर्पिषा ॥ अयुतैकप्रमाणेन सिद्धिर्भवति ध्रुवम् ॥ सद्यो मार्जारमांसेन घृतेन मधुना सह ॥
चाण्डालकेशपुत्रेण भवेदाकर्षणं महत् ॥ शशकस्य तु मांसेन मधुनालोडितेन च ॥ कृत्वा होमम्भवाञ्छ्रो

निविंयावसुवा स्त्रियः॥ धुलूरकास्थियोगेन चितावह्नौ तु मन्त्रवित्॥ कोकिलाकाकपक्षैश्च होमैः शत्रून् वि
नाशयेत्॥ उच्चाटनाय शत्रूणां होमं कुर्याच्च मन्त्रवित्॥ पूर्वोक्तेन विधानेन चिताकाष्ठहुताशने॥ उलूक
काकपक्षाभ्यां कृत्वा होमं निरन्तरं॥ द्वेषयेद्द्विषमन्योन्यं कलहाकुलसंकुलं॥ उलूकपक्षहोमेन गर्भपातो
भवेत् स्त्रियाः॥ बिल्वपत्रैः समं धत्तूरैर्मासमेकं निरन्तरं॥ सहस्रैकप्रमाणेन कृत्वा होमं समाहितः॥ अपि
वन्ध्या लभेत् पुत्रं चिरजीवनमुत्तमं॥ बन्धूककुसुमं कृत्वा रक्तं मधुसितान्वितं॥ दुर्भगा चैव या नारी सुभ
गा सा न संशयः॥ हस्तदा गतो वा मार्जारविना दालिकृयनितं॥ दृष्यन्देवीं महेशानि वामाचारात्फलप्रदा
दक्षिणाचारयोगेन भवेत् फलदायिनी॥ भोजनानन्तरं स्नात्वा बलिन्दद्याद्दिने दिने॥ उच्छिष्टेन जपेन्म
न्त्रं ज्ञानसंस्थानं रं शिवे॥ उच्चाटे वा श्मशाने वा शून्यागारे चतुष्पथे॥ बलिप्रदानतो देवी प्रत्यक्षा भवति ध्रुवं
अनेनैवाभिसम्पन्ना ओषध्यः सर्वसिद्धिदाः॥ वन्दाकमीलनया वज्रीनिर्मूलसुकुर्यानया॥ देहस्य सम्मे पु
मांसवर्णं यथा विधारिणी॥ गृहीतं पुष्यनक्षत्रे अपामार्गस्य मूलकं॥ तेपमाने गाधीराणां सर्वायुधनि

CC-0. In Public Domain. Digitization by eGangotri

वारणं ॥ अर्जुनस्य च नारजस्य च वस्य कोन्मत्तकस्य तु ॥ लेपमात्रं जयी युद्धे वज्रदेहो भवेन्नरः ॥ खर्जूरीमुखम
ध्यस्थाकपीवन्द्राचकेतकी ॥ भुजं दत्वा स्थितं स्थालं सर्वायुधनिवारणं ॥ दक्षबाहुस्थितश्चार्को वामे
तु हृदये ऽथवा ॥ रुद्रः पुष्यगतो युद्धे वज्रदेहो भवेन्नरः ॥ त्रिलोहवेष्टितं कृत्वा रसं वज्राभसंयुतं ॥ रसास्थ
स्त्वकरस्थश्च सर्वायुधनिवारणं ॥ गिरिकर्णीं शमीं दुर्वायुग्मां श्वेतां समाहरेत् ॥ चन्दनेनान्वितां सर्वास्ति
लकाद्विजयी रणे ॥ अधःपुष्यार्कशिर्षे वि वन्ध्येताश्च गिरिकर्णिका ॥ गोरोचना समायुक्तानि तिलकं शत्रुमोह
ने ॥ कणकार्कौ वह्निहिरिद्रुकूपस्थमन्तथा ॥ करोति तिलकं यस्तु पश्यन्तं पश्य धारिपुः ॥ फणसर्पकराल
न रसंमृत्तिकायान्वितं ॥ सितगुञ्जां वपेत्तत्र तस्यामूलं समाहरेत् ॥ हरितकासमायुक्तं तिलकं शत्रुमो
हने ॥ कृष्णतिलकं मंठदस्था पश्येयत् स्वे स्वा कृत्तारिपुः ॥ स्वगतौ र्भस समेनेस्तु पतत्येव नतो भुवि ॥ छायाम्
स्य जलेयाति संग्राये कास मर्दकं ॥ अनेन तिलकेनारिकूपवायां प्रपश्यति ॥ ब्रह्मदाणी च कौमारी ईश्व
री वैष्णवी तथा ॥ वाराही वज्रिणी चाउीमहालक्ष्मीस्तथैव च ॥ एतास्यो ध्येयादिव्या नाथे तामातरः स्मृताः

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतठारीकरेवक्षासर्वशास्त्रसिवारिणी॥ बहुनातुकिमुक्तेनसंक्षेपात्कथ्यतेऽधुनायद्कर्म्मशालिनीवि
द्याप्रयोगात्सर्वसिद्धिस्या॥ मूलविद्याप्रयोगेनसिद्धिर्हानिर्भवेत्ध्रुवं॥ प्रयोगेच्छायदादेविनैवेना
ष्वप्रयोजयेत्॥ अनयाखिलकर्म्माणिसाधयेत्साधकोत्तमः॥ प्रसङ्गात्कथितंदेविगोपनीयंप्रयत्नतः
॥ ॥इतिगन्धर्वतन्त्रेविंशतितमःपटलः॥ ० ॥ईश्वरउवाच॥ ततोवैमूलमन्त्रेणाम
हेशानिविधियास्मरन्॥ अथास्यचहिनिर्म्माल्यंपादोदकमूस्सं॥ शिरसाधारयेत्यस्तुभूमौवाविन्दु
पातयेत्॥ ब्रह्महासतुविज्ञेयोयज्ञत्याचाम्लमात्रकृतं॥ शिवंगन्धंसमादायशङ्खतोयेविलोकयेत्॥
सव्यहस्तेसमादायदक्षहस्तेनमन्त्रवित्॥ सप्तधामन्त्रितंकृत्वासर्वतीर्थमयंस्मरेत्॥ प्रोक्षयेत्तेनचात्मा
नंमूलदेवीहृदिस्मरन्॥ पादोदकंपिबेद्भक्त्यादेवस्यमूर्द्धनियोजयेत्॥ सर्वाङ्गलेपनंकृत्वायन्त्रलेपादि
कञ्चयत्॥ निर्म्माल्यंतत्कामबीजेनमूलमन्त्रेणचात्मनः॥ अनामिकाग्रपर्वेणालमाट्मपिसंस्पृशेत्॥ नि
र्म्माल्यंशिरसाधार्यंसर्वाङ्गेसनुलेपनं॥ मन्त्रेणमाम्करयार्घ्यमच्छिद्रार्थंनिवेदयेत्॥ ज्ञानुस्कामव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नीं गत्वा पठित्वा मन्त्रमीरितं ॥ एकाग्रमनसा वाग्भिरच्छिद्रमवधारयेत् ॥ यज्ञच्छिद्रं तपश्छिद्रं पूजने
मम ॥ सर्वं नाच्छिद्रमस्तु मार्तण्डस्य प्रसादतः ॥ मार्तण्डभैरवं पश्चात् प्रणम्य च विलोकयेत् ॥ आदर्शेन
च देवस्य नमस्कारं विलोकेत ॥ कुर्याच्च सर्वदा भक्त्या धर्मकामार्थसिद्धये ॥ यज्ञाग्निकारितासा दीप
श्चात् सम्पूर्णता विधेः ॥ विधेश्छिद्रं यो नत्रस्य कृतं हरन्ति राक्षसाः ॥ तमुद्यन्तं विलोक्यैव यजेदत्तमितं त
तः ॥ उभयोरेकतां समत्वात् तमुद्यन्तं पुनस्ततः ॥ सप्तवादीस वान्तस्योसोऽनन्तो ह्यस्पवसः ॥ आयवन्तं वि
दित्वैव सर्वकर्मफलं लभेत् ॥ ततस्तु पुष्पनैवेद्यतोयपात्रादिकं न्यसेत् ॥ मायाबीजेन तत् सर्वं पूजने
व विलोकयेत् ॥ हस्तेन चक्षुषा वापि यत्क्र्यस्य कृतः पुरा ॥ पात्रन्यासस्तस्य तस्य विस्तृष्टिरस्तु नाभवेत् ॥ तो
येरभ्युक्षयेत् तस्यातं मार्जयेत् तदनन्तरम् ॥ उदकेन तु मूलेन वा निर्माल्यस्तत्र सन्त्यजेत् ॥ नैवेद्यादीनि सर्वा
णि गुरवे गुरुशक्तये ॥ समार्प्यपायनं भक्त्या शिवया गुरुरूपिणे ॥ जानुभ्यामवनीं गत्वा प्रणमेत् दण्ड
मेव च ॥ आदाय गुरुणा दत्तं स्त्री कुर्यात्तु विधानतः ॥ तयोरभावतो दद्यात् कुमारीभ्यो यथाविधि ॥ अमृतं

गन्ध ७

भक्षयेद्देवामुक्त्वा देवत्वमालभं । अमृतं तत् विजानीयात्तु न स्पृष्टं देवतस्तु येन तत् ॥ परदैवतनिर्माल्यं विज्ञातं
स्वीकृतं न हि ॥ अनिवेद्य शिवायैव यत् किञ्चित् स्वीकृतं प्रिये ॥ स च पशुर्मृतं भुङ्क्ते लोकद्वयच्युतं प्रिये
पुरा सर्वे मनुष्याद्या भुक्तामृतमियेन तु ॥ देवत्वं नो भवेत् यस्मात् सम्प्राप्तं कश्चित् क्वचित् ॥ दिव्यभावविशुद्धा
त्मा भक्षयेदमृतं यदि ॥ नित्यमभ्यासयोगेन देवगामी भवेन्नरः ॥ अमृतोपस्तरं कृत्वा पिधानमपि
तेनैव वलिशेषं समादाय जुहुयाच्छिवपूर्ववत् ॥ कृत्वामृतं ततो भक्त्या प्राशयेत्क्रमशुद्धितः ॥ भुक्त्वामृत
न्तं सदेवि हस्तं मूर्द्धनि विन्यसेत् ॥ त्रितत्वेन त्रिधा चैव षडङ्गानि प्रविन्यसेत् शिवो दाता च भोक्ता च शि
वः सर्वमिदं जगत् । शिवो जयति सर्वत्र यः शिवः सोऽहमेव च ॥ शाक्तो वलङ्कृता वक्ताः स्वेशाः स्वमनोह
राः ॥ पश्येत्तु देवतारूपानाथ एव देवतायतः ॥ तथैव ब्राह्मणान् पश्येत् भूदेवान् शुद्धमानमान् ॥ भक्त्यान
त्वा प्रमुदितस्ततः स्वानवलोकयेत् ॥ अनेन विधिना देवि सदृज्जपपरमेश्वरीम् ॥ ततः कृपालस्थिरहितः
सहितस्याहमेव वा ॥ भावनायज्ञसम्पन्नो विहरेत्तु तदिच्छया ॥ देव्युवाच ॥ कस्य वा क्रियते पूजा न गृह्य

तंत्र ७

नेति वेदितात्मन्॥ कथन्त्वाज्ञत्ययं चैव मन्त्रस्तूपायं वद प्रभो॥ ॥ ईश्वर उवाच॥ साधु पृष्टं त्वया भद्रे
स्मरणोन्मुक्तिदायकम्॥ ज्ञानरूपं परं ब्रह्म अनुत्तमपदं महत्॥ अनन्तस्थं परं ब्रह्म ज्योतीरूपं सनातनम्
स्वयंप्रकाशनित्यात्मा सर्वपापैर्हन्तु मा शिव॥ अस्पर्शमेदकुज्ञानं त्वकृति दर्शितवर्त्मना॥ वर्णरूपन्तु शा
ब्दस्य तन्मयास्तत्क्रियास्तथा॥ जज्ञात्कृत्वा भवेन्नासिद्धिर्भोगमोक्षमयाप्नुते॥ यावन्मनो लयं याति तस्मि
न्स्वात्मनि चिन्मये॥ तावदिष्टमनुं मन्त्री जपहोमैः समाचरेत्॥ अनन्तरं विष्णुं तु कृत्यमस्ति तदात्मनः
विदित्वा परमं तत्त्वं सर्वमन्त्रैर्नियमैरलम्॥ तालवृन्तेन किं कार्यं लब्धे मलयमारुते॥ अतश्च यत्नभावि फलं
तदज्ञानतत्करोति यः॥ आस्तिकः स तु विज्ञेयः क्रमान्मोक्षप्रतिष्ठितः॥ प्राप्यान्यसेन्तदा तस्मिन् कृत्वा तद्धितं
स्वसेत्॥ उभयात्मकस्तु विन्यस्य समस्त्यासीत्सुनिर्मलः॥ यः श्रेशरीरमात्रे तु विदित्वा कमलेक्षणे कृत्वा वह
मरन्तु यजेज्ज्ञानी समाहितः॥ यद्रूपं परमेशान्याति स्फुलं सकलार्णवा॥ आत्माभेदेन संपूज्य आत्मानं प्रि
यमीश्वरीम्॥ तदा तत्स्वरूपधाम याति पश्चात्तसंज्ञयः॥ रूपं सा पञ्चमी प्रोक्ता परब्रह्मात्मविग्रहा॥ पञ्च

गन्ध
८८

तत्वात्मके देहे प्रत्यक्षी क्रियते हि तेनान्यत्रैव मेवं ह्यक्तो विभाव्यति विचिन्तनम् ॥ अनुमानं समहेशान्यात्मा
त्मन्येव न च क्वचित् ॥ अनुमीयपरस्त्वेवं सर्वमात्मवदाचरेत् ॥ वस्तूनां गन्धमोचाणामैतु प्यदर्शनात्तथा
तुष्यन्ति देवताः श्रेष्ठाः स्तुत्या नम्याचयार्चति भूतप्रेतपिशाचाश्च यक्षराक्षसपन्नगाः ॥ उपभोगेन तुष्य
न्ति मनुष्याश्च जनाव ॥ गुरोः शरीरमास्थाय कुमारीणां विशेषतः ॥ ब्राह्मणानां नाङ्गवास्त्वेव भुञ्जन्ते दे
वताः पराः ॥ तस्मान्नास्तु प्रयत्नेन भोजयेत्तोषयेत् सदा ॥ तुष्टेष्वेषु महादेवि पापरितुष्टा जगन्मयी ॥
ब्राह्मणानां शरीरस्था भुञ्जते पितरस्तथा अनङ्गव्यवधानं स्यादङ्गहीनं तु यद्भवेत् ॥ साङ्गन्तु भवति तत्स
र्वं मिष्टान्नैर्विप्रभोजनात् ॥ ॥ इति गन्धर्वतन्त्रे एकविंशतितमः पटलः ॥ ० ॥ श्रीईश्व
र उवाच ॥ हृदिस्थं परमात्मानं विहाय त्यागसमीहते ॥ अहो मूढा वराकोहेव बहिर्यत्नम्प्रयत्नतस्त्ववत् ॥ वि
ज्ञाय हृदयानन्दं परं यत् कृतिगोचरमतस्मिन्स्थ कर्माणि नैव समात्मन्येव प्रतीयते ॥ तत्प्रतीतो भवेत्सिद्धो
नान्यथा खलु पार्वति ॥ अहं विष्णुः स्वयं ब्रह्मा स्वायम्भुवः स्वयं मेव यम ॥ तदन्तु सुयदेहस्मिन्नत्र देव समुपास्य

तंत्र
८८

हे ॥ तदनः स्थं समाहूय तं देवं तु यजामहे ॥ उक्तस्थपनयात्मानं स्थापयित्वा निजे हृदि ॥ निवेदितन्तु तान्
प्रीत्येन स्मिन्नेव निवेदयेत् ॥ विनास्तु तेन चान्यत्तु कांक्षन्ते देवतागणाः ॥ असन्तो नैवनन्तस्मा अमृतन्तु नि
वेदयेत् ॥ अमृतन्त्वं लभेदोषः स्वीकृत्यात्म निवेदितम् ॥ इति निकथितं त्वे विशेषिकामनुत्तमम् ॥ स्थू
लसूक्ष्मविभेदेन ज्ञायते कृपया गुरोः ॥ नित्यं नैमित्तिकं कर्म्म इति ते स्यात् पृथक्पृथक् ॥ त्रिविधं त्रैपुर
कर्म्म च समतत्तत् समाचरेत् ॥ यदुक्तं तामसं त्यक्त्वा तत् सर्वं यत्नतश्चरेत् ॥ देवन्ति च मतो नित्यं यात
कं यत् विधानतः ॥ मासिकं तिथिकृत्यञ्च वार्षिकं फलदायकम् ॥ लङ्घनान्नित्यं यस्य नित्यश्च विधान
तः ॥ नैमित्तिकं तज्ज्ञानीयाद् कृत्या ततसमाचरेत् ॥ फलमात्रश्रुतिर्यस्य श्रुतिस्मृतिप्रचोदितम् ॥ काम्य
न्तु विजानीयात् पूजितन्त्रगोचरे ॥ विदध्यान्तत्प्रयत्नेन यत् पुनर्लोकपूजितम् ॥ धर्म्ममपि त्यजेत् त
साधुर्यत्पुनर्लोकगर्हितम् ॥ नित्यं सात्त्विकमेवात्र नैमित्तिकन्तु राजसं ॥ तामसं काम्यमेवात्र कुर्यात्
फलवित्तस्पृहया ॥ तस्मात्ताद्भूरतस्त्यक्त्वा मनः पूर्णां विचिन्तयेत् ॥ पूर्णो मनसि तस्मिंश्च पूर्णं सर्वमिदं जगत्

CC-0. In Public Domain. Digitization by eGangotri

उपानत्कगटपादस्य नत्तु चर्म्मोन्नतं वपुः फलविर्हितं ॥ काम्यं नित्यं नैमित्तिकं तथा ॥ क्रियते त्रिपुरायै
नैवेद्यं त्वातस्मै निवेदनं ॥ सात्त्विकत्त्वं द्विजाङ्गीयाज्ञोरामोक्षफलप्रदं ॥ यस्य यद्विहितं कर्म्म त्रिविधं तत्र
गोचरे ॥ श्रुतिस्मृत्युदितं स्वापि मनसापि न हारयेत् ॥ कर्म्मस्त्रिविधलोपादेर्योयो नो ज्ञायते साधकाधमः
शिव शक्तिमयं विश्वं विद्धि त्वासत् गुरोः प्रिये ॥ स्थूलसूक्ष्मविभेदेनापि तस्मात्स्वरूपतः ॥ कर्म्मभिस्तो
षयेत्तौ तु तज्ज्ञस्वमार्गिनः सदा ॥ उभयात्मा भवेत्सिद्धेनेकात्मा ज्ञानवर्ज्जितः ॥ ज्ञानचक्षुस्तयोरैक्यं विदि
त्वाभी गुरोः क्रमात् ॥ अनुभूय तदानन्दं तदात्मातत्र संविशेत् ॥ मातुः पितुर्यथा बालो व्युत्पत्तिं लभते क्र
मात् ॥ तयोः समत्वसम्बन्धात् तुल्यत्तो ज्ञानमालभेत् ॥ देवताः शक्तिरित्याहुः पितरः शिवरूपव ॥ एतावुभौ
तोस्तु सर्वान् सुहृदः पूर्णसंस्थितान् ॥ वलिभिस्तर्पयेत्तांस्तु सुहृद्भिः स्वहृतोऽन्यथा ॥ तेषां वलिं पुरस्कृत्य तावुभौ
परितोषयेत् ॥ पश्चात्ततो न्यानिवेद्यैव सुहृद्भिर्विहरेन्मुदा ॥ स्वाहाभ्येन वदेद्देवेभ्यो मनुं पित्र्येभ्योऽप्य एवच ॥ स्व
धान्तेन पितृभ्यस्तु तेषां तु स्यन्नगोत्रतु ॥ सिद्धाज्ञाः पितरो यस्य -- पार्वति ॥ सुहृदो ज्ञानवस्त्वापि वाडूमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

येरागापि नार्ज्जिताः॥ सुहृद्येवार्म्मरताद नित्तज्ञातयः कर्म्मसञ्चितं॥ स्नेहिं स्वपिता हन्ति स्वमाता पारलौकिकं
लोकद्वयविहीनस्तु नैव सिद्धिं प्रयच्छति॥ अयस्तु पितरं यज्ञे यजेन्मानरमन्त्रिणां॥ विधिज्ञानेरपि य
ज्ञात्वं तत्तु गुरुहूतिज्ञाच्छती॥ आपद्यवनेपि तु तस्मात् कुर्यान्नर्पणमादरात्॥ अदत्तं नोपतिष्ठेत दद्यात्त
स्मात्ततः परं॥ गोभूहिरण्यवस्त्रादि भक्ष्यभोज्यानि यानि च॥ वासिनीभ्यो द्विजेभ्यश्च दीनान्धकृपणाय च
त्यस्माआवश्यकं कर्म्म लौकिकं भावतत्परः॥ योगक्षेमो हि तेयत्नं कुर्यात्तदनुशासनात्॥ समर्थं जीवये
त्स्नेहात् स्वकीयाननुजीविनः॥ दुष्टेभ्यो दुष्टचित्तेभ्यो हिंस्रेभ्यः साहसिकात्तथा॥ बलिभ्यो धनमत्तेभ्यः
कायस्थेभ्यो विशेषतः॥ रक्षयेत् पालयेत् साधुः पुत्रानिव निजोरसान्॥ लोकांश्च त्रिविधान् मत्वा लाल
येत् पालयेत् सदा॥ वध्यानवध्यांस्तथा दण्ड्यान् दण्डयेत् शास्त्रदर्शनात्॥ अवध्यस्य वधे यावान् दण्ड
स्तस्य तु दण्डने॥ दण्ड्यस्यादण्डने पापं तावान् वध्यस्य रक्षणे॥ इति विज्ञाय योगात्मा योगक्षेमं समाचरे
त्॥ विभूतीरात्मनः पश्येत्तत्प्रीत्यानन्निवेदयेत्॥ विभूतीरात्मनो यस्तु महादेवे प्रदर्शयेत्॥ ताभिरेव

गम्य
९०

युतो भूयादणिमादिविभूतिभिः॥ मुहूर्त्तत्रयमात्रन्तु कुर्य्यात्तत्तु विचिन्तयेत्॥ चिन्तयेत् परमं ब्रह्म म
ध्याह्ने समुपागते॥ मुहूर्त्तत्रयमात्रन्तु निद्रया समुपासयेत्॥ ततो बुद्ध्वा यथा कालेनामेव समुपासये
त्॥ ललितानि च नृत्यानि गीतानि सद्वराणि च॥ दर्शयेच्चावयेद्दैव्यभावात्मा तत्त्विलोकयेत्॥ नृत्य
प्रगीतनियता देव्यस्त्रक्चन्दनार्च्चिताः॥ भूषिताश्चारुभूयाभिर्दिव्यवस्त्रादिभिरेव च॥ ततो मध्ये स्वयं देवः
कामेश्वर इवापरः॥ कामेश्वरीभिर्युक्तो भूत्वा यजेत्कामेश्वरीं ततः॥ ब्रह्मचिन्तापरो मोदमुदितो राज्य
चिन्तकः॥ मुहूर्त्तत्रयमात्रन्तु निद्रया समुपासयेत्॥ दिवाद्यात् पितृभ्यस्तु मातृभ्यो निशि तत्परः॥ मा
ता रात्रिः समाख्याता पिता दिवस एव च॥ उभयोरेकतां मत्वा सिद्धो भवति नान्यथा॥ सोमः शक्तिः शिवः
सूर्य्यो निशा शक्तिर्दिवा शिवः॥ यदा स भगवान् देवो महात्रिपुरभैरवः॥ परापरापरोऽनन्तः परमानन्द
निर्भरः॥ परापररहस्याध्यायो गिनीकुलसम्भवा॥ शिवानन्दानन्दमयीं सह त्रिपुरसुन्दरीं आरूह्योर्द्ध्वय
दाति स्वेन देहः परिकीर्त्तिते॥ शक्तिभैरवसंयोगादानन्दानन्दनिर्भयात्॥ भैरवानन्दनस्थानलीलासायर

तंत्र
९०

माकला ॥ सध्याह्ने तु द्विजातीन्यान्मुहूर्तत्रयलक्षितं ॥ तौ तदा समभागेन तिष्ठेतां शशिभैरवौ ॥ पूर्वीप
रोत्तदाशयो रक्तद्विगुणालक्षितौ ॥ परस्परात्कृतेन स्नेहो ग्राह्याः हैतौ तु मध्यतः ॥ अभिजिन्नाम जानीया
त्तत्कालं सुखदान्वितं ॥ ततोन्नतो भिदा कीर्णा तयोरैक्यं भवेत्तदा ॥ सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुत
प्रभं ॥ तदा दृश्या मुनेर्देव पञ्चवक्त्रस्त्रिलोचनः ॥ शुक्लाम्बरधरः शुक्लः शुक्लमाल्यानुलेपनः ॥ तस्मात्सङ्क्रम
सादेवी चन्द्रकोटिसुतप्रभा ॥ प्रहसन्ती विशालाक्षी परमानन्दनन्दिता ॥ तत्कृपा तामसी प्रसन्ना तत्कृपे
क्षणालालसा ॥ शुक्लवेशं विनायेविनान्यं तत्प्रीतये तदा ॥ तच्चातत्कृपमापन्नं साधकोदेवचोदिते
कुङ्कुम भगवती तस्य शायन्त्यात्सुदारुणं ॥ सर्वैः शुक्लमयैर्द्रव्यैः शुक्लवेशो यजेत्तदा ॥ दिवि---
दृश्याः शरच्चन्द्रनिभोपमाः ॥ तत्र पूजा सदा कार्या विशेषेण तवाननेन ॥ पेयं चोष्यं तथा लेह्यं चर्व्य
भक्ष्यं च तत्परौ ॥ निवेदयेत् सदा भक्त्या यत्पुनः सुमनोहरं ॥ उपचारैर्यजेत्प्रातर्मध्ये रसान्नपान
कैर्गीतनृत्यादिना सायं तत्र ध्येयाजपुरःसरं ॥ प्राङ्मुखो हि यजेत्प्रातर्मध्याह्ने दक्षिणामुखः सायं

गस्व
९१

प्रायस्तुतोभूत्वाराज्ञावुध्दुस्तुतःसदा ॥ तत्रज्ञानवभेदेनजपेद्विद्यामनन्यधीः ॥ वर्जयेद्युक्तिभेद
स्तुयदिच्छेत्पामनोगतं ॥ अरुणाकिरणाच्छन्नयत्पूर्वंभैरवोदयात् ॥ अर्द्धनारीश्वरंज्ञेयंतत्रपूजाश्र
यःसमाः ॥ उपचारैस्तदाकार्य्यासपर्य्याविधिनातथा ॥ वरिवस्यांगृहोसमभागेनसंस्थितोयदि ॥
आनन्दयारसिच्छैस्तैःसमानन्दविवर्द्धनो ॥ पूर्वापरोभस्तयुतैःपद्यदानैःसमरूपिताः ॥ चिन्तयेत्
स्ततंभक्त्यातेनतत्कालविधानतः ॥ शक्तिज्ञानवभेदेनजपेद्विद्यामनन्यधीः ॥ शुक्लाम्बरोभवेत्त
च्छुक्लमाल्यानुलेपने ॥ रक्ताम्बरधरांचइत्येवमाल्यानुलेपनाः ॥ दिशश्चविदिशश्चैवरक्तावृश्यामनी
धिभिः ॥ लाक्षारसमयंविश्वंस्वयञ्चतत्रतद्भवेत् ॥ पद्मरागप्रतीकाशोसुरालजसमन्वितः ॥ नाथः
कामेश्वरस्तत्रस्येकवलश्चतुर्भुज ॥ रक्तपद्मनिभांदेवींबालार्ककिरणारुणां ॥ इच्छनृत्तद्रूपतांप्राप्तुं
तद्रूपांस्तांविशन्यतेः ॥ अनुभूयतदावस्थांभैरवानन्दसंकुलं ॥ विपरीतमतीष्यन्तीतदाक्रमणालो
लसा ॥ तदासवोभवेत्कालःसायंसन्ध्यानिशीयते ॥ शोणितश्चसमाक्रान्तांप्रतीचीमवलोकयत् ॥ पूज

तंत्र
९१

येनसाधकोऽमतापउपचारैर्यथाविधि ॥ यदासापरमेशानिःस्वेच्छयाविश्वरूपिणी ॥ अधःकृत्वातुपुरु
षंवर्णामिच्छामवेत्यदा ॥ तदाकामयस्त्वयंदेवीभैरवोपरिसंस्थिता ॥ सहजानन्दसन्दोहैर्निजानन्द
प्रवर्द्धिनी ॥ तदानैजंभवेत्क्षिप्रंतत्रपूजामहोदया ॥ तत्रहृष्ट्वामहेशानिभोगैश्चविविधैःसदा ॥ लाक्षा
रुणामयंसर्वंस्वयन्तावत्तथाभवेत् ॥ शक्तिभेदात्मिकांविद्यांहंसबीजपुटीकृतां ॥ प्रणवान्तरितांशुद्धां
नादलीलात्मिकां ॥ मूलादिब्रह्मरन्ध्रान्तांविषतन्तुतनीयसीं ॥ अष्टराशुवहांहंसांसुस्थिराग्निलव
ज्वलां ॥ संश्रवन्तींसुधाधारांशुक्लाकारांसोपमां ॥ आयास्यपूजयित्वास्वकमलाङ्कपुरान्तरे ॥ विनि
र्जितेन्द्रियमनोजपेदानन्दरूपिणीं ॥ मध्यंसुखंविजानीयात्पूर्वापरौस्तनद्वयो ॥ अर्द्धमात्रापरंरूप
नित्रामध्यंतयोरधः ॥ अनन्तफलदंपुण्यंभोगमोक्षफलप्रदं ॥ सन्ध्याचतुष्टयंभक्त्याकथितंभुविदु
र्लभं ॥ चतुर्भुजंमहादेव्याज्ञेयंकालचतुष्टयं ॥ आत्मासापरमेशानिपरमेश्वररूपकं ॥ यदङ्गंतुविहि
यतेतदङ्गेकुरुतन्तयोः ॥ तत्रयत्क्रियतेकर्मसर्वमङ्गंस्यमङ्गलंपरं ॥ ध्यानंपूजाजपश्चैवहोमान्यासञ्च

गन्ध तर्पणं ॥ अत्रैव पूजिता देवी पूजयेत्तत्त्वमनोरथान् ॥ अत्र यत् पुण्यमनघं भक्तिश्रद्धासमन्विते ॥ विधिना
९२ विहिते यज्ञे परमानन्दसङ्कुले ॥ वर्णकोटिसहस्रैस्तु स्तवनं तद्वक्तुमक्षमः ॥ अमृतास्नानमप्यत्र सुधा
सागरतुलनं ॥ अत्र योनार्घ्ये ये द्वेवीं जलेनापीह पार्वति ॥ स्नानमेष्ठा सुरूत् भक्त्या ब्रह्महा स निरायते ॥ अ
त्र निशापतायान्ति महाकालपुरं प्रिये ॥ दत्तं मोहं तथाभिज्ञामात्स्यं वाच्य चिन्तनं ॥ कामं क्रोधं तथा लो
भं हिंसां मानस्पर्धामेव च ॥ वर्जयित्वा प्रयत्नेन विद्यामेव समभ्यसेत् ॥ दूर्वासनं परित्यज्य कोटिजन्म
समुद्भवा ॥ एकेन जन्मना मुक्तिं यान्ति भोगी न संशयः ॥ ज्ञानेर्मुरुं विना नान्यं पश्यन्ति कर्हिचित्तदा ॥ प
शवो दूरतकाज्ञाः पुरुषस्यान्यपूजकाः ॥ अत्रान्यचिन्तनात् यान्ति गेहे योनिं पतन्त्यधः ॥ यान्ति चोर्द्ध तंत्र
परं धाम चिन्तनात् ब्रह्मशाश्वतं नास्ति पुरस्त्रियाते षां वायस्ते शापुरःसरा ॥ नित्यपुरस्कृत्या पुमांस्तए ९२
वं परिकीर्तिताः ॥ तन्तु देवानमस्यामि किंपुनर्नवमर्दका ॥ देवीकलाभवेत्तत्र सर्वलोकवशङ्करी ॥ अम
त्या अर्पितमत्यमीह नो कुलवत्सभं ॥ तं दृष्ट्वा पुरुषतराः सर्वांक्रियान्मान्यामुदान्विता ॥ शारदिन्दुप्रमन्दे

वर्षाणां तु प्रतिमानतं ॥ नानावेदध्वनिश्चातुर्यैः स्निग्धपीयूषभाषिणां ॥ अपि चेन्नात् समभ्नारीनतत्स
म पुरुषोऽभिषेचेत् ॥ नरेन्द्रं नरशार्दूलं दृष्ट्वा तु भ्रमनाभवेत् ॥ पूर्वैर्यद्दीयते वस्तु परे तस्माच्चतुर्गुणां ॥
नानाविधोपहाराणां महद्द्रव्यैर्निवेदयेत् ॥ राजोपचारैर्दत्त्वान्ते स्तुत्वा नत्वा विसर्जयेत् ॥ कालत्रयेण
ज्ञातिभिश्चैव तु तुर्थे सर्वथा प्रिये ॥ अनश्नन् पूजयेज्ञानीं भयविजपरायणः ॥ प्रातर्हर्षं प्रकुर्वीत तथा
मध्यन्दिनेऽथवा ॥ निद्राकालं प्रवक्ष्यामि साधकानां हिताय च ॥ दिवा निद्रा र्महादेवि नव मुहूर्त-
स्ततः परं ॥ मुहूर्त्तत्रयमात्रं तु निद्रादेव्या समीरिता ॥ अत्र निद्रापरा देवी निद्रया समुपासयेत् ॥ नि
द्राकाले जपेत् यस्तु पूजयेद्वापि मोहितः ॥ स्वापकालं विना देवि स्वपेयन्यत्र यो बुधः ॥ चत्वारि तस्य नश्यं
ति आयुर्विद्या यशो बलं ॥ तस्मात् सर्वप्रयत्नेन बोधकाले प्रबोधयेत् ॥ दर्शनं चाप्यलोकं च संभाषं चा
प्यलोकनं ॥ स्वयमावेशनं चैव मन्त्राणां पञ्चलक्षणं ॥ विदित्वा प्रजपेन्मन्त्रं सर्वसिद्धिमुपालभेत् ॥ वे
दसन्ध्यां त्रिसन्ध्यां वाथ जपेत् यस्तु ब्रह्मचर्यव्रतैः हि सन्ध्यां वाथ कुर्वते ॥ योगात्मा योगविज्ज्ञानी योग

गन्ध
९३

सुभासमन्वितः॥ अर्द्धमेकं जपेत् यस्तु ब्रह्मचर्यव्रते स्थितः सहस्रं प्रजपेद्यावन्ते चापि सहस्र
कं॥ सन्ध्ययोः प्रजपेन्नित्यांशो पंच्यकुञ्जमभाराततः॥ लक्षमेकं मंत्रेद्दिव्विविज्ञादमध्यन्तरे तथा॥ असत्क्रां
कुञ्चितकार्यं न कृतं न विलम्बितं॥ अक्षयाक्षरसञ्चारिध्वनिमात्रं विभावयेत्॥ सयाप्येतत्कृतेस्थेन
जप्यतेऽद्यापि सुन्दरि॥ त्रिसन्ध्यं जप्यते यस्तु तत्पदप्राप्तिसिद्धये॥ एवं क्रमाद्भवेत् सिद्धो भोगी
भोगपरायणः॥ एवं मासमत्तुश्चैवं वत्सरयुगमेव च॥ रामयेन परमेश्वानित्य क्रमतन्त्रकरादिकं
एतद्रहस्यं परमं न प्रकाश्यं कदाचन॥ ममयाचारसंहितः भोगमोक्षफलप्रदं॥ ० ॥ इ
ति गन्धर्वतन्त्रे त्रयोविंशतितमः पटलः॥ ॥ ईश्वर उवाच॥ होमादिकन्तु विफलं कुमारीपू
जनं विना॥ कुमारीपूजिता येन त्रैलोक्यं तेन पूजितं॥ ब्रह्मा विष्णुश्च रुद्रश्च यो वासवो तथा॥ पितरश्चै
व दिक्पाला गन्धर्वाप्सरसोऽसुराः॥ देवपत्न्यस्तथा नागा मातरः सिद्धचारणाः॥ विश्वेदेवाः सपक्षा
श्च राक्षसाश्चैव देवताः॥ स्थावरजङ्गमाश्चैव सर्वभूतानि जन्तवः॥ सर्वे ते तृप्तिमायान्ति कुमार्या यत्र पू

तंत्र
९३

CC-0. In Public Domain. Digitization by eGangotri

जिता:॥ बहीनामप्यलाभे तु एकैकं वरवर्णिनी ॥ प्रमदा यौवनोन्मत्ता सा भवेत् सुन्दरी परा ॥ अष्टाब्द
वधिपञ्चाब्दा पूजितव्या विधानत:॥ कुमार्य्यै यन्नलं दत्तं तत्फलं मारगोपमं ॥ यद्दत्तं दीयते तस्यै तत्कुला
चलसमं प्रिये कुमारी पूजनन्देवि कुमारी मनुना भवेत् ॥ यथा या पूज्यते देवी पूजितव्या तथा तथा ॥ हे
तुना भोजितव्या स्ता: पायसैर्मधुरान्वितै:॥ बाल: श्रीश्च नैवेद्य: त्रिपुरसुन्दरीधिया ॥ स्तुम्या नत्वाथ
सन्तोष्य असीस्तं प्रार्थयेत्तत: ॥ पूजिताया च तुष्टाया स्त्वाज्ञामि युतो नर: ॥ शिरसा प्रतिगृह्णीयादाशी
र्वादयुताक्षताम् ॥ यत्र हृष्यति सन्तुष्टा तत्र वर्द्धते निश्चयं ॥ इति नेक घितं देवि रहस्यं परमाद्भु
तं ॥ विना नेन महेशानि न पूजाफलभाग्भवेत् ॥ नित्यार्च्चायां च दीक्षायां पुरश्चर्य्यादिकेषु च ॥ आसे
पूर्णे वमध्ये चलक्षेपूर्णे विशेषत: ॥ कुमार्य्य: पूजितव्याश्च कुमारीं नार्चयेत्तु यदि ॥ तस्य पूजाफलं
सर्वं नीयते यक्षराक्षसै: ॥ न पूजयन्ति चेत् कान्तां तदापि प्रेप्रभूयते पूर्वार्जितफलं नश्येत् का कथा
परजन्मनि ॥ तस्मात्सर्वप्रयत्नेन यदीच्छेदात्मनो हितं ॥ पूजितव्या महाभागा: कुमार्य्य: परमेश्वरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रातरुत्थाय पूजायां स्नानकालेऽथवा पुनः ॥ सत्कृतास्सम्यक्तेनापि हीनजात्युद्भवास्तथा ॥ नमस्या
साधकेन्द्राणां कुलीनानां परार्च्चने ॥ ब्रह्मार्पितचित्तानां नान्यारीह्भिन्नता क्वचित् ॥ कुलपूजां विना
देवि कुलदेवी परान्मुखी परे या मायया भ्रंशेत्स्वयन्तासां गुरुर्भवेत् ॥ ब्राह्मणी क्षत्रिया वैश्या शूद्रा कु
लभूषणा ॥ वेश्या नापितकन्या च रजकी योगिनी तथा ॥ नानावेदग्धिकुशलाः कलारूपगुणान्विता
तासां रूपञ्च भावञ्च विलोक्यामर्च्चयेत्सुतम् ॥ ब्राह्मण्याद्यस्पृश्यान्तानां नामभिः कृतशुद्धिता ॥ आसनं
प्रथमन्यास्यःस्वागतञ्च पुनः पुनः ॥ अर्घ्यं पाद्यञ्च पानीयं मधुपर्काचमनीयकम् ॥ स्नापयेद्गन्धपुष्पा
द्भिकेशसंस्कारमेव च ॥ धूपयित्वा ततः केशान्कौशेयञ्च निवेदयेत् ॥ ततः स्थानान्तरे नीत्वा पीठमास्ती
र्यं मन्त्रितः ॥ सन्वेशायै विधानेन पूर्वादिक्रमयोगतः ॥ नानालङ्कारभूषाद्यैर्भूषयित्वानुलेपनैः ॥ ग
न्धपुष्पं तथा धूपं दीपं नैवेद्यमेव च ॥ दुग्धं दधि घृतं तक्रं नवनीतं सशर्करम् ॥ नारिकेलं कपित्थञ्च ना
रङ्गकमुत्तमम् ॥ पिष्टकं पायसञ्चैव नानारससमन्वितम् ॥ दत्वा सम्पूज्य विधिवत्स्तुतिभिस्तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पयेन्नतः ॥ मातङ्गेशि नमस्तुभ्यं ब्रह्मरूपधरे नघे ॥ कृपयाहर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे ॥ माहेश्व
वरदे देवि परमानन्दरूपिणि ॥ कृपयाहर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे ॥ कौमारि सर्वविघ्नेशि कुमा
रक्रीडने परे ॥ कृपयेत्यादि ॥ वैष्णवी विष्णुरूपासि सर्वविघ्नविनाशिनि ॥ कृपयेत्यादि ॥ वाराहि वर
दे देवि परमानन्दरूपिणि ॥ कृपयेत्यादि ॥ इन्द्राणि वरदे देवि गजस्कन्धस्थिताय ह्यसि ॥ चामुण्डे मु
ण्डमालास्रक्चर्चितभयनाशिनि ॥ कृपयाहर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे ॥ महालक्ष्मि महामो
क्षे भक्तसन्तापहारिणि ॥ कृपयेत्यादि ॥ इति मातृमरे देवि सन्ति मातृवहिस्तुते ॥ एकैकं तु तरे देवि वि
श्वरूपेण मे स्तुते एतत्स्तोत्रं पठेत् यस्तु कर्म्मारम्भेषु संयतः ॥ दग्धाश्च समालोक्य तस्य विघ्नं न जाय
ते ॥ आचम्य मुखवासेन ताम्बूलञ्च निवेदयेत् ॥ ततो दद्यात् पुनर्म्माल्यं गन्धचन्दनपङ्किलम् ॥ यदि
क्रीडापरास्तास्तु भवन्ति भाग्ययोगतः ॥ क्रीडायन्त्रक्रीडने सर्वाः क्रीडारसपरायणाः ॥ तस्मात् सर्वप्र
यत्नेन रक्षितव्याः सदाप्रिये ॥ यथा तु नमिताः प्राज्ञैर्भक्तिभावपरायणैः ॥ स्वेच्छया मूर्त्तिमतीया स्यान्तरा

गन्ध
९५

हीत्वारत्नोत्सुसमम्॥ गोचनाचन्दकाश्मीरकस्तूर्यगुरुसंयुतम्॥ स्वयम्भूकुसुमं दिव्यं फलं वापि
व्येभक्त॥ गृहीत्वा पूजयेद्देवीं महात्रिपुरसुन्दरीं॥ कुण्डगोलोद्भवो वापि नाम्यत्र कुसुमं भवेत्॥ मद्यं
मांसं समुद्भवाभिः स्वयम्भुकुसुमं तथा॥ एविवमहेशानि प्रत्यक्षीक्रियते परा॥ द्रव्यसंशोधनं कृ·
त्वा शक्तिशोधनसन्तवे॥ सम्पूज्य त्रिपुरां देवीमसाध्यमपि साधयेत्॥ अन्यायदिनगच्छन्ति नि
जकन्यात्मजात्मनः॥ अग्रजा मातुलानी तु मातावातं सपत्निका॥ वयसा जातितो वापि हीन रज्जु
श्वसा यथा॥ पूज्याः कुलवरैः सर्वैर्निजाऽस्कारवर्जितैः॥ स्वयमक्षोभितो भूत्वा मूलयोगं न चाचरेत्
मूलयोगकृतास्मात्सुः सिद्धोऽपि नश्यति ध्रुवम्॥ सर्वाभावे एकतरा पूजनीया प्रयत्नतः॥ संरक्षतोभा
पि वन्धकी वाथ निस्पती॥ पूर्वाभावे पराः पूज्यानं देशाद्यो विवेतो यतः॥ एका चेन कुलेशान सज्जालभ्यते
कुलवित्तमैः॥ पूजार्हा सा न तारा देवि भोगमोक्षप्रसाधिका॥ एका च युवती यत्र पूजिता चावलोकिता॥ त
दा देव्यश्च सर्वाश्च पूजितं सर्वदेवतम्॥ इति ते कथितं देवि नप्रकाश्यं कदाचन॥ ० ॥ इति

तंत्र
९५

CC-0. In Public Domain. Digitization by eGangotri

गन्धर्वतन्त्रे त्रयोविंशतितमः पटलः ॥ ० ॥ श्रीईश्वर उवाच ॥ ॥ एवं यः कुरुते पू
जां नित्यं भक्तियुक्तो बुधः ॥ कन्दर्पसदृशः स्त्रीणां गौरीपतिरिवापरः ॥ स एव सुकृती लोके स एव कु
लभूषणः ॥ धन्या च जननी तस्य धन्यस्तस्य पिता खलु ॥ देवीकलाभवेत्तत्र समतुल्यो महामतिः
अणिमाद्यष्टसिद्धीशो जायते नात्र संशयः ॥ वह्निरिव रिपोर्हन्ता स्फुरिश्व वसुखप्रदः ॥ पितृदेवस
मः शास्ता गुर्वेस्तुचिसमः खलु ॥ बृहस्पतिसमो वक्ता धरणीसदृशः क्षमी ॥ वक्तो सरस्वती तस्य ल
क्ष्मीस्तस्य सदा गृहे नार्यो नित्तस्य देहे वै न च तस्य पुनर्भवः ॥ धनेन धननाथः स्यात्तेजसा भास्करोप
मः ॥ बलेन पवनेस्य यदानेन वालवोपमः ॥ गानेन तुम्बुरुः साक्षान्नित्यपरो न समर्च्चिता ॥ एकाहंस्य
दिदेवेशि महात्रिपुरसुन्दरी ॥ न पूजयेत्तया तस्यात् प्रायश्चित्तं समाचरेत् ॥ उपोष्यैव च अधिवासं कृ
त्वा पूजां परेऽहनि ॥ गुरुं संपूज्य विधिवत्तदा पूजां समापयेत् ॥ कुमार्यै भोजनं दत्वा विप्रान पिव
भोजयेत् ॥ अत ऊर्द्ध्वं पुनर्द्दीक्षां लक्षजपं समाचरेत् ॥ महात्रिपुरसुन्दर्य्या योगिनीनां तथैव च ॥ घार्ं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वाथ अहं वापि यज्ञाचरूत्वं करोति यः ॥ सिद्धिहानिर्भवेत्तस्य योगिनीशापमालभेत् ॥ चत्वारितस्य
नश्यन्ति आयुर्विद्यायशोबलं ॥ तस्य मांसं च त्रयं शुक्रं स्वरूपं शोणितमेव च ॥ अभीष्टानपि कामांश्च
हिंसन्ति योगिनीगणाः ॥ वज्रभूमिः स्थले घोरे फलैश्च [illegible] विशेषतः ॥ शास्त्रमूत्या भवेदुर्वा विघ्नस्त
स्य पदे पदे ॥ सत्यं सत्यं भवेद्रोगी दरिद्रश्चोपजायते ॥ दुःखेन दुःखमाप्नोति त्रिविधं लोमहर्षणं ॥ प
रेत्स्वर्गात् परिभ्रष्टः क्षितौ क्षितिपनायकः ॥ अतुलां भक्तिमासाद्य केवलं तन्मतेन तः ॥ ब्रह्मचिन्ताप
रो नायसो पलाय चेद्वतं ॥ विनाल्पया पवर्तेत ब्रह्मघाती स एव तु ॥ जपध्यानपरो मन्त्री योगक्षेप
रायणः ॥ स्वयं यदि भवेन्मूढो गुरुस्तत्र नियोजयेत् ॥ ज्ञानकर्मपरः शुद्धः सर्वदेवमयः प्रभुः ॥ सि
द्धयः सकलास्तस्य गुरुरूपस्य हि निरन्तः ॥ मासेनोवर्षे वापि स्वयं पुरायाहयोगतः ॥ कुर्याद्धैस महीपू
जां सम्पन्नाङ्गविभूषितां ॥ उपचारैर्बहुविधैरलङ्कृतसुविग्रहां ॥ नित्यमेवार्चनं देव्या नित्यमेव समा
चरेत् ॥ नित्याचारपरो मन्त्री नैमित्तिकविधिं चरेत् ॥ नित्यनैमित्तिरूपरः साधुः काम्यविधिं नयेत् ॥ का

CC-0. In Public Domain. Digitization by eGangotri

स्यान्नैमित्तिकं नित्यं नित्यं नैमित्तिकात्परं ॥ नित्याचारविलोपी यः काम्यं नैमित्तिकं मेव वा करोति स च
दुर्मेधा नाप्नोति तस्य तत् फलं ॥ नित्याचारमनादृत्य यदन्यत्तु समीहते ॥ निस्फलन्तस्य तत्कर्म्म व
न्ध्यास्त्रीमिथुनं यथा ॥ अपि पुष्पफलैर्व्वापि पूजयेच्च क्रमं विना ॥ अङ्गहीनन्तु पुरुषो न सम्यग्याज्ञि
को भवेत् ॥ अङ्गहीना तथा पूजा न सम्यक्फलदायिनी ॥ ध्यानं पूजा जपो होम इति हस्तचतुष्टयं ॥
शरीरं न्याससंज्ञानन्तु आत्मा तत्ज्ञानमेव च ॥ भक्तिः शिरोऽथ हृत्पद्मं कोशलं नेत्रमीरितं ॥ एवं यज्ञश
रीरन्तु मत्वा साधकसत्तमः ॥ यज्ञं समर्पयेन्नित्यं साङ्गं नैव खलु प्रिये ॥ अङ्गहीनं महादोषस्ततोऽ
ङ्गं नावधारयेत् ॥ सर्वाङ्गपूर्णापुरुषो यथा स्यात् सर्वसिद्धिदः ॥ तत्तदीहा परा शक्तिः सिद्धिसंयोगतस्त
थाः ॥ श्रीमत्त्रिपुरसुन्दर्याः पूर्णो यज्ञः शरीरके ॥ अङ्गबाधे यथा देवो नान्यस्य हि तथा भवेत् ॥ स्व
विभवान्नरूपा वै पूज्य कार्या विभूतये व्यतिक्रमात्तु हीनः स्यात् ब्रह्महत्यामवाप्नुयात् ॥ नाधिकां नैव
नसुनमुभयं पापदायकं ॥ चतुर्दश्यामथाष्टम्यां पूर्णायां मासमध्यतः ॥ महाभूतदिने वापि यजेत् विभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वविसारं॥ कृष्णयाथचतुर्द्दश्यां शुक्लेतु जद्दिने यदा॥ महाभूतदिने नतु सर्वभूतवशङ्करं॥ यदिपुष्या
भवेनत्र तत्र सनन्नायकं लभ्रदं॥ मन्त्रं यदि स्मशाने तु शवोपरि यथाविधि॥ अथवा प्रजपेद्धीमान् तकांनी
लरूपिणीं कृत्वाजप्तान्तदा कुर्याद्भूतप्रेतपिशाचकान्॥ तान् वशीकृत्य तल्लोके तथेहत्रैः समासतेः
वशीकृत्य श्रियायुक्तो मोदते पुत्रपौत्रकैः॥ यथा तथा गृहे वाह्ये कृत्वा जप्तान नो बुधः॥ राक्षसान् कि
न्नरान् कृत्वा तल्लोके च तथेह च॥ तै स्वप्रमुदितो भोगी भोगान्भुङ्क्ते यथेच्छया॥ निजे गेहे स दा
यत्नुपविश्य सुमनोहरे॥ कृत्वा जप्तान्नरः प्राज्ञो यक्षान्सर्वान्वशं नयेत्॥ भुक्त्वा चप्रमुदितो लोकेध
नी धनविशारदः॥ धनप्राप्तो धनानां च सुखं च नन्दनुविनानात्॥ अनुभूय ततदानन्दं तद्दिशायिवि
राजते॥ नदीनदसमीपे च पितृपीठे ऽथवा पिये॥ कृत्वा जप्ता च तल्लोके तथेहत्रैः प्रमादितः॥ कामा
त्मा कामरूपी च कामी काममनोहरः॥ कामयित्वाखिलान्कामान् कामराजइवापरः॥ राजते सततं रा
जाराजभिश्चैव राजिभिः॥ पुण्यक्षेत्रे महापीठे पुण्यवृक्षसमीपके॥ कृत्वा जप्तान् तेषामाना मान्याः स्वयं

यमलोकराट॥ सर्व्वदायुक्तस्ततेलोकेराजतेसिद्धभूमिषु॥ मानुषत्वंविनासिद्धिःपुनःपरमेदुर्ल्लभं
यस्मात्तसर्व्वलोकानांभोगप्रत्यक्षदायकं॥ प्रफुल्लकुसुमाकीर्णोद्यानेऽतिमनोहरे॥ प्रफुल्लकुन्दसं
मोदप्रपूरितदिङ्गनारे॥ वृक्षमूलेऽथवाजप्त्वाकल्पाहस्तंस्वमस्तके॥ गन्धर्व्वरूपवान्भूत्वागीतनृ
त्यविशारदः॥ गन्धर्व्वान्किन्नरान्हत्वातल्लोकेचरतथेऽत्रै॥ आनन्दंपरमंलब्ध्वागीतनृत्यादिगोचरं
तपतस्मयेरम्येमोदतेतत्प्रसादतः॥ नागलोकसम्भिभूमौवनेगिरिगुहासुच॥ कृत्वाजप्त्वासप्त
देवीनागान्सर्व्वान्वशंनयेत्॥ तैःप्रमुदितःपाशस्तल्लोकेचरतथेहच॥ भुङ्क्तेवहुविधानभोगान्
नागलोकप्रतिष्ठितान्॥ परकीयेयदायत्रपश्येच्छुत्रैविलोकिते॥ कृत्वाजप्त्वानरोधर्म्मादक्षरंलो
कमाप्नुयात्॥ तामेवचवशगानकृत्वातल्लोकेचरतथेहच॥ मोदनेसततंवीरःसुरासुरविवेष्टितः॥ यत्रकु
त्रमहापीठेऽथोरिसूर्य्यविलोकने॥ कृत्वाजप्त्वासमस्तंज्ञानमवरोगतमोपहा॥ उदेतिसवितासूर्य्यःसूर्य
लोकेतथेहच॥ यनेसर्व्वान्वशीकृत्वावशीवशंनयेज्जगत्॥ पुण्यानदीजलेस्नात्वायस्सदंनेवानिरन्तरं

CC-0. In Public Domain. Digitization by eGangotri

सदापुण्यजलस्नायी तत्पायी नदिहारवान् ॥ कृत्वा जप्त्वा नरः प्राज्ञो ब्रह्मर्षिलोकसंज्ञके ॥ ब्रह्मर्षि-
भिर्मुदान्वितस्तत्रैव तेन तत्प्रसादतः ॥ भुङ्क्ते स विविधान्भोगान्ब्रह्मघोषपुरःसरान् ॥ सत्कृत्या च प्रि-
याप्तुकोऽत्र क्रियया चाति श्रद्धया ॥ राजते सततं राजा राजिराजविहारवान् ॥ देवतायतनेभ्यन्ये नित्यपू-
जां गृहे तथा देवताः प्रतिष्ठाप्य निदेवतायतने कृते ॥ उद्यानसुसमापन्ने गृहे चातिमनोहरे ॥ नित्य-
मावाहयेत्तत्र मधुपर्काभिर्यजेत् ॥ देवांस्तत्र विजानीयोत्तमां सान्निध्ययोगतः ॥ दृष्टा तामवैत-
तुल्ये शोभिते देवशोभया निर्जने चातिशुद्धे च गन्धधूपोत्करे शुभे ॥ धूपदर्शनघण्टादिकुसुमो-
त्कारभूषिते ॥ देवापीठं महापुण्यमलङ्कुर्व्व गृहे तथा ॥ कृत्वा जप्त्वा नरो देविकार्ये तत्वज्ञानस-
पा ॥ भावनावज्ञासम्पन्नो नरो दिव्यां तथेह च ॥ दीव्यते देववद्देवो देवभोगी विहारवान् ॥ दिव्यदर्शी दिव्य-
रूपी दिव्यभोगविहारवान् ॥ देवैः सम्मानितो मानादेववद्विहरेत्क्षितौ ॥ विमानगामिभिर्यानैर्ग-
जवाजिपुरःसरैः ॥ शिवालये शिवक्षेत्रे शिवलिङ्गसमीपके ॥ कृत्वा जप्त्वा शिवाभ्यासी शिवलोकेत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

थेह च ॥ मोदते सततं योगी युक्तः शिवदर्शिकैः ॥ विष्णुक्षेत्रे महापुण्ये विष्णोर्गेहे तदन्तिके ॥ वैष्ण
वं मां वस्माश्रित्य कृत्वा जप्यादिसाधकः ॥ केशवान्तं च वै गत्वा विष्णुलोके तथेह च ॥ मोदते सततं
शुद्धः स्वयं विष्णुरिवापरः ॥ विष्णुपीठपरासिद्धिः सेशो देवत्वदायिनी ॥ ० ॥ इति गान्धर्वतन्त्रे
चतुर्विंशतितमः पटलः ॥ ॥ ईश्वर उवाच ॥ पुण्यक्षेत्राणि वक्ष्यन्ते शृणु प्राज्ञान्यतो मम
पुण्यक्षेत्रं नदीतीरं गुहापर्वतमस्तकं ॥ तीर्थप्रदेशाः सिन्धूनां सङ्गमः पावनं गोष्ठं शून्यं शिवा
लयं ॥ अश्वत्थामलकीमूलं गोशालाजलमध्यतः ॥ देवतायतनं कूलं समुद्रस्य निजं गृहं ॥ गुरू
णां सन्निधानञ्च चित्तैकाग्र्यस्थलं तथा सर्वेषामुत्तमं प्रोक्तं निर्जनं पशुवर्जितं ॥ यत्र तत्र नरः पूजां
निर्जने कुरुते तु यः ॥ तस्य दत्ते शुभं देवि विपन्नं पुण्यं फलं जलं ॥ शुक्लाभक्ताश्च वारुण्यान्पूजाङ्गव्यस्य
विस्तरात् ॥ देव्याः सन्निधिरत्रन्यान्निर्जने पूजनात्तथा वाराणास्यां सदा पूजा सम्पूर्णफलदायिनी
ततस्तु त्रिगुणा प्रोक्ता पुरुषोत्तमसन्निधौ ॥ तथोऽपि द्विगुणा प्रोक्ता द्वारवत्यां विशेषतः ॥ सर्वक्षेत्रेषु पु

CC-0. In Public Domain. Digitization by eGangotri

गन्ध ठेपुपूजा जारवती समा ॥ विंध्ये शतमगुणा प्रोक्ता गङ्गायामपि तत्समा आर्य्यावर्त्तमध्यदेशे ब्रह्माव
९९ र्त्ते तथैव च ॥ विन्ध्यावत् फलदा पूजा प्रयागे पुष्करे तथा ॥ ततश्चतुर्गुणा प्रोक्ता करतोयानदीजले
तस्माच्चतुर्गुणा फला नन्दिकुण्डे च पार्वति ॥ ततश्चतुर्गुणा प्रोक्ता जल्पीशेश्वरसन्निधौ ॥ तत्र सिद्धे
श्वरीयोनौ ततोपि द्विगुणा मता ॥ ततश्चतुर्गुणा प्रोक्ता लौहित्यनदपार्थिसि ॥ तत्समा कामरूपे
च सर्वत्रैव जलस्थले ॥ सर्वश्रेष्ठो यथा विष्णुर्लक्ष्मीः सर्वोत्तमा यथा ॥ देवीपूजा तथा शस्ता कामरू
पे सुरालये ॥ देवीक्षेत्रं कामरूपं विद्यतेऽन्यत्तत्समं ॥ अन्यत्र विरला देवी कामरूपे गृहे गृहे त
तः शतगुणा प्रोक्ता नीलकूटस्य मस्तके ॥ ततोपि द्विगुणा प्रोक्ता हारके शिवलिङ्गके ॥ ततोऽपि द्वि तंत्र
गुणा प्रोक्ता दाक्षायण्यां स्वयोनिषु ॥ ततः शतगुणा प्रोक्ता कामाख्यायोनिमण्डले ॥ कामाख्यायां ९९
महादेवी पूजां यः कृतवान् सकृत् ॥ स चेह लभते कामान् परत्र शिवरूपता ॥ न तस्य सदृशोऽन्योस्ति
रिपुस्तस्य न विद्यते ॥ वाञ्छितान् समवाप्नोति चिरायुरभिजायते ॥ वायोरिव गतिस्तस्य भवेदन्यै

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रवाधिता संग्रामे शास्त्रवादेः चतुर्जयः स हि जायते ॥ मूलमूर्त्तिर्म्महादेव्या यो निरूपा निशय्यते ॥ त
त्रसंपूज्य तां देवीं पुनर्जन्म न विद्यते ॥ पुण्यक्षेत्रमिति प्रोक्तं न प्रकाश्यं कदाचन ॥ ॥ देव्यु
वाच ॥ संग्रामे मृतके चैव रोगभीतो न थायदि ॥ तदा किं स्यान्महादेव तदिह कथयस्व मे ॥ ॥ ई
श्वर उवाच ॥ अशौचं साधकेन्द्राणां नास्ति रोगभयं तथा ॥ शुचीनां धर्म्मचर्य्या पापानापदसमुद्भवः
कुतः ॥ यदि विघ्नो भवेद्देवि पूर्वकर्म्मनिबन्धनात् ॥ तदैवं परमेशानि विधिं कुर्य्याद्विचक्षणः ॥ गन्धं पु
ष्पं च धूपं च दीपं नैवेद्यमेव च ॥ एतैर्हीना तु याऽपूजा न सा कल्याणदायिनी ॥ पूष्पाञ्जलिं विधाय
थ पूजयेच्चक्रदेवताः ॥ अष्टकोणं वा वेन्द्र वं परिपूजयेत् ॥ एवं कृत्वा जपेद्विद्यां समर्प्य च विसर्जये
त् ॥ कुमार्य्यै भोजनं दत्वा सम्पूर्णफलभाग्भवेत् ॥ अथवा हेतभावेन भात्मानं तन्मयं स्मरेत् ॥ अद्वै
तभावसम्पन्नस्त्रिपुरीकृतविग्रहे ॥ आत्मन्येव यजेद्देवीमुपचारैर्यथाविधि निजदेहस्थयन्त्रसुस
र्वयन्त्रात्परं शिवं ॥ आनन्दहृदयं कृत्वा सपोन्नासेन मानवं ॥ गुरुदत्तविद्यानेन जपेद्विद्यामनन्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध
१००

धीः ॥ सुगन्धिपुष्पमालाभिः स्वर्णालङ्कारभूषणैः ॥ स्निग्धं सुमधुरं यच्च कामरूपं मनोहरं ॥ कृत्वा सु
मङ्गलं देहं स्मेरमुखाम्बुजासस्मितं ॥ अहिंसाव्रतिमाश्रित्य सर्वप्राणिहिते रतः ॥ निजभावे सदा तिष्ठन्
देववद्विहरेत् क्षितौ ॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ॥ वीतरागभयक्रोधो मनोहङ्का
रवर्जितः ॥ योषिद्यत्नेपुरश्चर्या कार्या राज्ञो न चान्यथा ॥ सनत्कुमारसमुत्पन्ने सिंहव्याघ्रमाकुले ॥ प
रसैन्यागमे वापि कुर्यान्मानसपूजनं ॥ कारागारनिबद्धो वा पूजाद्रव्यविहीनकः ॥ इदं रहस्यं परम
मिदं स्वस्त्ययनं महत् ॥ मन्त्रवेदमयं शुद्धं पूजाकर्म समनुत्तमं ॥ गोपयेत् यत्नतो दिव्यं सर्वसिद्धिप्र
दायकं ॥ ज्ञानदं कामदं श्रेष्ठं सद्यः प्रत्ययकारकं ॥ यस्मै कस्मै न दातव्यं नास्तिकाय कदाचन ॥ एतत् तंत्र
ज्ञानात् परं ज्ञानी सदा भवति तत्क्षणात् ॥ देव्युवाच ॥ कथं तन्मानुषे लोके लोकानां मन्दधी १००
मनेवेत् ॥ तत्कथय महादेव लोकदेशादिभेदतः ॥ ईश्वर उवाच ॥ मानुषं भारतं श्रेष्ठं तत्रा
पि पुण्यदेशकं लोकाः पुण्यपराः श्रेष्ठास्ते मां ज्ञानी विशिष्यते ॥ ज्ञानपुण्यविहीनास्तु पिशाचा भोग

तत्पराः ॥ पशुप्रायज्जनाम्लेच्छाः श्वेतलोकनिवासिनः ॥ नदस्योनिप्रमाणोस्मज्ञाननिनसमीहते ॥ सू
दुःखो बहुविधान् भोगान् भुक्ता लोकप्रमाणकः ॥ भक्ष्याभक्ष्यं न जानन्ति कार्याकार्यमथापिवा ॥ व
र्ज्जन्ते विधिना यज्ञे भोगैर्म्लेच्छपुरस्कृते ॥ तेपुनर्हिहृदेवेशिनिशान्ववप्रमाणकाः ॥ जीवनं धनमेमा
त्रधनचिन्तायत्परायणाः ॥ धनसञ्चयकारी च दानभोगबहिष्कृतः ॥ शिश्नोदरसुखे यस्तु केवलं वर्त्त
ते जनः ॥ यक्षलोकप्रमाणीन्नयक्षलोके स महीयते ॥ सदाचारमध्यदेशे सदाचारविहारवान् ॥ आरो
गी रूपवान् भोगी पितृलोके महीयते ॥ मध्यदेशे महापुण्ये स्वल्पनदीसमन्विते ॥ पूज्यपूजकभा
वेन यज्ञापज्ञविशारदः ॥ शुभान्तःकरणो विज्ञो मानुषो लोकसत्तकः ॥ भोगमोक्षप्रदेसुक्षेत्रे स्वम्ह
गाविवोषितेकर्त्तव्यमिति सर्वाणि श्रुतिस्मृतिमयानि च ॥ कुरुते सततं भोगी दानभोगपरायणाः
देववद्विहरेल्लोके देवलोकप्रमाणकः ॥ अथ त्रिगुणरूपिण्याः पीठनिष्ठे गुणपदायके ॥ महादेव्या
मत्सपुण्यगुह्येवाप्रकटेपि च ॥ निराननेप्यरथवानन्देर्दर्पिणोत्तररूपके ॥ आत्मान्मात्नमात्मावायो

गीवा भोगसंयुतः ॥ सिद्धेतुतया भवेद्देवि महादेवीप्रसादतः ॥ ० ॥ इति गन्धर्वतन्त्रे पञ्चविं-
शतितमः पटलः ॥ ॥ देव्युवाच ॥ कीदृशो वा भवेच्छिष्यः कीदृशो वा भवेद्गुरुः ॥ कीदृशो
वा भवेद्दीक्षा कथं कुर्यात्तदद्भुतो ॥ ॥ ईश्वर उवाच ॥ अथ दीक्षां प्रवक्ष्यामि समाश्रितां हित
काम्यया ॥ विना यया नैव स्यात् सर्वमन्त्रफलं यतः ज्ञानं दिव्यं यतो दद्यात् कुर्यात् पापक्षयं य
तः ॥ अतो दीक्षेति सांप्रोक्ता गुरुशिष्योवशामिते ॥ आदौ विद्यावतां वाह्यं दक्षिणामूर्त्तिरव्ययः ॥ स्तु
तमुखैव भगवान् महाविद्यां ददाति वै दिव्यौ गुरुस्सर्षि ॥ सोऽथ दिव्यां विद्यां प्रकाश्य च ॥ दिव्यो यान
करोच्छिष्यान् वक्ष्ये पथम्रत्युपार्वति ॥ प्रकाशोऽथ विमर्शोऽस्य रत्नानन्दोऽप्यरत्नयपि नाससमे पादहन्तो
भैकल्पयन् दिव्यरूपतः ॥ त्रयतेभ्यः समुत्पन्नाः सिद्धाश्च त्रयस्य वै ते ॥ ज्ञानं सत्यं पूर्णां इति श्रीसुरा
स्तेस समीरिताः ॥ दिव्यामदनिकेनित्या सिद्धा भूमावितापि च ॥ निवसन्ति तन्नत्येभ्य समभूवाश्च य
तथा ॥ स्वभावप्रतिभसत्तदत्स्व भगश्चेति मानवः ॥ ते भूमावेव सन्ततं निवसन्ति समन्तकाः ॥ प्रस

त्रवदनाः सर्व्वे वराभयकरान्विताः ॥ द्विनेत्रा द्विभुजास्ते ललिताकामसंयुताः ॥ मायालक्ष्म्यादिकास्त
दथ्या आनन्दनाथगाः ॥ नराणां नवलामानि सर्व्वाणि पृथक् पृथक् ॥ तानि सप्ताक्षरीयोगात् प्र
त्येकं षोडशाक्षरं ॥ नित्या षोडशरूपाणि नामानि ज्ञेयान्यनुक्रमात् ॥ विमलाजयिनी मध्ये पूज्यास्ते
वंवयानन्ते ॥ नामपर्यायतः प्राप्तं कालावाप्तमिति द्वयं ॥ प्रसिद्धं वास्यतो यन्त्री राणिनामानि साध
के ॥ मनुष्यरूपसम्प्राप्तः सर्व्वतन्त्रार्थतत्त्ववित् मन्त्रतन्त्रारूतावोऽथ विचारामाहमेवसः ॥ गुरु
शक्तो भवेद् दृढ्ढो नदन्यो विपरीतदः गुरुः सर्व्वगुणोपेतो दोषैरस्पृष्टमानसं ॥ अरोगी नास्तिकुल्
श्वसत्सुरुचिर्थिभाषणं ॥ सुन्दरः सुमुखः स्वच्छः स्वलोभी वहुमन्त्रवित् ॥ असंशयः संशयच्छि
न्निग्रहानुग्रहे प्रभुः ॥ शिर्दम्भो निरहङ्कारः सत्यवादी दृढव्रतः ॥ आश्रमाश्रमधर्म्मज्ञो मात्सर्य्य
रहितः शुचिः ॥ अवहुमन्त्रदो वाग्मी जपपूजापरायणः ॥ सर्व्वतन्त्रार्थवेत्ता वदयावानन च हिंस
कः ॥ यदृच्छालाभसन्तुष्टः ज्ञानोनियमवान् ऋजुः ॥ स्मेरपूर्वाभिभाषित्वं स्वच्छतां जिघ्नहृतिमा

CC-0. In Public Domain. Digitization by eGangotri

सन्तोषमगर्वित्वमालोभित्वमनिन्दता ॥ अपक्षपातमवित्तेच्छा गुरुस्तं हितवादिता ॥ एवम्विधो
गुरुर्ज्ञेयस्त्वितरः शिष्यदुःखदः ॥ यथायोग्यगुणैः पूर्वै युक्तश्चातिप्रियस्वदः ॥ विशुद्धदेहवदनः
शुद्धाम्बरधरः शुचिः ॥ विमुखपरनिन्दासु देवतादर्शनेषु च ॥ परायत्तनिताः भूमिपीडासुवि
गतस्पृहः ॥ दयान्वितः सर्वजने प्रेक्षाकारी जितेन्द्रियः ॥ आस्तिको गुरुभक्तश्च शुद्धिमान्सुस्थिराश
यः ॥ अलुब्धः स्थिरमैत्रश्च गुरुवाक्यप्रमाणकः ॥ सर्वद्वन्द्वभक्तिश्च गुरोर्मन्त्रे स्वदेवते ॥ एवम्विधो
भवेच्छिष्य स्थितरोद्दुःखकृद्गुरोः ॥ दीक्षाकालं विनिश्चित्य सुकृतैर्दोषवर्जितैः ॥ गुरुं समाश्रयेच्छि
ष्यं प्रमादरयसमाहितः ॥ प्रसीद नाथ देवेति कथेनिच कृतादरः ॥ प्रणम्योपविशेत्पार्श्वे तथाग
रुदनुज्ञया ॥ मुखावलोकी मैधैनकुर्याद्दारिद्र्यमादरात् ॥ असत्यं नवदेद्दग्रे न वहुप्रलपेदपि
कामं क्रोधस्तथा लोभं मानं प्रहसनं स्तुतिं ॥ चापलानि च जिह्वा शिकायां शिपरिदेवनं ॥ ऋणादानं त
था दानं वस्तूनां क्रयविक्रयं ॥ न कुर्यात्गुरुणा सार्द्धं शिष्योपि च कदाचन ॥ यतो गुरुः शिवः साक्षात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्तवान्प्रणामन्यजेत्॥ यथा देवे तथा मन्त्रे यथा मन्त्रे तथा गुरौ॥ तथा गुरौ तथा चात्मन्येवं भक्तिक्र-
मः प्रिये॥ अवमन्य गुरोर्वाक्यं स्वबुध्या कुरुते तु यः॥ न कदाचिद्भवेत्सिद्धिर्मन्त्रे चैर्दे विप्रपूजने॥ मन्त्रेण
न सिध्यति यतः पूज्यं कुर्यात्तत् यथोदितं॥ आसनं शयनं वस्त्रं भूषणं पादुकां तथा॥ छायां कलत्रं सन्त्यज्य-
यत् गुरोर्यत्नात्प्रपूजयेत्॥ गुरुशय्यासनं पीठं सुयानं छत्रपादुकां॥ स्नानोदकं तथा छायां लङ्घयेन्न
कदाचन॥ गुरुर्दृष्टो भवेत् हृष्टः परमानन्दनिर्भरः॥ भीतभीतपदाम्भोजं पश्येत्सङ्कितलोचनः॥ अ-
पदीकृत्य सर्वस्वं तदादिष्टं समुदान्वितः॥ कुर्यात्सर्वप्रयत्नेन यथा तुष्टो भवेद्गुरुः॥ सकृत्प्रणम्य
दण्डवद्दिष्टदेवधिया गुरुं॥ पुनः काञ्चितसर्वाङ्गपुन्नाकोटिफलं लभेत्॥ यद्यत्प्रियतमं वस्तु भ-
क्त्यात तस्मै निवेदयेत्॥ आदत्वा गुरवे वस्तु यत्किञ्चिदिह भूतले॥ आत्मसात्कुरुते यस्तु स भवेद्यो-
गिनीपतिः॥ यद्दैवलभ्यते वस्तु भिक्षया वान्यचेष्टया॥ तन्निवेद्य ततः पादौ संस्पृश्य भुञ्जीत सादरं॥ कु-
देसेव हि सङ्क्लेपैः वार्त्तां गुरुनिरुक्तानि यत्नाविष्णुद्भावेन सर्वथात्मापि पीणां गुरौ॥ गुरुस्ताडि शिष्य

नाश्चैव तयोर्भवत्संरकालता ॥ दापयेत्स्वकृतं देयं पत्नीपापं स्वभर्तरि । तथा शिष्यार्जितं पापं गुरुस्मा
प्नोति निश्चितं ॥ यत गुरुः स्वाश्रमे शिष्यं वर्षमेकं परीक्ष्यवै ॥ दीक्षाकालं ततः प्राज्ञो भावयेत्सुसमा
हितः ॥ आरम्भकालेच वैशाखे दीक्षा श्रेष्ठफलप्रदा ॥ फाल्गुणमार्गशीर्षे च ज्येष्ठे दीक्षा तु मध्यमा ॥ आ
षाढे माघमासेश्च कनिष्ठे सङ्गिवादृतौ ॥ निन्दितः श्रावणश्चैत्रः पौष्यभाद्रपदस्तथा निन्दितेष्वपि
मासेषु दीक्षाकालग्रहो शुभा ॥ विष्णुवायनयोर्द्वन्द्वे आपाढ्यमदनोत्सवे ॥ ग्रहणोऽर्कस्य चेन्दोर्वादि
नेतत्फलदं भवेत् ॥ मन्त्रारम्भं सुधीः कुर्यात् शुक्लपक्षे शुभेऽहनि । रवौ गुरौ सिते सोमे कर्त्तव्यं बुध
वासरे पूर्णिमा पञ्चमी चैव द्वितीया सप्तमी तथा ॥ त्रयोदशी च दशमी प्रशस्ता सर्वकामदा । पञ्च
म्यां शुक्लदिवसे रवौदये वा शितारयोः ॥ गुरुशुक्रोदये शुद्धे लग्ने चाष्टशोभिते ॥ चन्द्रताराद्यनुकूले वस्थि
रे दीक्षा शुभा प्रिये विविधा सा भवेद्दीक्षा मान्त्री शाक्ती च शाम्भवी ॥ मन्त्रार्थनासनस्थानध्यानयोगादि
भिः कृता ॥ मान्त्री दीक्षा च सा प्रोक्ता यथाशास्त्रोक्तरूपिणी ॥ सिद्धैः स्वशक्तिमालोक्य तया केवलया शि

शोः ॥ निरूपायकृता दीक्षा ज्ञानेनैयीपर्कीर्त्तिता ॥ अग्निस्पर्शं विना चार्य्यो शिष्ययोरुभयोरपि ॥ दे
शिकानुग्रहे शैवशिवताव्यक्तिकारिणी ॥ ज्ञेयस्त्वनुज्ञा नाम्नीदीक्षा शिवावेशनकारिणी ॥ अज्ञानाच्छिष्य
विज्ञानं त्राणं संसारबन्धनात् ॥ यतः कारो निरंसस्यि श्रेयमन्त्रः स्तुच्यते ततः ॥ भूमेयपरिग्रहं कुर्य्यात् य
थोक्तं तेमयापुरा ॥ शल्यादिशोधनं कुर्य्यात् याज्ञीं विधिविधानतः ॥ विप्राशिवावेदघोषैर्मङ्गला
चारपूर्वकं ॥ वास्तोर्बलिं प्रकुर्वीत मण्डलं रचयेत्तथा ॥ सर्वमङ्गलसम्पन्नैर्विरध्यात्कुण्डपर्यरां ॥ गु
रुणालं विनिश्चित्य यागेश्वरसन्नवासरान् ॥ शिष्यानुकूलमन्त्रेणापूजयेत् परदेवतां प्राणायामेन मे
ऽन्तेश्च रात्रावाराधनानामभिः ॥ पोकलीसन्तेषां सैर्वितरक्षिविनागुरुः ॥ पूजां रात्रौ प्रकुर्वीत दिक्पाला
नपिपूजयेत् ततः कुण्डमध्यस्थानलन्हविर्विराजितं ॥ पायसान्नैर्बलिनेभ्यो दत्त्वा तान् प्रार्थयेत् गुरुः
आरायुक्तं चारियाग्नेन तन्मन्त्रानुमन्त्रितं ॥ शिरस्याधायदेवेशिप्रदक्षिणमनुव्रजन् ॥ यज्ञं संक्षयेद्धि
व्यमादौ गुरुरनन्यधीः ॥ आज्ञादिसहितो देवा पूजितास्तर्पितास्तथा ॥ मथं रक्षन्तु सन्तुष्टा लोकपा

गन्ध
१०४

नानमोस्तुवः ॥ मथगृह्णापूर्वेद्युः सायमेव विधासनं ॥ गुर्वादिसहितो वासो रात्रौ नियमपूर्वकं ॥ विधि
वन्मण्डपं चारुवेदिकामध्यशोभितं ॥ पताकाध्वजसंकीर्णं वितानादिविभूषितं ॥ धूपैर्मज्ञान्नसम्मु
द्दीपावलिभिरर्चितं ॥ पुष्पाक्षतफलैः कुन्नैर्लाजैरक्षिभिरर्चितः ॥ नवपल्लवमालाभिः सर्वतः स
मलङ्कृतं सधूपैः कदलीस्तम्भैः पूगपोतैरलङ्कृतं ॥ पञ्चगव्येन तद्गेहं चक्रराजं निशुन्मया ॥ शोधये
न्मूलमन्त्रेणाभिमन्त्रितेन वरानने ॥ समानेपञ्चगव्यानां कृत्वा भागं विशोधयेत् ॥ मूलमन्त्रेणास्त्रमन्त्र
जप्तमात्रेणावशोधयेत् ॥ तेन सर्वविशुद्धिः स्यात् सर्वपापनिकृन्तनं ॥ महापातकजातानां निष्कृत्यागव्यं
पिबेद्दिने ॥ नाश्नीयात्पानमात्रेण शय्या हृद्वेदवेदिनः ॥ सुस्नातं शुद्धवेशञ्च शिष्यं सुस्थिरमानसं तंत्र
आनीतस्थाऽयं विधिवद्धजेदनुपितं गुरुः ॥ होमयेत् संस्कृते वह्नौ पायसैर्मधुसंयुतैः ॥ आचार्यस्तु १०४
रो विधिवत् सम्पूज्य परदेवतां ॥ मूलेनैव शिरस्थाने ततः शय्यां गतं शिशुं ॥ स्वप्नमानवमाश्रित्य रक्षा
दयेत् पूर्वं मस्तकं नाभौ हि लिङ्गयं भ्रूमपाणायोदिजर्जरितः ॥ स्वप्नमानवमन्त्रोऽयं ज्ञायते परिकीर्त्ति

CC-0. In Public Domain. Digitization by eGangotri

तः ॥ नमोऽज्ञाय त्रिनेत्राय पिङ्गलाय महात्मने ॥ रामाय विश्वरूपाय स्वप्नाधिपतये नमः ॥ स्वप्ने कथ
य मे तथ्यं सर्वकार्य्येष्वशेषतः ॥ क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वरः ॥ मन्त्रेणानेन स्वपिकाले
तु देवं प्रार्थ्य ततः स्वपेत् स्वप्नेन शुभाशुभं दृष्टं पृच्छेत् प्रातः शिष्यं गुरुः ॥ गुरुणा चार्चनं कृत्वा उप
वासी जितेन्द्रियः ॥ दर्भशय्यागतो रात्रौ दृष्ट्वा स्वप्नं निवेदयेत् ॥ कन्यां छत्रं रथं दीपं प्रासादं मङ्गलन
दीं ॥ कुङ्कुमं कृष्णयत् माल्यं स्वर्णाश्व फलितं द्रुमं ॥ पर्वतञ्च हंसं मेध्यमाममांसं सुरासवं ॥ एवमादीनि
सर्वाणि दृष्ट्वा सिद्धिमवाप्नुयात् ॥ चाण्डालं गर्दभं काकं रूजाशुन्यश्च मङ्गलं ॥ तैलाभ्यक्तं नरं नग्नं मु
ण्डं कृष्णं स कण्टकं ॥ प्रासादमङ्गले दृष्ट्वा न रोगी रोगमवाप्नुयात् दृष्ट्वा दुःस्वप्नकं देव होमात् सिद्धिमवाप्नु
यात् ॥ शुभे शुभं वदेत्तस्य गुरुर्यादशुभं शुभं ॥ अनेन रीतिक्रमात् प्रोक्तो विधिः शिष्याधिवासने ॥
इति गन्धर्वतन्त्रे षड्विंशतितमः पटलः ॥ ० ॥ ईश्वर उवाच ॥ अथ पूर्वानुसारेण नित्यं प्रात
समाप्य च देवान् पितॄन् समभ्यर्च्य वस्त्रालङ्कारभूषणैः ॥ आचार्य्यमृत्विग्याजकान् ब्राह्मणानपि तोषयेत्

CC-0. In Public Domain. Digitization by eGangotri

शिष्यःसालङ्कृतोमौनीपुष्पचन्दनभूषितः॥ नानामङ्गलवाद्यैश्चब्रह्मघोषपुरःसरं॥ नारीणांमङ्गला
शीभिर्गीतवाद्यैस्तथैवच॥ जयशब्दान्वितैस्तोत्रैःसंस्तुतैःश्रुयमानस॥ दीपमालावलीरम्यंनानाधू
पप्रधुमितं॥ मण्डपंविधिवद्देविपूर्ववत्प्रविशेत्गुरुः॥ पूर्ववदपरंकृत्वासनेसमुपविश्यच
तथापरस्त्वनिर्वर्त्यकुम्भेनवरात्रने॥ वेदिकायांवरारोहेसिन्दूरजसाथवा॥ चक्राराजन्तुलिखितंतम
ध्येदर्भविस्तृते॥ सौवर्णंराजतंताम्रंमाहेयंस्त्वसुलक्षणं॥ काञ्चिंशद्भुलंकुम्भंविस्तारोन्नतिशालिनं
क्षालयित्वास्त्रमन्त्रेणाकुन्तंसम्यक्सुरेश्वरि॥ चन्दनागुरुकर्पूररोचनाकुङ्कुमैरपि॥ दिव्यैर्द्रव्यै
स्तुसम्पूर्णंवासोयुग्मेनवेष्टितं॥ नूतनंनेत्ररम्यास्त्वपुष्पमालाद्यलङ्कृतंदधिचन्दनसंलिप्तंक्षिप्त्वान
नवरत्नकं॥ मदयन्तींसहदेवांदूर्वांतस्मिन्तथैवच॥ मृत्तिकाःसप्तविन्यस्तंपल्लवैःपञ्चभिर्युतं॥ परि
तोवेष्टितंसूत्रैरनेकानिमनोहरैः॥ यथानास्तीर्थपुष्पाणिसमरंक्रमविधियागुरुः॥ मूलमन्त्रेणसंस्थाप्यय
जेदाधारपूर्वकं॥ वह्निमण्डलरूपंतंकलाभिःसहपूजयेत्॥ तथासूर्यमयंकुम्भंकलाभिस्तत्रपूजये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्॥ जलेस्मिन्मम यंत्रस्थं कलाभिश्च समर्चयेत्॥ ते जसस्त्र यमियंप्रोक्तं जलमनादान्तकं स्मृतं॥ पुष्पैरञ्ज
लिमादाय तस्मिन्नेव प्रदापयेत्॥ यश्चिमोत्तर रुद्रेन्द्र पुरस्य यातं शुभोऽशुभे॥ अष्टोत्तरशतं शान्त्यै जु
हुयाद्स्वमन्त्रतः॥ अथ प्रायश्चित्तविधिना यथाक्रममनुगमं॥ कृत्वा सम्पूज्य विधिवदिष्टदेवधिया
गुरुः॥ अज्ञाकृतीः समभ्यर्च्य पयित्वा च हूयतां॥ आगमेकं महादेव्यै ज्ञात्वा सम्यग्गोहुनेमतः॥ अष्टोत्त
रशतं साज्यं मधुरत्रितयान्वितं॥ समिद्भिःऽग्नौ ल्हुनेन्नतः महादेवीं ध्यात्वा सम्यक्प्रधानतः॥ यानस्त्रि
पि जुहोत्यग्नौ असमिद्भिश्च मानवः॥ स यन्दाग्निः सामयो वा अल्पायुश्चोपजायते॥ तस्मात्समिद्भिर्होत
व्यं नासमिद्भिः कथञ्चन॥ आरोग्यमिच्छता पुंस्य श्रियमात्यन्तिकीं तथा॥ तथा वृषः सद्धुमेव जुहुयात्
स्याहुताशने॥ यजमानो भवेद्दग्धः सपुत्रश्च विनश्यति॥ अथ दीप्तेन होतव्यं मध्यमेनाप्यनेधिते
प्रदीप्ते लेलिहानेऽग्नौ होतव्यं कर्मसिद्धये॥ हुत्वा साङ्गं महेशानीं समाप्य तदनन्तरं॥ कर्मसम्पूर्णं कृत्वा
चार्यं नत्वा गत्वा सर्वान्गुरुः॥ शिष्यमाहूय यत्नेन वासं साश्रुध्यन् सुखं॥ विशेषार्घ्योदकेनैव तस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्ध
१०६

वेक्ष्यविधानतः॥ कारुण्याद्विनयेदेवि सर्वसम्पत्तिसंश्रये॥ शरण्यवत्सलो मातः कृपामस्मिन् शिशौ
कुरु॥ अशिवप्रमुखैः पाशैर्या शिनस्य सुरेश्वरि॥ दीनस्यास्य दयाधारे कुरु कारुण्यमीश्वरि॥ ऐहिका
मुष्मिके भोगेरस्मिन् मुख्यतामसौ॥ स्वभक्तिः सकलचास्मै दीयतां निष्फलाश्रये॥ एवं प्रार्थ्य महादे
वीं मुडास्य हृदयाम्बुजे॥ शिष्यायभावयेद्दिव्यः शिवोऽस्मीति भावयन्॥ अनन्तमोपहं दिव्यं सिद्धान्तं
श्रावयेत् गुरुः॥ यत्नेनानन्त्व भवति किञ्च स्थावरजङ्गमं॥ शरीरस्थापितन्तो स्थित स्मिन्नेव द्विध्य शि
वः॥ कञ्चुकितः शिवो जीवो विमुक्तः परशिवः॥ आत्मज्ञानमात्मविद्भिः पूरुषार्थ समीरितः॥ वर्णात्मकं
महेशानि नित्याः शब्दाः प्रकीर्त्तिताः॥ अचिन्त्यस्थिह मन्त्राणां प्रभावः समुदाहृतः॥ सम्प्रदायपरिज्ञा
नं गुरूणां सिद्धिदायकं॥ विश्वासाद्गुरुवाक्यानां सर्वसिद्धिरितीरिता प्रामाण्यन्त्वागमानां तु किञ्चासं
समुदाहृतः॥ गुरूणाञ्च वमन्त्राणां देवानामपि पार्वति॥ मनः पवनयोश्चैव मेकत्वेन विभावनात्॥ अनन्
तात्मपरिज्ञानमितिजानीहि पार्वति॥ आनन्दं ब्रह्मणो रूपं तच्च देहे विभावयेत्॥ तस्याभिव्यञ्जकाः पञ्च

तंत्र
१०६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मकाराद्याः स्वयीर्मिता ॥ सैवेयं जननस्तस्य गुह्या सिद्धेन चान्यथा ॥ प्रकटाच्चैवयं यस्मात्तां गोपयेन्मातृजा
रवत् ॥ असंयमाय मायास्यावाज्ञा सिद्धिः समीरिता ॥ न लिंगच्छिद्रं क्षिरां वामं न लिंगे दर्शनानि च ॥ निन्दाग्रे
रादिकर्तृणां गणानां नैव कारयेत् ॥ रहस्यकथनं चैव क्रियासक्तिश्च पापगोचरे सदा क्रियानुसन्धानं शिवभा
वेन तत्परः ॥ कामं क्रोधं तथा लोभं मदमोहौ तथैव च ॥ हिंसास्तेयं प्रमादं सर्वं यत्नो लोके विगर्हितं ॥ स्त्री
विद्वेषादिकं चैव वर्जयेत्तं निमानुसदा ॥ एकमेक गुरुदेवस्तस्य वोवासनं सदा ॥ असंशयस्तु सर्वत्र
नित्यरिग्रहतासमता ॥ फलवीराहितं कर्म भजेद नित्यमेव तत् ॥ पञ्चानामप्यलाभेनु नित्यं कर्मातिम
र्यतां ॥ निर्भयत्वञ्च सर्वस्मात् ज्ञेयं सर्वं हरिप्रियो ॥ स्वयमेव हि लीलाञ्च आत्मा ज्ञानं स्तुयावकः ॥ आत्मला
भात्परं नास्ति फलं कापि च सुव्रते ॥ ज्ञेया ज्ञातृपराज्ञेवी कथिता तव पार्वति ॥ वेदादि सकलाविद्याश्चेत्या
इव प्रकाशिताः ॥ सर्वेषु दर्शनेष्वेव विद्येयं खलु गोपिता ॥ धीमांस्तत्रैव दीक्षेत सर्वथात्मविभूतये ॥ अथ
शिष्यशिरोदेशावरणां रत्नशुद्धये ॥ भावयित्वा वपुस्तस्य क्षालितं मांसपूर्वंहितं ॥ तदन्ते चान्वद्भिश्च कुर्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध
१०७

तु गुरुः स्वसारधीः ॥ मूलादिब्रह्मरन्ध्रान्तं ज्वलन्तीं ज्वलनच्छविं ॥ प्रतीशायहरीं कोटिसूर्यप्रकाशिनीं ॥ प
रां चन्द्रकोटिप्रभां शुभ्रां सञ्ज्ञानेन्धनदाहिकां ॥ तत्तद्रश्मिभिरेवास्य पापपाशान्तसन्दहेत् ॥ शिवोहमिति
निश्चित्य वीक्षेत करुणाद्दृशा ॥ सर्वपापविनिर्मुक्तं सर्वदोषविवर्जितं ॥ पुनः स्वयं शिवो भूत्वा असन्दिग्ध
मना गुरुः ॥ शिवहस्तेन शिष्यस्य मन्त्रं शिरसि संस्पृशेत् ॥ जपो मन्त्रमनायायोगी शिष्यदेहं प्रविश्यतु ग
हीत्वा तस्य चात्मानं आत्मना योजयेत् गुरुः ॥ स्वयं मन्त्रतनुर्भूत्वा संक्रमन्मनसा दरात् ॥ सौवर्णकर्णिके
शिक्ष्यं स्वरसंस्थिते शुभे ॥ दिगष्टकस्थितं देवं गर्भस्युगादिमन्दले ॥ चतुरस्रासने शुद्धे मातृकायन्त्र
राजका ॥ निवेश्य सादरं देवि कलशामृतधारया ॥ स्नापयेन्मूलविद्याभिर्विघ्नं जाड्यं देशिकोत्तमः ॥ प
रिधाप्य दुकूले च चन्दनाद्यैर्विलेपयेत् ॥ अलंकृत्य यथालाभं सन्तानं शिष्यपुङ्गवं ॥ प्रसन्नं शान्तवि
त्तं पार्श्वे निवेश्य देशिकः ॥ तदङ्गमातृकान्यस्य विधिवत् न्यासमाचरेत् ॥ विमुक्त सुरवं स्वस्य हस्ते समस्य
गुरुः स्वयं ॥ यथाधिकारमालोच्य देवमेदान् प्रकाशयेत् ॥ अन्यथा सर्वहानिः स्याद् योगपद्मप्रकाशना

तंत्र
१०७

न्भोजनं तत्कर्म्मैस्तु कारयेत् ग्रामसुज्या ॥ अर्थगुरुः प्रसन्नात्मा पूर्वोक्तामात्मनपरां । बालाक्षिमांविधा
रोपादुकाः विनिवेदयेत् ॥ दक्षकर्णे द्विशोबालां पश्चाद्दिस्तं निवेदयेत् ॥ स्वकीयचरतां मूर्द्धि शिष्योनि
क्षिप्य पार्वति सर्वान् मन्त्रान् सक्रमानपि क्रमेतोव यथाविधि ॥ यथाधिकारमावर्ज्य साङ्गं गुरुच शिशोः क
रं ॥ स्पर्शयित्वा किमप्यङ्गं तदङ्गमात्रकादिकं ॥ द्व्यक्षरं त्र्यक्षरं वापि चतुरक्षरमेव वा ॥ आनन्दनाथशु
क्तान्तं नाम कुर्यात् गुरुः प्रिये ॥ आचारान्न्वशिष्यार्थं हृद्धेतस्य परामृषेत् ॥ त्रिभिः कुटैस्तदङ्गं त्रि
प्रपूज्य गुरुः स्वयं ॥ पदिरम्यातदमूर्द्धि समुपाघ्राय सादरं आत्मरूपं ततः स्मृत्वा शिष्यः पूर्णो विभावये
त् ॥ अष्टोत्तरसहस्रस्वशक्तिहान्यनवाप्नये ॥ प्रसन्नात्मा जपेद्दिष्यांततो गुरुरुदारधीः ॥ कृतार्थः कृत
ज्ञातपस्तु यथाविभवविस्तरैः ॥ वित्तशाठ्यं परित्यज्य दन्तमाहो च चिन्ततां ॥ हस्ताश्वरथयानाद्यैर्दास
दासीभिरेव च गोभूहिरण्यवस्त्राद्यैस्तोषयेत् गुरुमात्मनः ॥ कुम्भादिकर्णीयस्त्रव्यं सर्वमराजपएवच ॥
अर्थप्राणाः शरीरञ्च सर्वस्वं स्मैनिवेदयच ॥ पतित्वा पादयोर्मूले दण्डवद्भुवि मानवः ॥ नमस्ते भगवन्ना

थशिवायगुरुरूपिणे॥ प्रसीदकरुणाधाममयिदीनवत्सले॥ कायेनमनसावाचात्वत्तोनान्याग
तिर्मम॥ प्रसन्नानुवरादेविभोगमोक्षविधायिनी॥ तन्मनाभवहेपुत्रत्वामेवत्वंसदास्मर॥ देवभाव
स्त्वनेमासपूर्णेतन्मयोभव॥ वेत्तिस्त्रिंशत्तिथीयुक्तेवर्षेचोमितिभिवन्द्यतं॥ हस्ताभ्यांस्तुत्वासुत्थाप्यप्रस
न्नोहयंसदाशिष्यसिद्ध्यःसकलास्तूर्णमत्तुतेमतप्रसादतः॥ प्रसन्नात्मातथाशिष्योविदिताखिलवेद
कः॥ भक्तिश्रद्धासमायुक्तोभोजयेद्देवनायिका॥ ब्राह्मणान्पूजितोथार्थदीनान्धकृपणानपि॥ पश्चान्ने
रातिमिष्टैश्चज्ञातीनपिचभोजयेत्॥ गन्धैर्नानाविधैःपुष्पैर्माल्यैरपिचतोषयेत्॥ तेभ्यआशिषमाद
यसमर्थोयानजयावहः॥ सत्गुरोर्हितदीक्षोमहाविद्याश्वरोमहान्॥ सर्वमन्त्राधिकारीस्यात्सर्वज्ञोभू
विजायते॥ ० ॥इतिगन्धर्वतन्त्रेसप्तविंशतितमःपटलः॥ ॥श्रीदेव्युवाच॥ पुरश्च
र्याविधिंब्रूहिविद्यासिद्धिर्भवेत्यथा॥ अथवक्ष्येविधानानिपौरश्चरणिकेविधौ॥ विनायेननसिद्धः
स्यात्मन्त्रोवर्षशतैरपि॥ यथाविधिगुरोर्दीक्षांगृहीत्वासाधकोत्तमः॥ तथैवतुयजेद्देवींनित्यंप्रातरनन्य

धी॥ आत्मानं तन्मयं स्मृत्वा भक्तिश्रद्धासमन्वितः॥ अष्टोत्तरसहस्रं वा लक्षार्द्धं यावदेव हि॥ तावद्देव
मनुं जप्त्वा पुरश्चर्यां समाचरेत्॥ न्यूनातिरिक्तदोषाणां शान्त्यै दशाधिकं जपेद्॥ गुरोराज्ञां समादाय
शुभानन्दकरो नरः॥ यत्नात् परस्त्रियं कुर्यात् सर्वविद्यासिद्धिकाङ्क्षया॥ सर्वेषामेव मन्त्राणां विद्या
नाम्नैव पार्वति॥ गुरोराज्ञैव मूलं स्यात् सिद्धिर्यस्य न याज्ञया॥ अशक्तश्चेद्वनासिक्तं पूर्वजन्मकृतं
शुभम्॥ प्रतिबन्धत्रयं त्वेनं मन्त्रसिद्धौ निगद्यते॥ यत्नात् पुरश्चरेन्मन्त्रीत्यतिबन्धः विनाशने॥ लक्ष्मी
प्रसादनात् दूत्यमन्त्रं भोगपरायणः॥ नैवार्घ्यं कुरुते मन्त्री तथा नैव पुरस्क्रियाम्॥ स मन्त्रस्य कृपणी
ज्ञेयो भजनं तस्य शान्तये॥ जीवहीनो यथा देही सर्वकर्मसु न क्षमः॥ पुरश्चरणहीनोऽपि तथा मन्त्रः
प्रकीर्त्तितः॥ तत्कुर्यात् सर्वथा मन्त्री गुरुवाक्यं विचारयेद्बुधः॥ गुरोरभावे विप्रोऽस्य सर्वप्राणिहिते रतः
शुद्धान्तःकरणः स्निग्धो वासादिभिर्विवर्जितः॥ कुलज्ञः कुलशास्त्रज्ञः स पुनर्गुरुः स्मृतः स्त्रियामकर्त्तुं पु
राक्षेत्रं समाश्रयेत्॥ चतुर्द्दश्यां यथाष्टम्यां अमावस्यां मुहूर्त्तके॥ देव्याः पुरस्त्रियारम्भः कर्त्तव्यः साधकोत्त

मः ॥ अथ पूर्वं समुपोष्याथ कृतनित्यक्रियः शुचिः ॥ द्विजान् देवान् गुरून् भक्त्या संपूज्य परमेश्वरि ॥ ग
णेशं मातृकाश्चैव प्रपूजयेत् ॥ ग्रामे वा नगरे देशे पुरे वा पत्तने तथा ॥ क्षेत्राधिपस्य नाम्नादिदीपस्थानं
विचारयेत् ॥ नामि क्षेत्रे शिवक्षेत्रे दीपस्थानं विचिन्तयेत् ॥ वर्तुलं रचयेद् विद्वन् सम्यक् कृत्वा शुभलोचने
तन्मध्ये नवकोष्ठानि कृत्वा वर्णान् समालिखेत् ॥ स्वरान् युग्मक्रमेणैव दिक्षु चाष्टदलेषु च ॥ अवर्गः कथि
तो देवि कवर्गादिक्रमप्रकम् ॥ पूर्वादिक्रमतो देवि कुवेरान्तं लिखेत्ततः ॥ लक्षवर्णौ शम्भुकोणे विलिखे
त् सूक्ष्मसंज्ञके ॥ यस्मिन् कोष्ठे स्वनाम तत्र मुखं विद्धि पार्वति ॥ अङ्ग्रपार्श्वयोः पाणियुग्मं जानीहि सु
न्दरि ॥ ततः पार्श्वद्वयं देवि कुक्षिस्थानं निगद्यते ॥ तत्पादद्वयं देवि विचाने पुच्छं प्रकीर्तितं ॥ मुखे कार्या
णि सिद्ध्यन्ति मनोरथशतानि च ॥ करस्थाने महेशानि सर्वकार्यविनाशकृत् ॥ उदरे तु सुखं सिद्धिं पाद
योर्हानिरुच्यते ॥ पुच्छे तु धनहानिः स्यादिति वै कथितं मया ॥ दीपस्थानं समाश्रित्य जपपूजां समाच
रेत् पूर्वोक्तविधिना सम्यक् गुरुं नत्वा विधानतः ॥ अक्षमालां समाश्रित्य मातृकावर्णरूपिणीम् ॥ मन्त्रसि

छिद्ररत्नसुसंसर्वपापौघनाशिनीम् ॥ शरावो मातृकादेवीमाया चैवाक्षमालयम् ॥ अमृतत्त्वसंयोगाद्दु
ष्टमन्त्रोपि सिध्यति ॥ अथ मुक्ताफलमयी वाङ्मोक्षफलदायिनी ॥ सर्वसिद्धिप्रदा नित्यं सर्वलोकव
शङ्करी ॥ यथा मुक्ताफलमयी स्फाटिकी च तथा भवेत् ॥ रुद्राक्षमालिका भोगमोक्षानन्तफलप्रदा ॥ प्र
वालमाला वश्ये तु सर्वकार्यार्थसाधिका ॥ मणिनारचिता माला साम्राज्यफलदायिनी ॥ पुत्रजीवोद्भवा
माला पुत्रपौत्रप्रदायिनी ॥ पद्माक्षमालया लक्ष्मीर्जायते महती ध्रुवा ॥ रक्तचन्दनमाला तु वश्ये सर्वम
द्धिदा ॥ महाशङ्खमयी माला मारणोच्चाटनादिषु ॥ वीराणां शस्यते साहि हेमजा योनि शुभप्रदा ॥ पञ्चशक्ति
शते कुर्याद्वा विंशतिरेव वा ॥ मन्त्रैर्नाधिकैः कार्या बीजादेर्मणिसूत्रये ॥ एकैकस्मिन् सूत्रे देयः सर्वेभ्यः
स्थूलसन्निभः ॥ आद्यं स्थूलं ततो सूक्ष्मं सूक्ष्मतरं ततः ॥ विन्यसेत्तत्समन्तस्मात् सर्पाकाराविताययत ॥ ब्र
ह्मग्रन्थियुतां कुर्यात् प्रतिबीजं तथा स्थिरं ॥ अन्यथा विफला माला संस्कारान्यजपकर्मणि ॥ रुद्राक्षैर्यदि
जपान्ते रुद्राक्षैः स्फाटिकैस्तथा ॥ नान्यं मध्ये प्रयोक्तव्यं पुत्रजीवादिकं नु यत् ॥ यद्यन्यत्सुप्रयुक्तीतमाला

जप
११०

यं जपकर्म्मणि ॥ मिश्रीभावन्न यान्ति चाण्डालैः पापकर्म्मभिः । एकजातीयबीजेन यः कुर्य्यान्मालिकां म
दा । जन्मान्तरे जायते स सर्व्वदेवपारगः ॥ पूर्व्वोक्तेन विधानेन गृहीत्वा दिव्यमालिकां । जपं समारभे
त्पश्चात् प्रोक्तयोगसमन्वितः ॥ तत्र स्थित्वा जपेद् दिव्यां लक्षमात्रं सदा शुचिः । दधिक्षीरं घृतं गव्यमैक्ष
वं गुडवर्जितम् ॥ तिलाश्चैव सिता मुद्गाः चन्द्रकेसुकवर्जिताः । नारिकेलफलञ्चैव कदलीं लवलीं तथा
आम्रमामलकञ्चैव पनसञ्च हरीतकीम् ॥ एतानाहारवस्तूनि हविष्यं मन्यते बुधैः । अवैष्णवमसभ्यञ्च य
दशास्त्रं व्रतान्तरे ॥ त्याज्यमेव तु तत् सर्व्वं यदीच्छेत् सिद्धिमात्मनः । क्षीरञ्च नवमीमांसं गृञ्जनं कोद्रवभो
जनम् ॥ माषाढकीमसूरांश्च कोद्रवांश्च शाकानपि नामुनञ्च क्षिप्रकञ्चैव खसनारं प्रमत्तताम् ॥ श्रुति
स्मृतिविरुद्धञ्च जपं रात्रौ विवर्ज्जयेत् ॥ भूशय्या ब्रह्मचारित्वं मौनञ्चायनसूयता ॥ नित्यं त्रिसवनं स्नानं जप ११०
देवतास्तुतिकीर्त्तनम् ॥ नैमित्तिकार्च्चनञ्चैव विश्वासो गुरुदेवयोः ॥ जपनिष्ठा द्वादशैते धर्म्माः स्युर्मन्त्र
सिद्धिदाः । स्त्रीशूद्रपतितव्रात्यपतितनास्तिकसम्भाषणम् ॥ असत्यभाषणं जिह्मभाषणं परिवर्ज्जयेत् स

CC-0. In Public Domain. Digitization by eGangotri

न्यैर पिनभाषेत जपहोमार्चनादिषु ॥ अन्यथानुष्ठितं सर्वं भवत्यपनिरर्थकम् ॥ वाङ्मनःकर्मभिर्नि
त्यं निस्पृहत्वान्न भवेत् सदा ॥ वर्जयेत् गीतनृत्यादिश्रवणं नृत्यदर्शनम् ॥ माल्यस्रग्गन्धलेपस्त्रपुष्पधा
रणमेव च ॥ मैथुनं तत्कथालापं तत्गोष्ठीं यदि वर्जयेत् ॥ कौटिल्यं क्षीरमभ्यङ्गमनिवेदितभोजनम् ॥ प्राणि
हिंसां न कुर्वीत पुरश्चरणकृन्नरः ॥ अस्नातांश्च द्विजान् शूद्रान् स्त्रियान्नैव स्पृशेत्तथा ॥ असंकल्पितकृत्यश्च वर्ज
येत् मर्दनादिकम् ॥ त्यजेत् उष्णोदकस्नानं सगन्धामलकादिकम् ॥ शिवाङ्कं पञ्चगव्येन क्षालयेद्धितनःस्म
स्नायाच्च पञ्चगव्येन केवलामलकेन वा ॥ अपञ्चकरलम्भो वा शिरसि प्राह्लतोपि वा ॥ निराशनः स्नायान्नैवाग
च्छुत्यितन एव वा ॥ रथ्यायां सद्मवस्थाने न जपेत्ति मितालये ॥ प्रलपन् वा जपन् मावन्तावनिष्फलमुच्यते ॥
सकृदुच्छ्रुरिते द्वाये प्राणावं समुदाहरेत् ॥ प्रोक्षेपामर्षोच्छेदे तु प्राणायामं समाचरेत् ॥ बहुप्रलापे चाचम्यन्यस्या
ङ्ग नितितो जपेत् ॥ पतितानां सन्त्यजानां दर्शने भाषणे श्रुते ॥ क्षुतेऽधोवायुगमने जृम्भने जपमुत्सृजेत् ॥ प्रा
प्याचम्य जपेच्छेषं यद्वा सूर्यादिदर्शनम् ॥ स्नायीत नूत्नाग्र्य पायां शुचिवस्त्रधरः सदा ॥ प्रत्यहं क्षालयेच्छुर्याम्भे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गान्ध काकीनिर्भयःस्वपेत् ॥ एवमादींश्च नियमान् पुरश्चरणकृच्चरेत् ॥ एवमुक्तविधानेन विलम्बत्वरितं विना
१११ उक्तसंख्याजपं कुर्यात् पुरश्चरणसिद्धये ॥ देवतागुरुमन्त्राणामैक्यं सम्भावयन् धिया ॥ जपेदेकमनाः प्रातः
कालान्मध्यन्दिनावधि ॥ यत्संख्यामासमारब्धं तत्कुर्याद्दिने दिने यदि न्यूनाधिकं कुर्यात् व्रतभ्रष्टो भवेन्नरः
नैरन्तर्यविधिः प्रोक्तानदिनं व्यतिलङ्घयेत् ॥ दिवसातिक्रमात्तेषां सिद्धिहानिः प्रजायते मन्त्रजप्ताम्बुपानीये
सुलोचनमभोजनं ॥ कुर्यात् यथोक्तविधिना त्रिसन्ध्यं देवमर्चयेत् एकसन्ध्यं द्विसन्ध्यं वा नमन्त्रं केवलं जपे
त् एकग्रामे स्थितो गत्वा वन्देत केवलं गुरुं ॥ प्रणामोऽष्टाङ्गरूपात्र देवतावन्दनस्तथा ॥ नित्यं नैमित्तिकं कुर्या
त् सत्सङ्गं च साधुभिः सह ॥ शक्तौ त्रिसवनस्नानं द्वे सकृत् वा तथाचरेत् ॥ परकीयतटे नो यस्नानं पूर्वं समाचरेत् सं तंत्र
स्रुतेऽनले ॥ अथवा प्रत्यहं जप्त्वा कुर्यात् दशांशतः ॥ तथा होमदशांशञ्च जले सम्पूज्य देवतां ॥ तर्पयामी १११
ति मन्त्रान्ते प्रोक्तान् सम्पूर्णं तर्पयेत् ॥ जपो होमस्तर्पणाञ्च द्विजाशनं भोजनं ॥ पूर्वपूर्वदशांशेन कुर्यात्
पञ्चाङ्गसंयुतं ॥ स्वाभीष्टकामवर्णं च सूर्यार्घ्यं जलपानकं ॥ प्राणायामं ततः कुर्यात् पूर्वपूर्वदशांशतः ॥ दक्षा.

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ङ्गायासमन्तं मन्त्रपुरश्चरणमुच्यते ॥ तत्पुरश्चरणं नाम मन्त्रसिद्ध्यर्थमात्मनः ॥ यथोक्तं नियमं कृत्वा
स्वकल्पोक्तजपस्य हि ॥ करणं द्विजयानं तत्प्रोक्तं दीक्षितसत्तमैः ॥ तदंशांसमहतीं पूजां कुर्यात्तद्ब्राह्मणा
भोजनं ॥ गुरुं सन्तोषयेद्वं मन्त्राः सिध्यन्ति मन्त्रिणः ॥ होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः ॥ इतरे
षामनुवर्णानां त्रिगुणादिः समीरितः ॥ एकमङ्गं विहीयते नानेनेष्टमवाप्नुयात् ॥ अङ्गहीनं भवेद्यस्य तत्
तत्तन्नस्यार्थसाधकं ॥ सर्वथा भोजयेद्विप्रान् कृतसाङ्गत्वसिद्धये ॥ विप्राराधनमात्रेण व्यङ्गं साङ्गं भ
वेत्ततः ॥ न्यूनातिरिक्तकर्माणि न फलन्ति मनोरमान् ॥ तान्येवं पूर्णतां यान्ति समस्तानि भवन्ति चेत् ॥ अ
तो यत्नेन विदुषो भोजयेत्सर्वकर्मसु ॥ नियतान्यपि कर्माणि हीनानि द्विजभोजनैः ॥ निरर्थकानि ता
नि स्युर्वीजान्युषरगानि च ॥ अथवान्यप्रकारेण पुरश्चरणमुच्यते ॥ ग्रहेणाऽर्कस्य चेन्दोर्वा शुचिः पूर्वमु
पोषितः ॥ नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः ॥ ग्रहणादि विमोक्षान्तं जपेन्मन्त्रं समाहितः ॥ अन
न्तरं दशांशेन क्रमाद्धोमादिकञ्चरेत् ॥ ततस्तु मन्त्रसिद्ध्यर्थं गुरुं सम्पूज्य तोषयेत् ॥ ततश्च मन्त्रसिद्धिः स्या

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

देवताच प्रसीदति ॥ अथवा देवतारूपं गुरुं भक्त्या तोषयेत् ॥ पुरश्चरणहीनोपि मन्त्रसिद्धिर्न संशयः
॥ ॥ इति गान्धर्वतन्त्रे अष्टाविंशतितमः पटलः ॥ ० ॥ ईश्वर उवाच ॥ पूर्वोक्तविधि
ना देवि लक्षमेकं प्रजपेत्तथा ॥ रात्रौ ताम्बूलपूरास्यस्तथैवोक्तविधानतः ॥ कामरूपः वपुःकान्त्या कामिन्येव
महानिशि कुलयुक्तो जपेल्लक्षं निशायां मध्यभागतः ॥ अत्र यत् क्रियते कर्म तदनन्तफलप्रदं ॥ मू
लाधारे महादेवि लिङ्गं स्वयम्भुवाचकं ॥ ज्योतीरूपन्तु योनिस्थं तत्रैव मनसा जपेत् ॥ ध्यायेत्कुण्डलि
नीन्देवि तडिद्याक्षररूपिणीं हृदि त्रिकोणमध्ये च बाणलिङ्गे चेतजसि ॥ तत्र सञ्चिन्त्य मनसा जपेल्लक्षं स
माहितः ॥ मूर्ध्नि त्रिकोणमध्ये तु इतरं पश्चिमामुखं ॥ तत्रस्थित्वा जपेल्लक्षं यत्र कुत्र समाहितः ॥ एवं लक्ष
त्रये सिद्धे स्याज्ज्ञानस्वरूपजायते ॥ तन्मयात्मीयभावेन यथा देवस्तथा स्वे ॥ नवलक्षं जपेद्दिव्या सिद्धिभाग्
सन्द्रवे ॥ न ध्यानं न च चिन्तासो न पूजा न पुरस्क्रिया ॥ केवलं जपमात्रेण सिद्धयः सिद्धिकाक्षिणां ॥ को
टिजापेन सम्पूर्णो मन्त्रो मन्त्रात्मको भवेत् ॥ यावन्नाद्विजपत्यं मनसैव न चान्यथा ॥ मन्त्रमात्रस्वरूपे च

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्थित्र मनसि पार्वति ॥ ध्यानमात्रं मनः कृत्वा ध्यानं ब्रह्मणि चार्पयेत् ॥ विदिते ब्रह्मणः क्षेत्रे वित्तः स्वेवितृप्य
सुः ॥ नवस्थानानि कथ्यन्ते शृणु सावहिता प्रिये ॥ ज्योतीरूपं तदाधारे मेद्रस्थाने शिखोपमं ॥ नाभिस्थं सूर्य
रीसुजाखुन्दरीसोदयिनी ॥ सहस्रारे पतेप्य आधारे थेन वायुना ॥ अग्नदीपशिखाकारं संक्षोभ्याम
तमराउलं ॥ स्वधाधारसे भूयः पतिताः मूलपङ्कजे ॥ स्वकक्षस म्नधासुर्यादेवीसान्निध्यहेतवे ॥ मूलेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ध्यानयोगेन सम्प्राप्तां लेमयीं परां ॥ हृदये पङ्कजमध्ये तु बालालिङ्गं तु नेजसि ॥ तथा यां पूजयेद्देवीं परां
हृदये कामरूपिणीं ॥ पूरकेण समायाय संस्थाप्य कुम्भकेन तु ॥ देहचक्रे समायाय दद्यात्तत्याद्यादिकं
सुधाकुण्डलीपात्रसंस्थेन परमामृतवारिणा ॥ पाद्यमर्घ्यं रसाचार्द्यां तपुनश्चार्घ्यं प्रदापयेत् ॥ सहस्रदल
मञ्जूयलोलिताञ्जलिनाश्चुतं ॥ परमामृतपानीयं दद्यादाचमनं शुभे ॥ सपूर्विमान्तत्वरूपं तु गन्धं द
द्याद्विचक्षणः ॥ अहिंसा परमं पुष्पं पुष्पमस्तेयमेव च ॥ दयापुष्पं क्षमापुष्पं पुष्पमिन्द्रियनिग्रहं अ
मोऽस्याप्यमात्सर्यामविहिंपनथैव च ॥ अरागश्च तथा सत्यं पुष्पाण्येवं विदुर्बुधाः ॥ एतानि भावपुष्पा
णि सदैव विनिवेदयेत् ॥ वायुश्च धूपकं दद्यान्मतेजो दीपं निवेदयेत् ॥ स्वरास्तु छिन्नथा दद्याद्ध्याश्च मां तंत्र
सपर्यं ते ॥ सूर्यश्च दर्पणं दद्यात् चन्द्रश्चन्द्रमतनं ॥ आनन्दाभरणं दद्याद्द्व्याकाश्चामरं तथा ॥ अनाहतश्च १३३
निर्मयीघण्टामतां निवेदयेत् ॥ तत्त्व साधकश्रेष्ठः शङ्करादि सोऽङ्गवे ॥ तस्य गीतिश्च वाद्यश्च तो पयेत्तप
रमेश्वरीं ॥ ध्वनिनाद्भ्रमभेदेन नेजआकाशसङ्कुले ॥ सहस्रदलमध्ये तु चिन्तयेत् सुन्दरीं परां ॥ भैरवं

नन्दलिङ्गन्तु तन्मध्ये योनिसंयुतं ॥ एकीभावं तयोः कृत्वा अमृतं स्रावयेत्ततः ॥ जिह्वया गलसंयोगात् पिबे
त्तदमृतं नरः ॥ योगिभिः पीयते तत्तु न मर्त्यं गोस्तु पैष्टिकं ॥ पृथिव्यान्तर्गता आपस्तदन्तः शून्यमध्यगे शू
न्यमध्ये वसेद्वायुर्यस्य ध्वन्ध्वनिरीश्वरि ॥ तदन्तर्नादरूपा सा नादस्तद्विन्दुरीश्वरः ॥ तन्मध्ये तु परं ज्योति
श्शिखा सूक्ष्मा परात्परा ॥ विद्युद्दामसमसङ्काशा सहस्रादित्यभास्वरा ॥ सुनयना चातिसूक्ष्मा निराकारा
निरालया ॥ परानन्दमयी पूर्णा सा भवेत् सुन्दरी परा ॥ पार्थिवे पार्थिवानाञ्च लयं कार्यं समाधिना ॥ अ
प्सु चापो लयः कार्य्यः शून्ये शून्यस्य वै तथा ॥ लयो वायौ च वायूनां ध्वनौ ध्वनिं समर्पयेत् ॥ ज्योतिषा ज्वलत य
न्तत्र लयं वमनो लयः ॥ मनः करोति पापानि मनसा पापे लिप्यते ॥ मनस्तु मनीभूते वधर्म्मोऽपि न
च पातकं ॥ एवं भावनया हृष्टः परमानन्दनिर्भरः ॥ संसारसागरं घोरं रोगोऽस्य दोऽत्रस्ते शिवे ॥ भुक्तिमुक्ती
करे तस्य मम तुल्यो भवेद्भुवि ॥ ॥ देव्युवाच ॥ पूजाज्ञानमयी प्रोक्ता नतु हे मस्तुता दृशा ॥ ॥ ई
श्वर उवाच ॥ तद्रूपं विद्धि पुरस्य विन्दुत्रिवलयात्मकं ॥ आनन्दमेखलारम्यं मायो निविभूषितं ॥ त

गन्ध ब्रह्मपरमं ध्यात्वा सर्वज्ञानविजृम्भिते ॥ दीपिते ऽस्मोकुर्नैध्वविप्रपञ्चैरविस्तृतं ॥ वाच्यवाच्यमातृकारूप
१३८ मक्षरन्तु विराजितं अक्षरन्तु तस्माच्च निःशब्दं ब्रह्म जायते ॥ पुण्यपापे हविर्दद्दे विकृत्यां कल्पेह विद्धि वे
सङ्कल्पस्य धर्माधर्मैर्हविस्तथा ॥ धर्माधर्मौ हविर्दीप्ते आत्माग्नौ मनसा स्रुचा ॥ सुषुम्नावर्त्मना नित्यम
क्षवृत्तीर्जुहोम्यहं ॥ प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनास्रुचा ॥ धर्माधर्मकलास्नेहपूर्णां वह्नौ जुहोम्य
हं ॥ वह्निजायान्वितं प्राणेमन्त्राभ्यां होमयेत् शिवे ॥ तिस्रुपञ्चो यदा देवि जायते मन्त्रवित्तमः ॥ तदा स चिन्म
यः साक्षात् केवलं ब्रह्मसाधकः ॥ ० ॥ इति गन्धर्वतन्त्रे षट्त्रिंशत्तमः पटलः ॥ ॥ देव्युवाच
परदारपरिष्वङ्गात्तथा नीचाभिसङ्गमात् ॥ प्रतिलोमाभिसङ्गाच्च पातकी जायते नरः ॥ कस्मात् शक्तः कथं देव तंत्र
मुक्तः स्यात् परमेश्वरः ॥ वेदशास्त्रपुराणेषु सेवमुक्तिविरोधिनी ॥ शक्तिर्हि जगतो मूलं सैव जगत्स्वरूपि १३८
णी ॥ स्त्रियं त्यक्त्वा जगत्सा कं जगत्यन्मा मुखीभवेत् ॥ सर्वा सर्वत्र देवेश गर्हिता सर्वकर्मसु ॥ कथं वा तदु
पयोग्यं स्यादिति वेदविदां स्थितिः ॥ ॥ ईश्वर उवाच ॥ इदं परमं हे ज्ञाति पौरेव प्रतिपादितं सूक्ष्म

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतिस्तु धर्म्मस्य सुदैस्तन्नावबुध्यते ॥ ज्ञानाद्भिर्निर्म्मलं विश्वमज्ञानात्समलं प्रिये ॥ वह्निरयं महादेवि
सर्वगः सर्वभोजनः ॥ स कथं देवतायज्ञे वेदविद्भिर्निदर्शितः ॥ ज्वलच्चापि तथा ब्रह्मं ततः पूतं कथमद्भिर्ज्जे
मृत्रपत्रकण्डस्यापि मक्षिकोच्छिष्टमिदं मधुः ॥ दूषणीयं सुरापानं कथं यज्ञे निदर्शितं ॥ गोचर्मसञ्च
गवां सारं मलञ्च वीजमन्नवं ॥ कथं न्नाक्षिहितं देवपेयं कर्म्मणा पार्वति ॥ वीजनाशादन्ते कस्यचिन्नाशं वि
द्भिरुद्भुते ॥ जायास्वापि च सर्वासु तथा जातो जनिष्यति ॥ स सक्तत्वैदिकैर्म्मन्त्रैः एतोभवति पावकः वैदि
कैस्तान्त्रिकैः शुद्धपवित्रेयनतया सुरा ॥ दूषणं नास्ति देवेशि महाविद्याप्रसाधने ॥ यस्मिन्यत्रय आचार
स्तत्र धर्म्मस्तु तादृशः ॥ अत्र भ्रमो महान्दोषस्तस्मात्भ्रान्तिं त्यज प्रिये ॥ अद्वैतभावरहितो द्वन्द्वचित्तोऽथका
मुकः ॥ देवताभावरहितो नो स्यभावेन वाछनः ॥ परशक्तिं समागच्छेन्न सम्भवेत्तगुरुस्तल्पगः ॥ सरसारा
स्तु निर्वेः पारं करोति विधिनावसा ॥ नरकान्मुनिज्ञो शक्तिः क्षिप्यते विधिना शिवे ॥ विनाशक्तिं विनामद्य
मद्वैतभावनां विना महाविद्याक्रमं यत् यदयज्ञं घृतविवर्जितं ॥ द्वैतभावे महेशानि वरीजाति विक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध
१३५

त्मना ॥ अद्वैतनावसापन्ने लीने मनसि ब्रह्मणि ॥ कः कामः को भवेद्विष्णुः को ब्रह्मा को जनार्दनः को देवः को
ऽसुरो यक्षः पिशाचः कोऽपरः शिवे ॥ को द्विजः कोऽथवा शूद्रः को म्लेच्छः कोऽधमः शिवे ॥ किं रूपं किं विरूपं वा
को रोगी कोऽप्यनामयः ॥ किं शुभं मध्यममेध्यं वा किं पावनं त्वपावनं च ॥ किं मित्रं किममित्रं च को वध्योऽवध्य एव
वा ॥ किं भक्ष्यमभक्ष्यं वा किंपानमपेयं च ॥ अविद्याकल्पितं सर्वं तच्छिद्यया छिन्नसंशयः ॥ स्त्रियं सम
नरं विद्यामिति जानीहि पार्वति ॥ एका या वसुधा वाच्या एका या व बहुविग्रहं ॥ बहुरूपाणि देहानि च एकाया एव-
निश्चितं ॥ अद्वैतानन्दसन्देहो विशेषेव प्रकाश्यते ॥ शक्तियोगे भवेन्मांसं न मांसं सम्मतोपमं ॥ पशुघातं तत
दर्थं जन्तुहिंना ब्रह्महा भवेत् ॥ दैत्यान् पशूंस्तु विजानीयाद् दैत्यान् ब्राह्मणान् विदुः ॥ तत्त्वयुक्तस्य पापेन भू- तंत्र
न्नति वहुकिल्विषं ॥ मद्यपानस्तु यज्ञे तु नच्छिनापानको भवेत् ॥ पवित्रं सकलं अदेवासनायज्ञाकुसुमसिता १३५
वक्ष्यादि स्तनपर्यन्तं जगत्स्थावरजङ्गमं ॥ शरीरं दृश्यते यत्तु यन्न तत्कर्मप्राकृतं शिवे ॥ प्रकृत्या क्रियते कर्म
साक्षी पुरुष उच्यते तन्मायामोहितः सोऽथ कर्त्ताऽस्मिति मन्यते ॥ न कर्त्ता पुरुषो देवि कर्त्री प्रकृतिरुच्यते

CC-0. In Public Domain. Digitization by eGangotri

पुरुषे कारणं नास्ति निर्गुणत्वात् सदा प्रिये ॥ तथाकारणकर्तृत्वं सत्त्वगुणाभ्यां प्रतिष्ठितं । यदिदं पुरुषे देवि क
र्तृत्वमुपलक्ष्यते ॥ स्फटिके निर्मले देवि यथा रागमिवानघे ॥ अहमात्मा शाश्वतस्सर्वं बहिरन्तर्गतोऽप्युनः
सदा सर्वस्य मध्युक्तो मिस्सः ज्ञो निर्मलोऽचलः ॥ सत्यं ज्ञानमनन्तं यत् परं ब्रह्म सोहमेव न तत्र संशया ध्यायचि
न्तनुकुर्वन् कर्म नैर्लिप्यते ॥ उभाभ्यामपि शांकर्यास्यान्तं भवपयोनिधिं दक्षिणे नापि कौले न दुःखे नापि
सुखे न च ॥ कुम्भसंनाशसोस्मत्तु पोतवर्येण वा बुधि ॥ तस्मादिमनरः कौलो दक्षिणादपि सुव्रते ॥ कुलज्ञा
नं विना देवि नैव मुक्तिः कदाचन ॥ मायावलवतीह्येषा शक्तेर्गुणमयी तु या प्रकृतिर्गीयते सा तु सांख्ययोग
विशारदैः ॥ विद्याविद्येति सा प्रोक्ता वेदतत्त्वार्थदर्शिभिः ॥ महाविद्येति सा केश्चिन्महामायेति चापरैः ॥ शा
क्तिः सा सर्वभूतानां केश्चिदुपास्यते ॥ सेवितां समुपास्यन्ति ब्रह्मविष्णुमहेश्वराः ॥ तस्यास्तु वनमेभेद्ये विद्धो
ऽर्गलास्तवं ॥ योगभोगतयः ज्ञैर्भैरवानन्दैरभिनन्दिता ॥ आराधिता सेवनतां भोगस्वर्गापवर्गदा पा
नोख्यविधानेन न चेतनेनैव साधकः ॥ संसारनिगडैर्बद्धः पुमान्विमुच्यते तया ॥ तस्यानोपितिताद्देवि विमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध

१३६ क्तिनैवंविधायते॥ तन्निगृहीतचित्तानां ब्रह्मसांप्रत्यक्षरूपिते॥ अतस्ताश्च प्रयत्नेन पुरुषा मुक्तिलिप्सवः॥ स
माश्रयन्ति योगाशैर्नित्यानन्दस्वरूपिणीं॥ ब्रह्माविष्णुस्तथा चाहं आ मनवास्समुपास्महे॥ तपः क्लेशैश्च ता
न्देविपशुभावे स्थितो विधिः॥ सन्तोष्य परया भक्त्या सावित्रीं वेदमातरं॥ दुष्कृ शक्तिश्च वागिशीं लब्ध्वा सृष्टी
मचीकरत्॥ ततस्त्यां जगृहे मोहात्तद्ब्रह्मा पशुरूपधृक्॥ तज्जुगुप्सितमन्याय मद्यापि न निवर्त्तते परशक्ति
पशुस्तस्मात्मनसापि न संस्मरेत्॥ तमाव माश्रिता विद्यास्ताभेवसमुपासते॥ मिश्राणां सर्वभूतानां तेषां
मध्यं मतं पयः॥ अरूपं विस्पृष्टं मांसं रक्तस्तुः शक्तिदायितं॥ अपि वा सम्विदासक्ता भवेयुः शक्तिमाश्रि
ताः॥ दिव्यभावस्थितो विष्णुर्जगत्पालनरूपिणीं॥ मधुमैरेयमीणाद्यैः सन्तोष्यानन्दरूपिणीं॥ ज्ञान तंत्र
शक्तिमयीं लक्ष्मीं जगदाधाररूपिणीं॥ लब्ध्वा तु जगतः सोह्यं पालको भून्निराकुलः॥ तदागमाश्रिताः भूया १३६
स्तथैव तामुपासते॥ अथ देवाश्च दैत्याश्च मुनयो मानवाः परे॥ विष्णुमेव हि सततं भजन्ते भावसिद्धये
स्वभावस्थितात्मानस्तन्त्रावसूजुगोपहत्॥ ये शिष्टास्ते निवृत्ता वं गोपयन्ति सर्वदा॥ ते वैशिप्रियतमाः सर्वेषा

CC-0. In Public Domain. Digitization by eGangotri

ध्रुवं कृशमामृतं ॥ तच्छ्रुत्वा वह्निमुखान्कर्तुं लोकान्नमो केश्वरो हरिः ॥ इदमाह स्मृतान्देवि मामेव जगदीश्वरः ॥
भगवानुवाच ॥ पशुभावं पुरस्कृत्य वर्त्तन्त्स ज्ञानवर्ज्जिता निन्दकाः ॥ सर्वे विद्या भविष्यन्ति सज्ज्ञावे हि द्विजाशिते ॥ आ
गमैः कल्पितैर्देव यज्ञाद्यग्निमुखान् कुरु ॥ ॥ ईश्वर उवाच ॥ तदाज्ञां शिरसि कृत्वा विस्मोरमितते
जसः ॥ तथैवाहं महेशानि कृतवान् तन्त्रविस्तरं ॥ गोपयन्दिव्यभावं च पुरस्कृत्य पशोर्मतं ॥ अतस्त्वं महे
शानि वेदस्व वेददर्शिने खलु ॥ पूजितः पशुभावस्थ शक्ति निस्तावविस्मृता ॥ या शक्तिः सर्वभूतानां क्रियाभवति
सा पुनः ॥ स्थूलरूपा च सा देवी सूक्ष्मरूपा च पार्वति ॥ स्थूलरूपेण सा देवी सर्वमेतज्जगत्त्रयं ॥ मोहयित्वा
जनान्सर्वान्बहुरूपान्स्वेच्छया ॥ संस्थिता परमेशानि लीलाकलितविग्रहा ॥ स्वभावेनैव जानन्ति
तन्मायामोहिता जनाः ॥ केचित्तां तु प्रहाराद्यैः कटुक्तिभाषणैस्तथा ॥ ताडयन्ति च संमूढा जननीरयगामिनः
केचित्तां भूषणाच्छाद्यैः सन्तोषैरपि सेवया ॥ द्रज्यन्ति हितेधीराश्चतुर्वर्गप्रसाधकाः ॥ तेषां विप्रियकर्तारः
पतिष्यन्ति सुनिश्चितं ॥ सूक्ष्मरूपा च तां विद्धि सर्वेषामन्तरस्थितां ॥ त्रैलोक्यजननीं देवीं सुखेन ब्रह्मवर्त्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध
१३७

ना॥ योजयित्वा परानन्दपरमानन्दरूपिणीं॥ तयोर्योगामृतं नर्पयेत्तेन योगिनी॥ प्राणधारणाया
देविशुद्धनाडीमनःसुधीः प्राणानप्रवेशयेन्नाभ्यां तन्मुखे च मानुरुकेन॥ तदन्तवायुनाभिन्नो याति चोर्द्ध्व
परमेश्वरी॥ तस्मादाकृष्य तत्र वायुं कुम्भयित्वानुसञ्चयेत्॥ सञ्चितैर्वायुभिस्ताञ्च कुलवर्त्मविहारिणीं॥ सह
स्रारे महापद्मे सितदीधितिमण्डले॥ समुन्नीय परे हंसे तयोरैक्यधिया स्मरेत्॥ होमाद्यं विहितं तत्र चन्द्र
सूर्यात्मकेन योः॥ स्रुक्स्रुवौ च समादाय जुहुयाद्दव्यं हविः॥ मूलाधारे परे चक्रे नाभियां कुण्डली शुभा
न तत्र मावर्त्तते पश्च बहिर्याति दिने दिने॥ दिने म्राङ्गुलिमानेन तदूर्द्ध्वं चोपवासतः॥ द्विगुणा ततिकाले स्याः
त्रिगुणं भोजनाद्बहिः॥ अतऊर्द्ध्वं वहेद्देवि विज्ञेदिनं यदि मारुतः॥ न्यूनं वा तदधः प्राणाः शरीरं परिमुञ्चति॥
यावत्कालं वहेदेतद्गात्रस्थ जगदीश्वरः॥ तावच्चलति देहोयं तद्विना चाचलं स्मृतः॥ निश्चलं पवनं कृत्वा
योगी भवति साधकः॥ वायुना नीयते चायं मनस्तु प्राणिनां शिवे॥ वायौ च तु स्थिरीभूते मनोपि स्थिरतां
व्रजेत्॥ तरोरद्वैतभावेन निश्चलत्वं गते तयोः॥ देहं निराश्रयं विद्धि यथाकाम विलासिनं॥ ब्रह्मस्थित्वा यथा

तंत्र
१३७

CC-0. In Public Domain. Digitization by eGangotri

कामं सन्त्यज्य च कलेवरं ॥ अद्वैतमात्मभावेन स पुनर्शिवव्रजेत् ॥ प्रसङ्गात्कथिता देवि देहसिद्धिरनु
त्तमा ॥ येन तेन विधानेन परितुष्टा महेश्वरी ॥ संसारनिगडैर्बद्धः पुमान्विमुच्येत तया ॥ तस्याः सौख्यं विना
देवि मुक्तिर्नैव विद्यते ॥ तस्मिन्गृहीतचित्तस्य पुरुषस्य महेश्वरि ॥ ॥ इति गन्धर्वतन्त्रे सप्तवि
शतितमः पटलः ॥ ० ॥ ईश्वर उवाच ॥ बहुकालप्रजितैस्तु तस्यास्तत्सूक्ष्मरूपिणी ॥ यथा तुष्यति
भोगेन तथा योगेश्वनन्तथा ॥ अतो भोगेन तां तोष्य तया मुक्तो भवेत्सुधीः ॥ मया चापि पुरा देवि सेविता या
गवर्त्मना ॥ परितुष्टा न मे देवी सूक्ष्मरूपान्तरस्थिता ॥ शक्तिहीनस्तु मां वीक्ष्य वनिता विमुखस्तथा ॥ विष
ण्णवदनो ब्रह्मा हृदयेनाविदूयत ॥ चिन्तावशमुपाविष्टो ब्रह्मा लोकपितामहः ॥ मामासाद्य तथा विष्णुं पयो
क्षीरपयोनिधिं ॥ क्षीरोदस्योत्तरे तीरे रत्नद्वीपे सुशोभिते ॥ तत्र स्थित्वा वयोर्म्मध्ये ब्रह्मा ध्यानपरोऽभवत्
हृत्पुण्डरीकमध्यस्थे देवीपादसरोरुहे ॥ मनो निधाय योगात्मा देवीसूक्ष्मपरं जगौ यतीते बहुकालेऽप
देवी विश्वेश्वरी ॥ वरलपाशाङ्कुशधरा देवी किरीटादिविभूषिता ॥ चतुर्भुजा त्रिनेत्रा च बालार्ककिरणारुणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध
१३८

दर्शयामास स्वं रूपं तस्य तुष्टा तदा शिवे ॥ प्रसन्नां तां समालोक्य स्रष्टा सर्वजगद्गुरुः ॥ भक्त्याविनम्रवद
नो तुष्टाव वचनानामव ॥ ब्रह्मोवाच ॥ त्वं सावित्री च वाग्देवी त्वं श्रीः सर्वजगत्प्रसूः ॥ स्वाहा त्वं देवयज्ञेषु पि
तृयज्ञेषु च स्वधा ॥ स्वधा त्वं देवलोकेषु हविस्त्वं खलु मानुषे ॥ त्वं हि विद्याश्च मन्त्राश्च वेदास्त्वं हि सुरात्मिका
अर्द्धमात्रात्मिका त्वं वै यानुच्चार्या विशेषतः ॥ त्वमेव परमा शक्तिर्जगदाकाररूपिणी ॥ विचार्य्यस्वाङ्ग्यो
गेन लक्षणाशेषमूर्द्धसु ॥ यत्स्थिरीक्रियते देवि तत्ते रूपं सनातनं यदव्यक्तमनिर्देश्यं निष्कलं परमा
त्मकं रूपं न वेवतत्सूक्ष्मं सकलं च जगन्मयि ॥ या सृष्टिशक्तिरस्माकं स्थितिशक्तिस्तथा हरेः ॥ अन्तश
क्तिस्तथेशस्य सा त्वं शक्तिः सनातनी ॥ त्वं जातवेदोगता शक्तिः स्यात्त्वं दाहिका सूर्य्यकरस्य शक्तिः ॥ आह्लादि
का त्वं वसु चन्द्रिकायास्तां त्वामहं नौमि नमामि चाम्बिकां ॥ योषायोषित्प्रियासां त्वं विद्या त्वं चोद्धरेत संसा
यश्चात्वं सर्वजगतां मायात्वं तथा हरेः ॥ यथा प्रकाश्यते भुक्त सा त्वं नित्यं प्रसीद मे ॥ सिद्धादिस्त्वमनादि
त्वं विश्वयोनिरयोनिजा ॥ अनन्तान् सर्वजगत त्वमेवैकानन्तरूपिणी ॥ एकात्वं त्रिविधा भूत्वा मोभसंस

गंग
१३८

रकारिणी ॥ संसारसागरोत्तारतरणिः सुखमोक्षदे ॥ त्वं नित्यास्त्वमनित्यासि त्वं चराचरमोहिनी ॥ नमस्ते
जगतां मातः सृष्टिरूपे सनातनी ॥ स्थितिरूपे नमस्तुभ्यं नमः संहाररूपिणि ॥ एवं स्तुयमाना सा यो
गनिद्रा विरिञ्चिना ॥ आविर्बभूव प्रत्यक्षं ब्रह्मणः परमात्मनः ॥ देव्युवाच ॥ परितुष्टास्मि लोके
श स्तोत्रपाठेन तेन ते विभो ॥ वरं वृणीष्व भद्रं ते यत्ते मनसि वर्त्तते ॥ ईश्वर उवाच ॥ मां समीक्ष्य वरं देवि जग
त्संहारकारकं ॥ सृष्टिशक्तिं मयि न्यस्य विष्णौ पालनरूपिणीं ॥ संहारशक्तिमीशाने देहि मातर्नमोस्तु
ते एकश्चरति भूतेशो न द्वितीयां स मोहते ॥ तथा मोहय सर्वेशं दाराः स्वयं जिघृक्षति ॥ देव्यु
वाच ॥ यदुक्तं भवता ब्रह्मन् तत्सत्यं न चान्यथा ॥ मोहयित्वाहमीशानं सतीरूपेण शङ्करं ॥ संहरिष्या
मि लोकेशा जगदेतच्चराचरं ॥ तथापि तानं तु त्यक्ता स न विष्यामि पालीति ॥ इति तस्मै समाभाष्य ब्रह्मणे
परमेश्वरी ॥ वीक्ष्यमाणा जगत्स्रष्टा तत्रैवान्तरधीयत ॥ तस्मात्तं नाहि तत्राय स्कन्द ब्रह्मा लोकपितामह ॥ कृ
ताञ्जलिपुटो भूत्वा विष्णुमाह प्रजापतिः ॥ संहारकरणीयोग्यं वीतभार्यस्य यङ्गवेन ॥ तन्निदेशान्महादे

वेविस्तोलोके सुदुर्लभं ॥ इति तद्वचनं श्रुत्वा भगवान्हरिरीश्वरः ॥ आदिष्टवान्सख्यिभण्डेवीरभावंसु
दुर्लभं ॥ वीरभावेस्थितः सोहं मातस्त्वां समुपास्महे ॥ अद्यापि परमेशानि मातस्तुभ्यं नमो नमः ॥ प्र
कृतिः सर्वभूतानां त्वं हि सर्वजगत्प्रसूः यामुक्तिर्मम देवेशि क्षितिरूपानुगीयते ॥ सा त्वमेव नमे
नाहं मातः सत्यं नमो नमः ॥ या मे मुर्त्तिर्द्वितीया च जलमयी निकथ्यते ॥ सा त्वमेव नमे नाहं मातः सत्यं
नमो नमः ॥ आग्नेयी या तृतीया मे जगत्क्षोभणकारिणी ॥ सा त्वमेव नमे नाहं मातः सत्यं नमो नमः ॥
चतुर्थी वायवी मुर्त्तिः सृष्टिसंहारकारिणी ॥ सा त्वमेव नमे नाहं मातः सत्यं नमो नमः ॥ पञ्चमी या च स
र्वेषां परिणामस्वरूपिणी ॥ सा त्वमेव नमे नाहं मातः सत्यं नमो नमः ॥ षष्ठी या सर्वदेवानामाप्यायनी तं३
तिगीयते सा त्वमेव नमे नाहं मातः सत्यं नमो नमः ॥ सप्तमी मम मूर्त्तिर्या जगदाह्लादकारिणी ॥ सा त्वमे १३९
व नमे नाहं मातः सत्यं नमो नमः ॥ अष्टमी मम मूर्त्तिर्या स्थितिसंहारकारिणी ॥ सा त्वमेव नमे नाहं मा
तः सत्यं नमो नमः ॥ न चैवाहं नमे किञ्चित् यदिह जगतीतले ॥ तथैवेदं जगद्धाम जगत् सर्वं त्वमेव

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हि ॥ देव्युवाच ॥ मया सर्वं जगद्व्याप्तं वत्स सत्यं ब्रवीमि ते ॥ मय्येवैतेऽवताराश्च मत्त एव हि सर्वदा योप
ये ॥ त्वं मे वाहं न चान्यासि त्वं साहं विष्णुरप्यहं अहमेव जगत्सर्वं नास्ति किञ्चिन्मया विना ॥ यत्तु पश्यसि
हे वत्स यत्किञ्चिज्जगतीतले ॥ ब्रह्मादिस्तम्बपर्यन्तं सत्यमहमेव न संशयः ॥ इत्येकस्तं जगत्कृत्स्नं प
श्याद्य सचराचरं ॥ इत्युक्त्वा दर्शयामास शास्त्रे वे जगदीश्वरी ॥ स्वशरीरे जगत्कृत्स्नं संप्रविष्टमनेक
धा ॥ जगन्मयीं ततो दृष्ट्वा शम्भुर्मायाविमोहितः ॥ मामुद्धर जगन्मातर्मोहसागरमध्यतः ॥ ० ॥
इति गन्धर्वतन्त्रे त्रयस्त्रिंशत्तमः पटलः ॥ ॥ जगन्मय्युवाच ॥ मा विषीद महादेव सर्वथा त्वं स्थिरो
भव ॥ कुलज्ञानी कथं त्वं हि भावज्ञानी कथं पुनः ॥ इत्येवं त्वं मया पृष्टस्तवमात्मानं न विस्मय ॥ सदानन्दम
यं धाम स्वविद्याभेदसंगतो ॥ पुरुषः प्रकृतिश्चैव नित्यौ द्वौ मय्युपस्थितौ ॥ सगुणा शिवला देवी निर्गु
णो निर्मलः प्रभात् ॥ अविद्या नाम रूपा सा यदं शाभेदरूपिणी ॥ सिसृक्षापापिनी चाख्या सर्वविधे सम
पास्थिता सिसृक्षया मया पूर्वं प्रार्थितः पुरुषः स्वतः ॥ मामानन्दमयानन्दमित्युक्त्वा धर्षितः प्रभुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध
१४०

मयापि तन्मात्रोऽसौ कथ्यते सगुणो विभुः॥ तत्तदानन्दो हेरानन्दाहं पुनः पुनः॥ जडत्वात्तु भयोर्देव शू-
न्यभावमुपागतं। अथातन्मात्मनोजीताशक्तिराद्या सनातनी॥ गुणत्रयीमयी सा तु त्रिगुणत्रयस्वरूपि-
णी॥ अधः कृत्वा तु पुरुषं हकारार्द्धस्वरूपिणी॥ विपरीतेन रमते वह्निरर्कस्वरूपिणी॥ अशिरस्क-
रूपात्मसमशोषाकारसंस्थिते॥ अनश्वरमजस्रं त्वमात्मानमुपास्महे। त्रिगुणत्रयमहादेव सर्गमि-
न्तत्प्रतिष्ठितं त्रब्रह्मादिस्तम्बपर्यन्तं जगत् स्थावरजंगमं॥ शरीरं दृश्यते यत्तु यत्तत् सर्वं प्राकृतं विदुः॥ प-
ञ्चभूतमयं विद्धि चासत्यं सत्यवत् भ्रमः॥ पृथिवीयं महादेव प्रकृतीनां तु कस्तूरी॥ घ्राणस्थानेव चारा-
ली न देवी न तु मानुषी॥ रसमात्रं जलं विद्धि न द्विजं न च पुरुषं। रूपमात्रं तु यत्तेजस्तत्र किं जातिक- तंत्र
ल्पना॥ स्पर्शमात्रं तु यद्वायुर्नो नमो नाधमः स्वतः॥ शब्दमात्रं यदाकाशं विभोस्तस्य महात्मनः॥ नीच- १४०
तां कल्पने देवि मूढोऽज्ञानाविजृम्भितः॥ एभिः पञ्चभिरारब्धं देहं स्थावरजङ्गमं॥ पञ्चानां सन्निपातं प-
ञ्चधा स्मरां न पुरुषं तदसत्यं विजातीया तत्सत्यं ब्रह्मनन्दनं तत्तदेहादिन्नहि शिवो देव्या परमानन्दरूपवा

CC-0. In Public Domain. Digitization by eGangotri

न् ॥ ततत्वमसीतिवयो विद्यात्मसत्वब्रह्मणो मनः ॥ यदिदं लक्ष्यसे देवपञ्चभूतान्नविग्रहे ॥ वायुभिरि
न्द्रियग्रामप्रेरितेः पञ्चभिः शिवं ॥ कर्तृत्वमात्मनो देव तद्विद्याभ्रमो महान् ॥ व्यापृतेष्विन्द्रियेष्वात्माविवे
किचाविवेकिनां ॥ दृश्यतेभ्रेषु धावत्सु धावन्निव यथा शशी ॥ आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधिय
स्वक्रियार्थेषु वर्तन्ते सूर्यलोकं यथा जनाः देहेन्द्रियगुणान्कर्माण्यमले सच्चिदात्मनि ॥ अध्यस्यन्त्यवि
वेकेन गगने नीलतादिव ॥ अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि ॥ कल्प्यन्ते ह्यम्बुगते चन्द्रे चलनादि यथा
म्भसः ॥ रागेच्छासुखदुःखादि बुद्धौ सत्यां प्रवर्तते ॥ सुषुप्तौ नास्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मन ॥ प्रकाशो
ऽर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता ॥ स्वभावः सच्चिदानन्दनित्यनिर्मलतात्मनः आत्मनः सच्चिदंशश्च
बुद्धेर्वृत्तिरिति द्वयं ॥ संयोज्य चाविवेकेन जानामीति प्रवर्तते ॥ आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्विति
जीवः सर्वमयं ज्ञात्वा ॥ द्रष्टेति मुह्यति ॥ रज्जुसर्पवदात्मानं ज्ञात्वाजं रोमयं वहेत् ॥ नाहं जीवः परात्मेति ज्ञा
तश्चेन्निर्भयो भवेत् ॥ आत्मावभासयत्येको बुद्ध्यादीनीन्द्रियाणि हि ॥ दीपो घटादिवत्स्वात्मा जडैस्तैर्नाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध
१८१

भास्यते ॥ स्वबोधेनान्यबोधश्च बोधरूपस्तथात्मनः ॥ न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने ॥ निषिध्य
निखिलोपाधीन्नेति नेतीति वाक्यतः ॥ विद्यादैक्यं महावाक्यैर्जीवात्मपरमात्मनोः ॥ अविद्यकं शरीरादि
दृश्यं बुद्बुदवत्क्षरं ॥ एतद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलं ॥ देहात्मनो जन्मजरा -- नशादयः
शब्दादिविषयैः सङ्गो निरिन्द्रियतया न च ॥ अमनस्त्वान्न मे दुःखरागद्वेषभयादयः ॥ अप्राणो ह्यमनाः शु
भ्र इत्यादिश्रुतिशासनात् ॥ निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरञ्जनः ॥ निर्विकारो निराकारो नित्यमुक्तो
ऽस्मि निर्मलः ॥ नित्यशुद्धविमुक्तैकमखण्डानन्दमद्वयं ॥ सत्यं ज्ञानमनन्तं यत्परं ब्रह्माहमेव तत् ॥ एवं नि
रन्तरं कृत्वा ब्रह्मैवास्मीति वासना ॥ हरत्यविद्याविक्षेपान् रोगानिव रसायनं ॥ शम्भुरुवाच ॥ देहाद्भिन्न तंत्र
कथं ह्यात्मा गीयतः कुत्र संस्थितः कथं वा ज्ञायते ब्रह्मंस्तन्मे वद जगन्मयि ॥ जगन्मय्युवाच ॥ अविछिन्नं वाज्ञा १८१
नानन्तां शेसनि केवलः ॥ स्वयंप्रकाशते ह्यात्मा मेघापायेंऽशुमानिव ॥ अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्वि
निर्मलं कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत् ॥ संसारः स्वप्नतुल्यो हि रागद्वेषादिसङ्कुलः ॥ अबोधे सत्य

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वज्ञाति सुरो धेऽसत्यवङ्गवेत् ॥ तावत्सत्यं जगज्जाति शुक्तिकारजतं यथा ॥ यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठान
मद्वयं ॥ सच्चिदात्मन्यनुस्यूताः -- ॥ व्यक्तयो विविधाः सर्वा हाटके कटकादिवत् ॥ -- यथा कटकनामानो पाधिश
तोविभुः ॥ तद्वदाद्विकश्च ज्ञातिनन्नाशेत्वेकवङ्गवेत् ॥ नानोपाधिवशादेव जातिवर्णाश्रमादयः आत्मन्यारोपि
तास्तोये रसवर्णादिभेदवत् ॥ पञ्चीकृतं महाभूतसम्भवं कर्मसञ्चितं शरीरं सुखदुःखानां भोगायतनमुच्यते
पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितं ॥ अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनं ॥ अनाद्यविद्यानिर्वाच्य
कारणोपाधिरुच्यते ॥ उपाधित्रितयादन्यदात्मानमवधारय ॥ सर्वभूतस्थमात्मानमहमेकमथात्मनि ॥ सर्व
भूतानि संचिन्त्य चिन्तयस्वैकमेव हि ॥ उत्पद्यतिफलं यात्याञ्च न सदिदं निशामय ॥ मनः करोति पापानि म
नः पापे न लिप्यते ॥ मनस्तु मननाभूतेन धर्मो न च पातकं ॥ ॥ इति गन्धर्वतन्त्रे ऽनवमादिंशत्तमः
पटलः ॥ ० ॥ शम्भुरुवाच ॥ कथ्यतां देवदेवेशि यतीभूतावुभौ कथं ॥ शिवशक्तिमयं ज्ञानं कथं
वाज्ञायते तथा ॥ जगन्मय्युवाच ॥ एभावः शिवमित्याहुः सीमा वस्तु स्मृतिः परा ॥ शिवो ज्ञानमयो देहेना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तिर्वुद्धिमयी परा ॥ उक्तं शिवो महासेन शक्तिः कुण्डलिनीत्विति ॥ लिंगं शिवस्तथा शक्तिर्योनिर्जगति दृ
श्यते ॥ इत्येवं त्रिविधा शक्तिः स्त्रियं विद्धि पुरः शिवः ॥ नानयोर्विद्यते भेदो यथाग्निः स शिवो ध्रुवम् ॥ न शिवेन
विना शक्तिर्न शक्त्या वा हीनः शिवः ॥ नतत्तत्त्वस्तयोर्भेदश्चन्द्रचन्द्रिकयोरिव ॥ एवं तौ सर्वभूतेषु द्विधा भूत्वा व्यव
स्थितौ ॥ तस्मान्नास्ति तयोर्भेदं जगदेतच्चराचरम् ॥ पिता माता च तत्त्वश्चेति भावोऽयं विविधो मुधा ॥ स्वविद्या
सु हृष्टाभ्यासात् हृष्टो भूतो हृदि स्थितः ॥ गुरुवाक्येन तं विद्यात् दृष्टाभ्यासेन मानवः ॥ जीवः सुखं सर्वभूतम
यो भवति वै ध्रुवम् ॥ शरीरं विविधाङ्गं मे कथ्यते ष्टगुमादरम् ॥ त्वमेवाहं न चान्योऽस्मि शरीरं मे तदेव हि
चैतन्यं सर्वभूतानां शब्दब्रह्मस्वरूपकम् ॥ वर्णास्तेषां तत्त्वकं मन्त्रविद्यादिभेदतः ॥ कुम्भुमागुरुकस्तूर्या गे२
रोचनाचन्दनेन्दुभिः ॥ पञ्चाङ्गयन्त्रपीठेषु सान्निध्यं यथा भवेत् ॥ नवत्पूजा मन्त्रादौ कार्याणि तत्कर्मविधान १४२
तः ॥ सर्वेषामेव देवानां मन्त्रमात्रं शरीरकम् ॥ पूजयेत्तन्त गुरोर्मन्त्रीदेवतात्मस्वरूपतः ॥ किं नीयं कथ्यते
देव यत्त्वं पुनर्ध्यानगोचरम् ॥ कृत्वा रत्नमयं रूपं शुद्धकाञ्चननिर्मितं ॥ प्रत्यहं पूजयेद्देवमम्नं मासि मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिच्च ॥ वार्षिकत्वथवाकुर्य्यान्महोत्सवमनुत्तमम् ॥ विमुखो दन्तमाश्रित्य दोषो नानृप वर्त्तते ॥ महो
त्सवविधेर्भ्योमिरस्याङ्गन मनोरथः ॥ विमुखा नत्स्य दुर्बुद्धेः पितरः समराङ्गणाः ॥ तस्मात्परदिनं प्रा
प्ते वोधयित्वा विधानतः ॥ प्रत्यहं पूजयेत्कृत्वा पूर्णानन्तस्यान्महोत्सवम् ॥ तत्रीयं कथ्यते यन्त्रे रत्नेवा हेम
निर्मितम् ॥ मदात्मरूपमावर्त्तं विदित्वा सतरो रविर्बुधः ॥ पूजयेत्कुन्दपुष्पाद्यैर्म्मद्रात्मा मदमेदतः ॥ चन्द
नागुरुकस्तूर्य्यारोचनावकुङ्कुमैः ॥ कुलपुष्पैश्च संलिख्यत्वकुक्षाविधिनायजेत् ॥ वाराहस्कन्दजेर्द
भैरनुलेपं विधर्पयेत् ॥ वराहस्कन्दजेर्दर्भैः कुर्य्यान्मलविशर्धरासम् ॥ प्रीतिर्म्मे जायते तत्र पूर्णानन्दश्च वा
र्षिकी ॥ सुगन्धिस्पर्शसुखदैः कुसुदैश्चैराच्छायमवनान्तरे ॥ तल्लिङ्गनातिनुष्ठेन तुष्टेन चित्तहारि
णा स्थापयेत् पूजयेत्सार्द्धं यत्नो नाहं तयाविना ॥ नैव त्वमपि हे देव प्रभुर्दीबोमयाविना ॥ तस्माद्दावांस
हैवान्नस्थापयेत् सिद्धिमिच्छुकः ॥ विद्रुममौक्तिकाभ्यां वा यो जपेन्मन्त्रमुत्तमम् ॥ समयाचारयोगेन तत्त्वेय
त्तो नेवशङ्कर ॥ पूजां यः कुरुते नित्यं भक्तिश्रद्धासमन्वितः ॥ चतुर्वर्गकालरूपैश्च हसैरालिङ्गितं शिवम् मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध
१४३

मकाकनयायुक्तं कतो पूरनायकम् ॥ सुरेयं मेपरं रूपं गुप्तं यज्ञगतीनले । तत्र पूजा सदा कार्या
कुलयागविधानतः ॥ सर्वपापेषु सर्वत्र कौलो नो धर्मः परो महान् ॥ त्वागमा निगमाः सर्वे कौल
धर्मस्य ॥ निसर्गं तु गमः कौलः स्वागमे हेम भात्यसौ ॥ ब्रह्मविष्णुशिवादीनां प्रभवं यत्र कौ नित
म् ॥ तद्रूपमेव परं धामं ब्रह्म सतोऽव्यक्तजन्मन ॥ यत् गुरोः कृपया लभ्या तत्र पूजा महोदया ॥ ब्रह्मप्र
काशकमतस्तु त्रिसंख्यं ब्रह्मउच्यते ॥ स्वयं प्रकाशते ब्रह्म स्वयं स्य दर्शनतः शिव ॥ स्पर्शनात् पूजयेत्तय
स्य ब्रह्मसरो वनिमज्जति ॥ आनन्दं ब्रौनि मञ्चेध्य संवाप्ति संजपञ्चयति ॥ कौलो धर्मस्त्वया प्रोक्तः स्त्रमास्या
स्य कुलं यजेत् ॥ सम्कृपा परमा शक्ति लिङ्गरूपा भवान् प्रभुः ॥ शुक्रं शिवो रजः शक्ति रिति ज्ञानी हि शङ्क
र ॥ त्वया मया जगदिदं परिपूर्णं महेश्वर ॥ एकेवाहं परं ब्रह्म शिवशक्ती तिभेदतः ॥ संप्रभिन्नं जग
दिदं भ्रमस्य वात्र कारणम् ॥ त्वमहं त्वेति यत् प्रोक्तं न द्विधा प्रमोमहान् ॥ तात्वमसि मस्यवाहं न त्वं नाहं
न देवयत ॥ आवयोर्नहि भेदोऽस्ति युक्तावुधाश्च शङ्कर ॥ मदन्तावयि संलीनत्वामेवाहं भवान् प्रभुः

तन्त्र
१४३

CC-0. In Public Domain. Digitization by eGangotri

आवयोः सरलाकारमभून्मिलितयोः शिव ॥ तन्महामोक्षमाप्नोति भोगैश्चैव महेश्वरः ॥ कल्पकोटि
शतानि च ॥ एजमात्रं हि मे प्रीतिर्यद्दिहान्यप्रकारतः ॥ मांसभारैर्न मे प्रीतिर्न तथा मद्यसागरैः यथा मे
जायते प्रीतिर्भगलिङ्गामृतैः शिव ॥ अहमेव महादेवि स्त्रियः सर्वा जगत्स्थिता ॥ इति मत्वा भजन्ते मां व
धाम्नाय समन्विताः ये देवा मत्कृते ज्ञानां मत्तस्मात् सिद्धिर्भूम्यगाः ॥ स्वधर्मान् परित्यज्य मामेव शरणाग
ता ॥ ते पुनर्भोगिनो मुक्ता जीवन्तोपि महीतले ॥ मदङ्गस्पर्शमात्रेण आत्मानं ज्ञातुमर्हसि ॥ मयि प्रवि
शाविश्वेशं मां भजस्व सनातनम् ॥ जहि शङ्कां महादेव त्वमात्मानं च विस्मर ॥ विष्णुः पिवत्यसौ वामं तु स्त
नं दक्षिणां स्तनम् ॥ त्वं पिव त्वं महादेव ममाधरं च कृतामृतम् ॥ स्त्रियं गच्छन् स्पर्शन् पश्यन् तनाभिरेव ॥ वि
हारवान् ॥ ध्यानं पूजां जपश्चैव कुर्यान्मे साधकोत्तमः ॥ शक्त्या युक्तः सदा मन्त्रीन मया रहितो भवेत् ॥ तथा
विरहितो देवः सर्वकर्मसु अक्षमः ॥ पतिहीना यथा नारी सर्वकर्मविवर्जिता ॥ शक्तिहीनस्तथा मन्त्री तस्मा
त् शक्तियुतो भव ॥ स्वभार्या चेद्देवेशि साध्वी तस्याः कृतीर्भवाय च ॥ कुलभार्याकुलाकृष्टिर्विनाशायैव के

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वलमङ्कुलभेदिनदीतीरे कोषागारं यथाशिवः ॥ भगलिङ्गसमायोगात् यदानन्दः प्रजायते ॥ ब्रह्मैव तत्
द्विजानीयादनन्तं मोक्षसाधनम् ॥ गुरुपूजाकाङ्क्षित्विं घ्नान्तसाधारणाकर्म ज्ञात् ॥ रहस्यास्यानकंकर्णि
कासनं गवाद्युत्थनम् ॥ भूतशुद्धिः परीत्तः समाये इन्द्रियनिग्रहः ॥ प्राणायामस्तनाङ्कस्थित्यासमात्रसमी
रितम् ॥ नखदन्तक्षमादौ निष्ठ्यूपदीपप्रदापनम् ॥ चाटुकानिरतानेत्र चस्तुपुष्पाण्यङ्गसङ्गमम् ॥ दर्शनं
स्पर्शनं योनेर्द्विवाराल्लिङ्गपर्षणम् ॥ अधरामृतपानञ्च स्वयसावेशनं तथा ॥ विक्षेपोत्क्षेपणाद्वैवय
ननोत्पतनं तथा ॥ नयनाद्युपचारञ्च मरवनेहवनं तथा ॥ सीत्कारो मन्त्रजपनं ब्रह्मार्पणौकचिन्तनम् ॥ कूजनं
गायनं स्तुम्भ्यं रेतःपातो विसर्जनम् ॥ इत्थमेव महादेव पूजनं मे समीरितम् ॥ एकायावरूपिणायाः प्रत्यह
यः समाचरेत् ॥ जीवन्मुक्तः स्वयं देवो ज्यसाध्यमपि साधयेत् ॥ भोगैश्वमध्रुवकाङ्क्षी र्भासाव स्थितो यजेत्
श्रुतिस्मृत्युदितं कर्म त्यजन्नवाथ समाश्रयन् तन्न कर्म्मपरित्यागाद्ध्यानं जातिभुज्यते ॥ ततो वरूपस्वं
सकापरेवाञ्चमस्तु लर्भमम् ॥ विद्याभ्यासप्रयोदेन भोगेन मोक्षमाप्नुयात् ॥ एवं वरूपिधान् भोगाभोगान्वै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुमनोरमान् ॥ समासाद्य वनं स्नास्तैर्वैराग्येषु न आविशात् ॥ असारांश्च तथासारान् निःसारांश्च तथा परान्
नानाविधैर्विविक्तार्थैर्विधिव्यसाधकसन्तः ॥ सारभूतं परं तत्त्वं मन आधाय योगवित् ॥ निःसारमसदाधन्नं
जगदेतच्चराचरम् ॥ सत्यं किमपि तत्त्वैव वस्तु साक्षान्निरक्षरम् ॥ तदानन्दमयं ब्रह्म विदितात्म निसाध्य
कः ॥ एकान्तविजने रम्ये मृदुकोमलआसने ॥ आसीनश्चिन्तयेत् ब्रह्मापरमानन्दनिर्भरः ॥ ब्रह्मचिन्तापरा
रामोदभोगेषु विगतस्पृहः ॥ एवंभाव्यंसमादाय योगिनो सहचारिणीम् ॥ असाध्यं साधयेत् योगी योगि
न्येव सहायिनी ॥ यथा त्वं कामयनाथ पार्वत्या परमेश्वर ॥ मोहयित्वा पुनर्देवी शङ्करं प्राह पार्वती ॥ ✱
इति गन्धर्वतन्त्रे चत्वारिंशत्तमः पटलः ॥ ॥ अनुलेकरसानन्दकैवल्यायतनं शिवम् ॥ नत्वा शिष्ये
क्षानन्दान्तसुधाम्बपरां शिवां ॥ पार्वत्युवाच ॥ प्रसीद परमानन्दमयि संशक्तिविग्रहः ॥ यत्त्वया देव परं त
त्त्वं तत्त्वतो विदितं मया ॥ त्वयादेव समाख्याताः सर्वे मन्त्राः क्रियाः पराः योगाः समाधयो ज्ञानं तथा चान्ये महे
प्सिताः ॥ तेषां हि कारणं तत्त्वं यदीशाः परात्परम् वक्तुमर्हसि तत्त्वेन ज्ञानं समस्तान्यनुत्तरम् ॥ वाच्यसत्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध १४५ पयापि त्वं ज्ञातुमिच्छामि तत्वतः ॥ प्रकाशो विषयाधीन इति सत्यं यदि प्रभो ॥ समाधीनत्वमेवस्यात् यथो
क्तं घनगह्वर ॥ शम्भुरुवाच ॥ अतिगुह्यतमं सूक्ष्ममवाङ्मनसगोचरम् ॥ मत्तायत्ते न गुह्यं यन्न तत्कस्या
पि कथ्यते ॥ अद्यमेव तमप्यस्य खलु क्षेतिव मे मतिः ॥ तमप्येवं स्मरस्यस्मात्त्वयापि विदितं प्रिये ॥ सच्चित्सं
योगसंसिद्धिममवश्यामवसायतः ॥ तदेव वो नरं प्राह सत्यं सत्यं मयोदितम् ॥ तदेव चित्समदायनो -- सं
स्थितं यदा ॥ तदा ज्ञानवमित्याहुर्मुनयस्तत्वविन्तमाः ॥ तदेवाहमिदं भावपूर्णानन्दो यदा भवेत् ॥ तदेवस्ता
स्मु भावं स्यादुत्तमे तत्पदत्रयम् ॥ शक्तित्रिशूली सर्गान्ते रेवालङ्कृता यदि ॥ सेव हिम्मीपरे स्युश्चेर्मुनिभि
परिकीर्तिता ॥ प्रकाशानन्दसन्दोह कैवल्य महदाश्रया ॥ मत्परत्वान्महासिद्धैर्मायेरित्वं च कथ्यते ॥ येम
न्त्राः परमेशानि तेनादावपि संयुता ॥ ते जीवन्ति वमन्त्रेभ्यो हेम्यान्यमिति मे मतिः ॥ सप्तपञ्च प्रभृत्यर्णाजग
तस्स्यापि वार्तिका ॥ एतेषां जीवनं तत्वादनुत्तरमिदं जगत् ॥ ॥ पार्वत्युवाच ॥ सकलानि स्फुलीचे
वमुक्तिमार्गप्रबोधिका ॥ मन्त्राश्चवहवः सन्ति वदत्तेषामनुत्तरः ॥ शम्भुरुवाच ॥ केषांचिदम्बउक्तानामेते

तंत्र १४५

CC-0. In Public Domain. Digitization by eGangotri

प्यनर्थदर्शना ॥ आवयोर्द्वैवदेवेशि मनुत्तं कारणामनोः सर्वेषामेव मन्त्राणां प्याप्यावां महेश्वरि ॥ आख्यो
रपितत्प्राप्यमनुत्तरमिति स्मृता ॥ अप्येतदक्षरातीते गम्यागम्यतया स्थितं ॥ अगम्यकारणात्त्वागम्या
वाचं प्रति प्रिये ॥ इदन्तयाहन्तया वा सर्वेषामन्तरात्मनि ॥ प्रतीयमानमप्यर्थे -- देवशिवनिर्णयं पू
र्णाहन्तास्वभावेन कृत्तिमाहन्तया विना -- यः पश्यति स पश्यति ॥ अहन्तायां महादेवि तत्त्वमेव प्राणिनां
प्रिया ॥ अज्ञानादपि सत्यानां सर्वेतेऽनुत्तरप्रियाः ॥ ॥ पार्वत्युवाच ॥ त्वया पूर्वोपदिष्टं यत्तत्त्वं श्रीम
त्परमयं ॥ तद्देवनिर्वाणपदमिति प्रोक्तं तदा मया ॥ इदानीमति गुह्यानां तद्वेद्यं ह्यनुत्तरं ॥ प्रसंशसे
परानन्दविमर्शाख्यविग्रहं ॥ एतस्मिन्नेव देवत्वे च ततः शेषं न मे विभो ॥ शम्भुरुवाच ॥ सत्यमेव त्वया ख्या
तमभयं तत्त्वसुन्दरि ॥ परस्यानुपितत्प्राप्यं पूर्वोदितमनुत्तरं ॥ यत् समस्तं तथाप्येतत्तयोरप्यन्तरं महत्
परानुसन्धविज्ञानाभ्यन्तर्बाह्यक्रियागुणैः ॥ स्वप्याचार्यस्मत्कलाशान्तिकेषामिच्छित्योगिनीमतं ॥ मानरूपक्रिया
पाधिविहीनत्वान्महेश्वरि ॥ परस्या अपि तत्प्राप्यं पूर्वोदितमनुत्तरं ॥ ॥ पार्वत्युवाच ॥ अस्य महात्म्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्थ १४६ मेवोक्तं त्वयामेव कृपानिधे ॥ उपायेनानुना पश्येत् युक्तं नैव तु जातुचित् ॥ यदिदं सर्वमाख्यातं यदप्युक्त
मुत्तमं नैव शक्नोमि निर्णेतुं ननु तत् कथय स्व मे ॥ शम्भुरुवाच ॥ अत्यन्ताभावतो भेदन्ययोः परमार्थतः
अद्य मीदृशमिष्टं त्वं पृष्टोऽहमनुयादितं ॥ संप्राप्तास्त्वर देवतानैव कार्या विचारणा ॥ षडन्यभवस्यैर्य्येणाप्रा
प्रवंगुणाकार्य्यतः ॥ तर्हिश्रियोपि वक्ष्यामि मयोक्तार्थस्य निर्णयं ॥ मनोवाग्विषयातीतं पूर्वोक्तं यदनुत्तरं त
त्रिधा भेदमायाति विद्धि नामाख्यबीजतः ॥ नान्यवसच्चिदानन्दभेदेन विभवान्नि तु ॥ मतस्वरूपो हि यदिन्तु
तस्मात्तादृग्नु भाविनि ॥ द्वयोः समरसाभावः सुखं वीजाख्ययोर्द्वयोः ॥ ऐक्यज्ञानपर्यैवानोदे विज्ञानविवाच
के ॥ वर्णक्रमेणासनानायसुर्य्यान्मथनभावनां ॥ एवं क्रमेण महेशानि नामनुत्तरतां व्रजेत् ॥ वह्निवत्काष्ठसन्न
न्धेसमुत्थोऽवनिं तरेत् ॥ वार्जनेमथनोद्भूयनत्तुशक्तिपदान्तिका ॥ ध्वनत्स्वेमेन स ~ न्योऽत्यसभावं स्वयमा तंत्र १४६
चरेत् ॥ प्रकाशानाविमर्षोनतस्माद्देवप्रकाशकं ॥ उत्तरोत्तरमेवेकं तन्यामितनक्रमोत्क्रमाम् ॥ शाक्तेवः
सति काशस्य स्वरूपो मूर्य्यं सक्तौ ॥ ननु यागतया ख्यातो प्रवाचान्नन्दमार्स्थिरौ ॥ सच्चिन्मयो क्रियासा राव ष्ठ

CC-0. In Public Domain. Digitization by eGangotri

तात्मक्रियापरो ॥ एतयोरावयोर्यन्तत्कारणं स्यादनुत्तरं ॥ हृदयानन्दभार्य्यानां शिवदाशी बिल्वफलं ॥ अनः
प्रतीयमानं तदमेयं सर्वतोमुखं ॥ आदिमध्यान्तनिर्मुक्तं निस्तरङ्गाब्धिसन्निभं ॥ तन्मात्रश्चैव चिन्मात्रं तयो
रैक्यरसाद्भुतं तमः प्रकाशहीनं यदमोघं कुत्तरं परं ॥ मयूतास्वमहत्स्वावतत्तसंज्ञमनुत्तरं तदेवावहितेन त्वं
स्वान्तेन परिभावय ॥ अनेन भावनावाशु मन्त्रस्तन्मयतां व्रजेत् ॥ यदात्मेते यस्मिन्कादिविश्वं त्वयि विभावयेत्
तेन विश्रान्तभावेन तदेकानन्दमाप्स्यथ ॥ आकाशे निर्म्मले यत्यत् सहस्राग्रमस्फुलं ॥ उत्पत्यनीयतेनत्व
न्नगतामन्यनुत्तरे ॥ इत्येवं प्रत्यभिज्ञानसिद्धिः स्यात्मवसुव्रते ॥ सुखं वेद्यं सुखं पश्चान्नैव शाक्तोमिवेदितु प
रात्परमाद्भिस्यान्नत्वस्यविहितं यतः इतं परं न जानामि त्वया हं कुलवाशये ॥ एतत्श्रुत्वा महादेव्या हेतं
दर्थविमर्षणं ॥ प्रकाशितरत्तदेवस्तु निम्मयाविसृष्टेन या ॥ महदाश्चर्य्यनेतन्मे सस्फुर्तो यस्य दास्थितः
इतिसाश्चिन्त्य देवस्य पादमाश्रिष्य सुन्दरी ॥ नवचान्योन्यसमथनात्स्वाज्ञानस्याभिनन्दिता यत्प्रकाशा
त्मकं सर्वं तत्त्वं केवलताङ्गतं ॥ विमर्षमवनिप्राप्नमित्येषाताद्भिकी स्थितिः ॥ अवधानेकभावानामतिसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्रन्थ
१४७

साक्षिरूपिणी॥ ततःप्रमाणोर्वराके श्रिदेव हिप्रमाणकः॥ नहिवैकर्त्तनं ज्योतिरीर्ष्यानेव समीक्षते आदर्शे
विमलाभोगे यथा सर्वप्रकाशते॥ ईश्वर उवाच॥ इत्थं चिदात्मकं विश्वं षट्त्रिंशत्तत्वभेदतः॥ आदौ शुद्धा
त्मकं तत्वपञ्चप्रधानमतः परं॥ शिवशक्तिश्च तत्वाख्यौ ईशो विद्येति भिद्यते॥ क्षित्यादिशान्तवर्णात्मा निरमा
यिय दाशिवे॥ कलाविद्यारागकालो नियतिर्निगद्यते॥ मायापूर्वे वकाराद्यैः सकारान्ताक्षरात्मके॥ प्रमाण
ष्पमनोबुद्धिरहंतन्मात्रपञ्चकं॥ श्रोत्रादिपञ्चकं लाद्यैर्वागादिपञ्चकं॥ तन्मात्रपञ्चकं मादि-- यादि
पञ्चकं॥ सिसृक्षोः प्रथमः स्पन्दः शिवतत्वं प्रभोः स्मृतं॥ इच्छैवास्य परिज्ञाना शक्तितत्वमदृक्षुसं सेच्छा
यास्वचितं विश्वमाच्छायाहन्तया स्थितः॥ स एव तत्वं सदाख्यं सर्वानुग्रहकोन्मुखं॥ स एवैश्वरतत्वं स्यात्
पश्यन्विश्वमदन्तया॥ अहन्तेदन्तयोरैक्यमविद्येति निगद्यते॥ साक्षद्भूते प्रमायां तत्वविभेदिनी॥ माया
ग्रहान्तशक्तेश्चः शिवं पुंस्त्वमुच्यते॥ अथमेवहि संसारी जीवो भोक्तेति दृश्यते॥ ज्ञातृकर्तृत्वपूर्णत्वनित्य
त्वव्याप्तिशक्तयः॥ तत्संकोचात्तदङ्कुश्चिता कलाविद्यात्मया स्थिता॥ मायात्मनः कला नाम किञ्चित्कर्तृत्वलक्ष

तंत्र
१४७

CC-0. In Public Domain. Digitization by eGangotri

णां ॥ विद्याकिञ्चिज्ज्ञतोहेतु रागोभिष्वङ्गकारणं ॥ कालपरिच्छेदकोथानियतिश्चेदमेवमे । कर्त्तृत्वं नान्यदि
त्यध्यवस्थायत्नशक्तिः ॥ प्रकृतिर्गुणसाम्यःस्यादहङ्कारादिजन्मभूः ॥ अहंसामदमित्येतद्बुद्धिहे
तुरहंस्मृतिः ॥ बुद्धिरध्यवसायस्यकारणंनियतात्मनि ॥ सङ्कल्पस्य-- वीजंमनउदीर्यते ॥ वचनादे
श्चशब्दादेर्वागादिश्रवणादिकं ॥ कारणंश्रवणादीनांग्राह्यंतन्मात्रपञ्चकं ॥ आकाशाद्यवसानाधिकारणं
भूतपञ्चकं ॥ परपराशक्तिमध्येशुद्धविद्यादिपञ्चकं ॥ तदन्यदपराशक्तिर्विद्यातत्त्वमुदीरितं ॥ अथदेवी
पराशक्तिःशुद्धशुद्धार्द्धहारिणी ॥ पृथिव्यादीनितत्त्वानिसदाशीनानिकात्मे ॥ तत्सकारणमात्राणिवहिर्
उन्मेतेवहिः ॥ अनुत्तरेच्छेउन्मेषआनन्दनसुलता ॥ क्रियेच्छाज्ञानशक्तीनांसमतत्त्वाकलनाचपरं ॥ इच्छे
ज्ञातानतास्त्रस्फुरत्स्फुरज्जगन्मयी ॥ चत्वारः परमार्णाःस्युःशुद्धात्मानःप्रवोदिताः ॥ अनुत्तरानन्दशक्ती
इच्छाशक्तिनियोजिते ॥ त्रिकोणामयषट्कोणमिच्छायांहरिमार्गते ॥ अनुत्तरानन्दपंक्तित्रिकोणाद्वययो
गतः ॥ एतेषामेवयोगेनक्रियाशक्तेःस्फुरंवपु ॥ उक्तोद्विशक्तिसंघट्टस्त्रिशलिङ्गेनयस्मरं ॥ परस्परविरोधे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गन्ध
१४८

नकार्य्यैव प्रसवेद्दते॥ नकेषाञ्चिदुपायेन यासां रूपमिदन्नवेत॥ वन्दुरेय षष्ठं स्फारो विमर्षः सर्गइत्य
सौ॥ कलाषोडशकाकाराद्यशक्तिबीजाद्यन्तपरानिथयः प्रतिपत्पूर्वाः पञ्चदश्यन्तिमा यथा॥ सूर्य्याचन्द्रम
सोस्तानक्षत्रक्षेत्रोस्थितिहेतवे॥ तथा विमर्षवपुषं सर्गस्यास्याः कलाः स्मृताः॥ विधेयमातृकादेवी बीजयोन्या
त्मनास्थिता॥ नित्यप्रभुर्दीप्तवपुर्विश्वस्याहि वजन्मभूः हृदयंबीजमेतस्याः सवियत्परमं महत्॥ वह्नी
जे यथा वृक्षस्तद्वत्सन्निहितं जगत्॥ विचार्य्यमानो यो वेदकारणादतिरिच्यते॥ मृदादेः कलसादीनां तत्त्वं
नान्यं तिवापरे॥ इत्याद्युस्तन्त्ववादित्वश्रुतीनामन्तिमा गिरः॥ इदं सर्वं स एवाहन्नासी दितिविनिश्चयात्॥
स्ताबाचि निर्बीजे सिक्षादिमायान्तिमं जगत्॥ विलुप्तप्रत्ययाकारं मततं संपरिशिष्यते॥ ततो ज्ञानक्रिया
सारा विश्वेश्वरसदाशिवाः॥ शक्तित्रिशूलिनी समन्ते चतुर्दशकलात्मनि॥ ऊर्द्ध्वाधः शक्तिवपुषः साकुलीन मतः तंत्र
परम्॥ इत्थं परस्यां सन्वित्तौ सर्वसङ्कुचितिः क्रमात्॥ अथवा ॐ मनसातीतयद्यकापि निरञ्जने॥ षट्त्रिंश १४८
तत्वलहरीफलदातीतगोचरे॥ विश्वात्मनिमहामन्त्रेस्वमावेसा विलीयते॥ कुतश्चिन्मथितेयानिदीप्तेकेनापि

CC-0. In Public Domain. Digitization by eGangotri

हेतुना ॥ सर्वंऊरिरिदंज्ञुहन्ननदारिश्चेन यो ध्यं तेयम्रूपस्तात्मकंन्दे विपन्नस्यन्दविजृम्भितं ॥ शाङ्कोचयनप
रामर्षीसामान्यस्यन्देकेवलं ॥ अहंहिप्रलयंकुर्वन्निदमप्रतियोगिनः ॥ पराक्रमयरोऽसुङ्ं तेस्वभावमशि
तपहम् ॥ ० ॥ इतिगान्धर्वतन्त्रेस्कचत्वारिंशतपटलः ॥ ॥ पार्वत्युवाच ॥ कथमुत्पद्यते वाणी
कथन्वासाविलीयते ॥ वाचांविनिर्णयंब्रूहि पश्चात्तत्त्वमुदीरय ॥ ईश्वरउवाच ॥ अव्यक्तात्प्राणउत्पन्नः
प्राणादुत्पद्यतेमनः ॥ मनसउत्पद्यते वाक्चवङ्ं मनासिविलीयते ॥ देव्युवाच ॥ आहारंकाङ्क्षतेकोसौ
भुङ्क्तेचापिरतोशकः ॥ जागर्तिस्वपतेकोसौ सुप्तः कोसौप्रबुध्यते ॥ ईश्वरउवाच ॥ आहारंकाङ्क्षतेप्राणोसु
ङ्ं तेचैवहुताशनः ॥ जागर्तिसुप्यतेवायुःसुप्तंतेजःप्रबोधयेत ॥ देव्युवाच ॥ कोवाकरोतियापानिकोवापा
पेनलिप्यते ॥ कोवाबद्धोविमुक्तःकोवापापैःप्रमुच्यते ॥ ईश्वरउवाच ॥ मनःकरोतिपापानिमनःपापेनलीय
ते ॥ मनस्तुतन्मनीभूतेनधर्मोनापिपातकः ॥ देव्युवाच ॥ यदिदंशासिमाकाशंदेहस्थंदेहवर्जितं नस्थि
तन्तुकथन्देहंदेहिदेहविवर्जितं ॥ कथंजीवःस्थितोदेहेकोवाजीवःप्रकीर्तितः ॥ केनपश्यन्त्यसौजीवकेनमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्ध
१४९

गेशा सत्त्वरेन ॥ सफलस्तु कथं जीवो निस्फलस्तु कथं न्नोरेन ॥ केन जीवत्यसो जीवः किं वा जीवस्य भोजनं ॥ कु
तो वा लीयते जीवो जायते कुत एव हि ॥ को वा जीव कथं प्राणः किं नजीव प्रकीर्त्तितः ॥ एतत् सर्वं यथा तत्वं त
त्वं मे कहि शास्त्वर ॥ संसारार्णवमग्नाह्यं येन मुच्चाम्यहं प्रभो ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि यत्त्व
या समुपहृतं ॥ कथयामि दस सन्देहसारात सारतरं शुभं ॥ वायुस्तेजस्तथाकाशं तृतीयं जीवसञ्ज्ञकं ॥ स जी
व प्राण इत्युक्तो वालाग्रशतकल्पितः ॥ जीवस्तु त्रत्त्व विज्ञेयं यावत् सत्वेन संस्थितं ॥ रजसा च समायुक्तो मृत्यु
जीवः प्रकीर्त्तितः ॥ तमसा च समायुक्तो मरणं हृष्टो भवेत् ध्रुवं ॥ सत्वेन च समायुक्तो धर्म्मज्ञानप्रवर्त्तकं ॥ र
जसा च समायुक्तो भुङ्क्ते च विषयान् प्रभु ॥ तमसा च समायुक्तस्त पापेन लिप्यते ॥ नासाग्रं चैव नाभि
श्च हृदयश्च तृतीयकं ॥ स्थानान्येतानि जीवस्य कल्पितानि शिवेन तु ॥ हृत्कमलं शिरश्चैव सत्वे यावद्धव
स्थितं ॥ देहसंस्पन्दइत्युक्तः शिवेन परमात्मना ॥ यावन्न चलते जीवस्तावन्निश्चलतां गतः ॥ नाभिस्थो निस्फ
लं ज्ञात्वा मुच्यते जन्मबन्धनात् ॥ नाभिस्थं सर्वकाले प्रहृदिन्निरूपति सर्वगः ॥ वर्णानासापुटानाः स्थोसुङ्क्ते

तंत्र
१४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च विषयान् प्रभुः ॥ जीवरूपस्थितिर्देहस्थो जीविते च महेश्वरः ॥ भुंक्ते भोगं शुभं जीवो देहि देहे व्यवस्थितः
देहं त्यक्ता यदा जीवो बहिराकाशमाश्रितः ॥ तदात्मविषयो जीवो जायते नात्र संशयः ॥ तद्विंदति निष्कल
त्वंज ध्यायेदिति सदाशिवं ॥ ध्यात्वा शिवत्वसहजं मुच्यते भवबन्धनात् ॥ सर्वगः सर्वदेहस्थो नासाग्रे च प्र
तिष्ठितः ॥ प्रत्यक्षः सर्वभूतानां दृश्यते न च लक्ष्यते ॥ नाभिमध्ये स्थितं जीवं शुद्धतत्वं तु निर्म्मलं ॥ आदित्य
मिव दीप्तं तु रश्मिभिर्ज्वलितं शुभं ॥ हकारार्द्धनिभं जीवं जीवो देहे च संस्थितः ॥ नाभिरन्ध्रं स्थितं ख्यातं वि
षयान् प्राप्य संस्थितं ॥ तिनेदग्धदलं व्याप्तक्षीरस्त्वसर्पिषा यथा कारणानान्तन्मध्येव प्राणापानेतु पञ्च
भिः ॥ श्वासनिश्वासयोगेन अधऊर्द्धं प्रवर्त्तते ॥ शुक्लपक्षे तु वातेन नीयते गगने यथा ॥ तथा भ्रमति जी
वा रक्तं प्राणापानैस्तु पञ्चभिः ॥ चतुष्कलासमायुक्तो भ्राम्यते हृदये स्थितः ॥ गोलकस्तु यथा देशे दण्डेन दण्डेनता
डितः ॥ ततस्तु पतते शीघ्रं भ्रमत्येव पुनः पुनः ॥ पार्वत्युवाच ॥ यदितं निष्कलं ब्रह्म त्वयामातीतं निरञ्जनं ॥
निष्कलं निर्म्मलं ध्यानं निष्प्रपञ्चमक्षरं ॥ अप्रत्यक्षमविज्ञेयं विनाशोत्पत्तिवर्जितं ॥ केवलं केवलं ज्ञानं शु

उ स्फटिकसन्निभं ॥ कारणं योगनिर्मुक्तं हेतुसाधनवर्जितं ॥ न तत्क्षणान्मुच्यते येन तं ज्ञानं ब्रूहि शङ्कर ॥ ईश्वर
उवाच ॥ एकदा देवसभाभागे कुमारो ब्रह्मणः सुतः ॥ परिसमेत्य योगीणां विष्णुं विश्वेशकारणं ॥ उवाच परया भक्त्या
ब्रह्मविद्यां वद प्रभो ॥ ययाचिरात्सर्वपापं व्यपोह्य परात्परं ॥ पुरुषं याति विद्वान्तस्मै स होवाच जगत्प्र
भुश्च श्रद्धाभक्तिध्यानयोगादवैहि ॥ न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ॥ परेन च
किं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति ॥ वेदान्तविज्ञानविनिश्चितार्थाः ॥ सन्यासयोगियतयो वि
शुद्धाः ते ब्रह्मलोकेषु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ॥ विविक्तदेशे च सुखासनस्थः शुचिः समग्री
वशिरःशरीरः ॥ अत्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य ॥ हृत्पुण्डरीकं विरजं विशुद्धं वि नेत्र
चिन्त्य मध्ये विशदं विशोकं ॥ अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिं ॥ अथादिमध्यान्तवि १५०
हीनमेकं विभुं चिदानन्दमरूपमद्भुतं ॥ उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तं ॥ ध्या
त्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥ स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्सो

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुस प्राणः ॥ सकालोऽग्निः सचन्द्रमाः स सर्वं यद्भूतं यच्च भाव्यं सनातनं । ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था
विमुक्तये ॥ सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ॥ संपश्यन् ब्रह्म परमं याति नान्येन हेतुना । आत्मान
मरणिं कृत्वा प्रणवं चोत्तरारणिं ॥ ज्ञाननिर्मथनाभ्यासात् पाशं दहति पण्डितः ॥ स एव मायापरिमोहि
तात्मा शरीरमास्थाय करोति सर्वं ॥ स्त्रीयन्नपानादिविचित्रभोगैः स एव जाग्रत् परितृप्तिमेति । स्वप्ने च जीव
स्सुखदुःखभोक्ता स्वमायया कल्पितविश्वलोके ॥ सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति
पुनश्च जन्मान्तरकर्मयोगात् स एव जीवः स्वपति प्रबुद्धः ॥ पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सकलं
विचित्रं ॥ आधारमानन्दमखण्डबोधं यस्मिन् लयं याति पुरत्रयञ्च ॥ एतस्माज्जायते प्राणो मनः सर्वे
न्द्रियाणि च । खं वायुर्ज्योतिरापश्च पृथिवी विश्वधारिणी ॥ यत्परं ब्रह्म सर्वात्मा सर्वस्यायतनं महत् ॥ सू
क्ष्मात्सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत् जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत्प्रकाशते ॥ तद्ब्रह्माहमिति ज्ञा
त्वा सर्वबन्धैः प्रमुच्यते ॥ त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ॥ तेभ्यो विलक्षणः सोऽहं विश्वसहं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जान्ह
१५१

न्माशोहंसदाशिवः॥मय्येवसकलंजातंमयिसर्व्वंप्रतिष्ठितं॥मयिसर्वंलयंयातितद्ब्रह्माद्वयेस्म्यहम्॥
अणोरणीयानहमेवतद्वन्महानहंविश्वमहंविचित्रम्॥पुरातनोहंपुरुषोहमीशोहिरण्मयोहंपुरुषोह
मस्मि॥अपाणिपादोहमचिन्त्यशक्तिःपश्याम्यचक्षुःसशृणोम्यकर्णः॥अहंविजानामिविविक्तरूपोनचा
स्तिवेत्ताममचित्सदाहम्॥वेदैरनेकैरहमेववेद्योवेदान्तकृद्वेदविदेवचाहं॥नपुण्यपापेममनास्ति
नाशोनजन्मदेहेन्द्रियबुद्धिरस्तिनभूमिरापोममनास्तिवह्निर्नचानिलोमेस्तिनचाम्बरञ्च॥एवंविदित्वा
परमात्मरूपंगुहाशयंनिष्कलमद्वितीयम्॥समस्तसाक्षिंसदसद्विहीनंप्रयातिशुद्धंपरमात्मरू
पं॥यएतत्त्वंसमधीतेसोऽग्निपूतोभवतिसुरापानात्पूतोभवतिकृत्याकृत्यात्पूतोभवतिअगम्याम
नात्पूतोभवति॥ ० ॥इतिश्रीजम्भर्न्नतन्त्रेद्विचत्वारिंशत्तमःपटलः॥ ॥समाप्तं॥ ० ॥
॥शुभम्॥ ॥ ०

तंत्र
१५१